# महाभारतम्- सभापर्व

## लक्षालङ्कारटीका-पाठान्तरादिसहितम् (क्रिटिकल् एडिशन्)

## भाग-3




सम्पादकः

सि. आर. प्रदीपसिंहाचार्यः चतुर्वेदः



प्रकाशनम्

वेद-वेदान्ताध्ययनशोधसंस्थानम्

वसन्तकुञ्ज, नवदेहली

विश्वविद्याग्रन्थमाला -4

वेदवेदान्ताध्ययनशोधसंस्थानम्

# श्रीमन्महाभारतम्

श्रीमन्महाभारततात्पर्यनिर्णय-महाभारतलक्षालङ्कारानुसारि-
प्राचीनतौळवपाठ-पाठान्तरादिसंवलितम्

# सभापर्व-३

सम्पादकः

सि. आर्. प्रदीपसिंहाचार्यः, चतुर्वेदः

उपसम्पादकाः

देवीप्रसादाचार्यः, आर् विठोबाचार्यः, श्रीनिधि.वि

प्रकाशनम्

वेद-वेदान्ताध्ययनशोधसंस्थानम्.
वसन्तकुञ्ज, नवदेहली.
2019

विश्वविद्याग्रन्थमाला- 4

**श्रीमन्महाभारतम्** **श्रीमन्महाभारततात्पर्यनिर्णय-महाभारतलक्षालङ्कारानुसारि-**

**सभापर्व-३** **प्राचीनतौळवपाठ-पाठान्तरादिसंवलितम्**

**सम्पादकः** : सि. आर् प्रदीपसिंहाचार्यः, चतुर्वेदः

**उपसम्पादकाः** : देवीप्रसादाचार्यः, आर् विठोबाचार्यः, श्रीनिधि.वि

**प्रकाशनम् :** **वेद-वेदान्ताध्ययनशोधसंस्थानम्.**
**वसन्तकुञ्ज, नवदेहली.**

© **सर्वे अधिकाराः स्वायत्तीकृताः**

**प्रथममुद्रणम् :** **2019**

**ISBN :** **978-81-998471-8- 7**

**पृष्ठसङ्ख्या :** **10 + 332**

**प्रतयः :** **250**

**मूल्यम् :** **200 रूप्यकाणि**

**मुखचित्रविन्यासः:** **कार्तिकः**

**मुद्रणालयः:** **वागर्थ. बेङ्गलूरु**

# Vedic Vedantic Studies & Research Institute

# Śrīmanmahābhāratam

## Sabhāparva vol-3

**"Following the Mahābhāratatātparyanirṇaya and Lakṣālaṅkāra; including the Ancient Tulu Recension and Variant Readings.**


**Edited by:**

**C. R. Pradeepa simha achaya, chaturveda.**

**Sub-editors**

Devīprasādācārya, R. Viṭhobācārya, Śrīnidhi, v.



**Published by:**

**Vedic Vedantic Studies & Research Institute**

**(Eetablished under SRI RAMA VITTALA SHIKSHANA SEVA SAMITI New Delhi)**

Sri Krishna Dhama, Plot No-3, Phase-II, Institutional Area,
vasant Kunj, New Delhi-110070

**2019**

**Vishvavidyagranthamala -4**

## Śrīmanmahābhāratam - Sabhāparva vol-3

"Following the Mahābhāratatātparyanirṇaya and Lakṣālaṅkāra;
including the Ancient Tulu Recension and Variant Readings.

**Edited by:** **C. R**. vd. **Pradeepa simha achaya, chaturveda.**

**Sub-editors :** **Devīprasādācārya, R. Viṭhobācārya, Śrīnidhi, v.**

**Published by:** **Vedic Vedantic Studies & Research Institute**
(Eetablished under SRI RAMA VITTALA SHIKSHANA SEVA SAMITI New Delhi)
Sri Krishna Dhama, Plot No-3, Phase-II, Institutional Area,

**ISBN :** **978-81-998471-8-7**

**Edition:** **2019**

**copies :** **250**

©: **Publishers**

**Price:** **200**

**pages** **10 + 332**

**printed by:** **vagartha.Bangalore**

# जगद्गुरुश्रीमन्मध्वाचार्यमूलमहासंस्थानम्

### पेजावरअधोक्षजमठः,उडुपि

## अनुग्रहसन्देशः

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥

पञ्चमवेदरूपे श्रीमन्महाभारते धर्माधर्मयोः सूक्ष्मः सङ्घर्षः, भगवतः श्रीकृष्णस्य माहात्म्यं च प्रतिपदं दृश्यते। इदानीं वेदवेदान्ताध्ययनशोधसंस्थानेन सभापर्वणः तृतीयः अन्तिमभागः प्रकाश्यत इति ज्ञात्वा वयं भृशं मोदामहे।

अस्मिन् भागे शिशुपालवधानन्तरं प्रवृत्तं द्यूतपर्व, अनुद्यूतपर्व च सन्निविष्टे स्तः। अत्रैव अधर्मस्य पराकाष्ठा, दुर्योधनादीनाम् ईर्ष्यावह्निः, धर्मराजस्य सत्यनिष्ठा च निरूपिता। विशेषतः श्रीकृष्णसविधे द्रौपद्या शरणागतिः, भक्तरक्षकेण श्रीकृष्णेन अक्षयाम्बरप्रदानेन तस्याः रक्षणम् इत्यादि च । अयं प्रसङ्गः सज्जनानां भक्तिमार्गे आदर्शभूतो वर्तते। पाण्डवानां वनवासगमनेन अस्य पर्वणः समाप्तिर्भवति। एतादृशं गम्भीरं पर्व इदम्।

अस्य ग्रन्थस्य प्रधानसम्पादकाः अस्माकं प्रियशिष्याः, शास्त्रज्ञाः विद्वान् श्रीप्रदीपसिंहाचार्याः। तैः सह श्रीदेवीप्रसादाचार्यः, श्रीविठोबाचार्यः, श्री-वि.श्रीनिधिआचार्यश्च सहसम्पादकरूपेण महता परिश्रमेण अस्य भागस्य सम्पादनं कृतवन्तः। एतेषां सर्वेषां शास्त्रसेवा अभिनन्दनार्हा।

अस्य ग्रन्थस्य पठनेन, मननेन च सज्जनानां आपद्धर्मविषये, शरणागतिविषये च सम्यक् ज्ञानं लभ्येत। ग्रन्थसम्पादकानां, प्रकाशकानां तथा च सर्वेषां पाठकानां च अस्मदुपास्य-श्रीमन्मध्ववल्लभ-श्रीरामविट्ठलपूर्णानुग्रहः सदा भवत्वित्याशास्महे।

इति नारायणस्मृतयः

**श्रीश्रीविश्वप्रसन्नतीर्थश्रीपादाः**

# निदेशकवचांसि

श्रीमन्महाभारतस्य कथाप्रवाहे राजसूययागस्य वैभवेन आरब्धं सभापर्व द्यूतक्रीडायाः विषादेन, पाण्डवानां वनगमनेन च परिसमाप्यते। अस्यैव पर्वणः तृतीयोऽयं अन्तिमभागः 'वेदवेदान्ताध्ययनशोधसंस्थानेन' सम्प्रति विदुषां पुरतः समुपस्थाप्यते।

ग्रन्थस्य अस्मिन् भागे शिशुपालवधोत्तरं प्रवृत्तानि घटनानि प्राधान्येन वर्णितानि सन्ति। मयनिर्मितायाः सभायाः दर्शनेन दुर्योधनस्य मनस्युत्पन्नः मत्सरः, ततः प्रवृत्तं कपटद्यूतं, धर्मराजस्य पराजयः, कुरुसभायां द्रौपद्या अपमाननं, तत्रैव भक्तरक्षणदीक्षितेन श्रीकृष्णेन कृता पाञ्चाल्याः मानरक्षा इत्यादि विषयाः अत्र चित्रिताः। अनुद्यूते पराजयं प्राप्य पाण्डवाः यदा वनं प्रति प्रस्थिताः, तदा एव कुरुक्षेत्रयुद्धस्य बीजावापोऽभवत् इति ऐतिहासिकं सत्यमत्र स्पष्टीभवति।

एतादृशस्य महत्त्वपूर्णस्य ग्रन्थस्य प्रकाशने अस्माकं संस्थानस्य महती आसक्तिः। अस्य कार्यस्य पृष्ठभूमौ श्रीपेजावरमठाधीश्वराणां, विश्वकल्याणचिन्तकानां परमपूज्यश्रीश्रीविश्वप्रसन्न-तीर्थश्रीचरणानां प्रेरणा शक्तिरूपेण वर्तते। पूज्यपादानां अनुग्रहबलेन एव वयं शास्त्रप्रचारे अग्रेसराः स्मः। तेभ्यः वयं साष्टाङ्गप्रणामान् समर्पयामः।

ग्रन्थसम्पादनकार्ये प्रधानसम्पादकाः, शास्त्रविचक्षणाः विद्वान् श्रीप्रदीपसिंहाचार्याः स्वपाण्डित्येन, विमर्शेन च ग्रन्थस्य गौरवम् अवर्धयन्। तेषां श्रमः सर्वथा प्रशंसार्हः। तथा पाठशोधने, टिप्पण्यादिनिर्माणे च सहकुर्वाणाः सहसम्पादकाः श्रीदेवीप्रसादाचार्याः, श्रीविठोबाचार्याः, वि.श्रीनिधिआचार्याश्च धन्यवादार्हाः।

महाभारतस्य अयं भागः अधर्मस्य परिणामं, भगवद्भक्तेः शक्तिं च बोधयति। अनेन ग्रन्थप्रकाशनेन अध्येतॄणां ज्ञानवृद्धिः भूयादिति श्रीहरिगुरुचरणौ प्रार्थयामहे।

विद्वान् डा। धनञ्जयाचार्यः<br>निदेशकः,

# सम्पादकीयम्

श्रीमन्महाभारतं नाम न केवलं इतिहासः, अपि तु भारतीयसंस्कृतेः, धर्मस्य, दर्शनस्य च विश्वकोश एव। 'यन्नेहास्ति न तत्क्वचित्' इत्युक्तिः अस्य ग्रन्थस्य व्यापकतां सूचयति। तत्र अयं सभापर्वणः तृतीयः अन्तिमभागः, यत्र शिशुपालवधानन्तरं प्रवृत्तं द्यूतपर्व, अनुद्यूतपर्व च अन्तर्भवतः।

अस्मिन् भागे राजधर्मस्य, दैवसङ्कल्पस्य च अद्भुतं चित्रणं लभ्यते। मयसभायाः दर्शनेन दुर्योधनस्य ईर्ष्या, शकुनेः कुतन्त्रं, द्यूतक्रीडायां धर्मराजस्य विवशता, कुरुसभायां द्रौपद्याः अपमाननं, ततः श्रीकृष्णकृतं तस्याः रक्षणं, पाण्डवानां वनवासगमनमित्यादयः अत्र मुख्य-विषयाः। "यदा यदा हि धर्मस्य ग्लानिर्भवति..." इति भगवद्वचनं स्मारयन्, अयं प्रसङ्गः अधर्मस्य पराकाष्ठाम्, तथा अन्ततः धर्मस्यैव विजय इति च तत्त्वं बोधयति।

एतादृशस्य ग्रन्थस्य सम्पादनं प्रकाशनं च सुकृतविशेषं विना न लभ्यते। अस्य कार्यस्य पृष्ठभूमौ परमपूज्याः, श्रीपेजावरमठाधीश्वराः, श्रीमद्विश्वप्रसन्नतीर्थश्रीचरणाः विराजन्ते। तेषां वेदशास्त्रविषयिणी श्रद्धा, शोधसंस्थानं प्रति तेषां वात्सल्यं च अस्मान् सर्वदा प्रेरयति। पूज्यपादानां दिव्यानुग्रहेणैव इदं कार्यं निर्विघ्नं परिसमाप्तम्। तत्पवित्रपादारविन्दयोः सश्रद्धं साष्टाङ्गप्रणामान् समर्पयामि।

तथैव, अस्मिन् कार्ये सर्वविधं सहकारं, प्रोत्साहनं च दत्तवद्भ्यः वेदवेदान्ताध्ययनशोध-संस्थानस्य निदेशकेभ्यः श्रीधनञ्जयाचार्येभ्यः अहं विशेषरूपेण कृतज्ञतां निवेदयामि। येषां ग्रन्थप्रकाशनासक्त्या अस्य ग्रन्थस्य मुद्रणकार्यं सुष्ठु सम्पन्नम्।

अस्य ग्रन्थस्य सम्पादनकार्ये सहसम्पादकैः महता परिश्रमेण साहाय्यं कृतम्। पाठशोधने, टिप्पणीसंयोजने च विद्वांसः श्रीदेवीप्रसादाचार्याः, श्रीविठोबाचार्याः, श्रीवि.श्रीनिधिआचार्याश्च यत् सहकार्यं अकुर्वन्, तत् सर्वथा श्लाघनीयम्। तेभ्यः सर्वेभ्यः मम धन्यवादाः। अन्ते, अयं ग्रन्थः महाभारतजिज्ञासूनां, विदुषां, शोधच्छात्राणां च मोदाय भूयात् इति प्रार्थये ।

विद्वद्वशंवदः

प्रदीपसिंहाचार्यः , चतुर्वेदः

# किञ्चिन्निवेदनम्

'देशे देशे तथा ग्रन्थान् दृष्ट्वा कतिपयान्' इत्यादि श्रीमदाचार्यैः तात्पर्यनिर्णये अभिहितम् । तेन महाभारते नानाविधाः पाठभेदाः सन्तीति अवगम्यते । पूना महानगरगतभण्डार्कर् प्राच्यविद्यासंशोधनालयेन षट्त्रिंशद्वर्षपर्यन्तं महाभारतमूलपाठमधिकृत्य अधीत्य मुद्रितं च तत् क्रिटिकल्एडिषन्मुखेन । तदेव इदानीम् अत्यन्तप्राचीनपाठान्तरसंवलितः महाभारतपाठः इति अनेकेषां विदुषाम् अभिप्रायः । परन्तु, ततोऽपि अधिकप्राचीनतमपाठः उडुपीनगरस्थनानामठीय-ताळपत्रग्रन्थेषु इदानीं समुपलब्ध इति महान् सन्तोषः ।

पञ्चदशाधिकाः महाभारतताळपत्राः इदानीम् अस्मद्धस्तपथं गताः । तत्पर्यालोचनया मूलपाठनिर्धारणे वयं प्रभवाः स्मः । ताळपत्रगतपाठाः वाविळ्ळप्रेस्द्वारा मुद्रितमहाभारतपाठस्य अत्यन्तसंवादि । यत्र विसंवादस्तत्रापि तात्पर्यनिर्णयानुरोधि पाठ एवात्रादृतः । तदेवं अस्मिन् शुद्धपाठसमीक्षासमये अस्माभिः मूलश्लोकतया पलिमारुमठीयताळपत्रगतपाठः आदृतः । श्लोकसङ्ख्याविषये प्रायः वावीळ्ळक्रम आदृतः । क्वचित् मूलश्लोकाः वावीळ्ळपाठे अदृश्यमाना अपि ताळपत्रे, टि.आर् पाठे, बोरि पाठेपि विद्यमानाः अर्थ-तात्पर्यानुरोधात् अस्मिन् संस्करणे आदृताः ।

एतत्संस्करणाध्ययने अस्माभिरादृतः अध्येतृभिरवश्यं वेदितव्यः विना यद्वेदेनेनात्रादृतक्रमानधिगमस्तदत्रैवं निरूप्यते ।

*. क्रिटिकल् एडिषन् मध्ये तालपत्रेषु वाविळ्ळे वा अविद्यमानाः श्लोकाः 'अधिकः/ अथवा ins' इति निर्दिष्टः । तद्यथा -

एतदिच्छाम्यहं श्रोतुं वदतो द्विजसत्तम ।
आनुपूर्व्येण ये चान्ये राजानो वंशधारिणः ।।

(२) व्यासतो for वदतो (क); विस्तरेण द्विजोत्तम (ग); द्विजोत्तमः; तपोधन;

after line 1 ins (६९६) वर्णसङ्करजो धर्मः कथं तं नास्पृशत्तदा ।
जरासञ्चारणं चापि अन्यदेहेषु नः श्रुतम् ।। (अधिकः घपाठे)

* बोरि क्रिटिकल् पुस्तके appendix निर्दिष्टाः केचनश्लोकाः appendix इत्येव श्लोकाधस्तनभागे निर्दिष्टाः ।

*. क्वचितु soubstitute इति पाठान्तर एव निर्दिष्टाः ।

*. श्लोकसङ्ख्याविषये अयं क्रमः अदृतः । प्रारम्भगतसङ्ख्या आपर्वम् अनुवर्तते । अध्यायान्ते आहत-अध्याय-श्लोकसङ्ख्या निर्दिष्टा यथा 'अस्मिन्नध्याये श्लोकाः सन्ति' इत्येवम् ।

*. भागवतमहाभारतयोः ताळपत्रेषु अयमपि एकः पाठभेदः दरीदृश्यते । भागवतपाठेषु शुक उवाच; परीक्षिदुवाच; राजोवाच इत्यादि पठ्यते क्वचित् । क्वचित् श्रीशुकः इत्येव । महाभारते तु सर्वत्र उवाच इति नैव पठ्यते । कुम्भकोणमुद्रितपुस्तके एवं बोरि पुस्तकेपि उवाचशब्दः पठ्यते । अयं नास्माभिरादृतः । केवलं जनमेजयः; भीमसेनः इत्याद्येव ।

* बोरिपुस्तके मध्ये मध्ये अध्यायाः यत्र परिसमाप्यन्ते तत्र वाविळ्ळपुस्तके अध्यायः नैव समाप्यते । एवं टि. आर् कृष्णाचार्यपाठेपि । अत्र प्राचीनतौळवपाठ एव आदृतः । यत्र द्वयोरध्यायोः एकीभावः तत्र बोरिपुस्तकपत्रसङ्ख्या क्वचिद्दत्ता; क्वचिन्नैव ।

*. line interpretation; आनुपूर्वीव्यत्यासः' यत्र दृश्यते तदपि सूचितः । तत्र निर्देशक्रमः एकरूपतया नैव निर्दिष्टः ।

*. पर्वारम्भे महाभारततात्पर्यनिर्णयगताः तत्पर्वकथासङ्ग्रहश्लोकाः उपनिबद्धाः ।

*. महाभारतकथाविषयानुक्रमणिकापि श्लोकानुसारेण प्रत्यध्यायं विस्तरतो निवेशिता

१*.यद्यपि महाभारतलक्षालङ्कारः एम्. एस्. पि द्वारा मुद्रितः । अत्र विद्यमानाध्याय-श्लोकसङ्ख्यादि न वावीळ्ळ-टि.आर् पाठानुसारी इति केवलं विषयमात्रमत्र निवेशितम् । अध्यायसङ्ख्यादि तौळवपाठानुसार्येवेति चावगन्तव्यम् ।।

*.लक्षालङ्कारे व्याख्याताः श्लोकाः क्वचित् वावीळ्ळपुस्तके नोपलभ्यन्ते । टि.आर् कृष्णाचार्यपाठे उपलभ्यन्त इति तेपि मूलश्लोकतया क्वचिद् ग्राह्या भवन्तीत्यस्माकमाशयः । महन्तः प्रष्टव्याः

*. मूलश्लोकाः बृहदक्षरै राराज्यन्ते । अधिकश्लोकाः अल्पाक्षरैः मूलश्लोकमध्य एव अर्थानुगुणाः विषयविशेषगर्भिताः मूलश्लोकानां पूर्वं पश्चाद्वा, पूर्वार्ध-उत्तरार्धमध्ये वा अनङ्कितसङ्ख्याः निवेशिताः । एतेषां महाभारतान्तर्गतत्वं वा अनन्तर्गतत्वं वा न निश्चेतुं प्रभवामः ।।

*.तत्र पाठान्तरदानसमये पूना(बोरि)पाठान्तराणि अपि निर्दिष्टानि । तद्यथा-

एवं पाठान्तरदानसमये आदृताः अपरेपि विशेषाः एवं निर्दिष्टाः –

सर्वमूलग्रन्थटीका-टिप्पणीषु महाभारतपाठः

* श्रीमन्मध्वाचार्यैः तत्र तत्र महाभारतवचनानि 'भारते, मोक्षधर्मपर्वणि' इत्यादिरूपेण नामनिर्देशमात्रेणसूचितानि।तानिकेचनउपलभ्यन्ते,नोपलब्धानिबहूनिइत्यनेकेषांप्रवादः। अस्माभिः अस्मिन् संस्करणे श्रीमदाचार्योदाहृतवचननां आकरमपि पर्व-अध्याय-श्लोकसङ्ख्या-निर्देशपूर्वकमाकरः प्रादर्शि । यथा -गीताभाष्ये 'अनन्तग अनन्त' इत्येवोदाहृतम् । अस्माभिः अस्य शान्तिपर्वान्तर्गतत्वं संशोध्य '(सर्वमूलो-) गीताभाष्योदाहृत-महाभारतवचनानि 'इति सङ्गृह्य पर्वारम्भे स्थलनिर्देशपूर्वकं १२-१३१-५ इत्येवं निर्दिश्यते ।।

* सर्वमूलेषु- महाभारतवचनतया अनुदाहृतान्यपि प्रमणवचनानि 'इतिच' इत्येवं रूपेण निबद्धानि । यथा गीताभाष्ये 'पृथिवी धर्ममूर्धनि' इति च ' इति। एतादृशानि वाक्यान्यपि अस्मदीयमहाभारतसंशोधनावसरे संशोध्य आकरप्रदर्शनपूर्वकं निर्दिष्टानि ।

* किञ्च महाभारतवाक्यानि टिप्पणीषु तत्र तत्र प्रासङ्गिकतया उदाहृतानि ।

एवं भागवतयादुपत्ये -शर्यातिकथाप्रसङ्गे आदिपर्ववचनमुदाहृतम् - 'यथोक्तमादिपर्वणि-जिगीषया ततो देवा वव्रिरे.. इत्यारभ्य 'दुहिता वृषपर्वणः ' इत्यन्तः ८० श्लोकाः ।

भरतराट्कथाप्रसङ्गेपि - आदिपर्ववचनम् -'तां विशोध्य तदा राजा देवदूतेन भारत... इत्यारभ्य 'मया शुभे' इत्यन्तो भागः ।

विश्वामित्रप्रसङ्गे गदापर्ववचनमुदाहृतम् -'सतु वव्रे वरं राजन् ब्राह्मणः स्यामहं त्विति । तथेति चावदद् ब्रह्मा सर्वलोकपितामहः इति गदापर्वणि' इति ।।

एवं उद्योगपर्ववचनम् -'प्रतिगृह्यय ततो धर्मः... विश्वामित्रस्तथाभवत् ।

एवं शान्तिपर्ववचनम् -च्यवनाद्वरदानेन रुचिकस्य ... ब्राह्मण्यं समवाप्तवान् ।।'

एतादृशग्रन्थसमम्पादनकाले सहकृतवभ्द्यः समेभ्यः विद्भ्द्यः धन्न्यवादः ।।

सम्पादकमण्डली

# द्यूतपर्व

## ४९. एकोनपञ्चाशोऽध्यायः

## 02- 06- 49

व्यासं प्रति युधिष्ठिरेण उत्पातफलप्रश्ने कृते व्यासेन तत्कथनपूर्वकं कैलासगमनम् ।। १ ।। व्यासोक्तं भ्रातृषु निवेद्य शोचतो युधिष्ठिरस्य अर्जुनेन समाश्वासनम् ।। २ ।। युधिष्ठिरेण समयकरणम् ।। ३ ।। व्यासस्य भविष्यसूचकवचसा युधिष्ठिरस्य चिन्ता सर्वत्र साम्येन वर्तितुं प्रतिश्रुतिश्च

वैशम्पायनः -

अनुसंसाद्य नृपतीन्पाण्डवाः पाण्डवाग्रजम् ।
अभिजग्मुर्महेष्वासा धर्मराजं युधिष्ठिरम् ।। १ ।।

लक्षालङ्कारः-अनुसंसाद्य नृपतीन् इत्यत्र अनुसंसाद्य अनुप्राप्य ।

सोऽनुमेने महाबाहुः भ्रातंश्च सुहृदस्तथा ।
समाप्ते राजसूये तु क्रतुश्रेष्ठे सुदुर्लभे ।
शिष्यैः परिवृतो व्यासः पुरस्तात्समपद्यत ।। २ ।।

सोऽभ्ययादासनात्तूर्णं भ्रातृभिः परिवारितः ।
पाद्येनासनदानेन पितामहमपूजयत् ।। ३ ।।

अथोपविश्य भगवान्काञ्चने परमासने ।
आस्यतामिति चोवाच धर्मराजं युधिष्ठिरम् ।। ४ ।।

अथोपविष्टं राजानं भ्रातृभिः परिवारितम् ।
उवाच भगवान्व्यासस्तत्तद्वाक्यविशारदः ।। ५ ।।

व्यासः-

दिष्ट्या वर्धसि कौन्तेय साम्राज्यं प्राप्य दुर्लभम् ।
वर्धिताः कुरवः सर्वे त्वया कुरुकुलोद्वह ।
आपृच्छे त्वां गमिष्यामि पूजितोऽस्मि विशाम्पते ।। ६ ।।

वैशम्पायनः-

एवमुक्तः स कृष्णेन धर्मराजो युधिष्ठिरः ।
अभिवाद्योपसङ्गृह्य पितामहमथाब्रवीत् ।। ७ ।।

युधिष्ठिरः

संशयो द्विपदां श्रेष्ठ ममोत्पन्नः सुदुर्लभः ।
तस्य नान्योऽस्ति वक्ता वै त्वामृते द्विजपुङ्गव ।। ८ ।।

उत्पातांस्त्रिविधान्प्राह नारदो भगवानृषिः ।
दिव्यांश्चैवान्तरिक्षांश्च पार्थिवांश्च पितामह ।। ९ ।।

सुमहश्च फलं तेषां भवतीति न संशयः ।
अपि चैद्यस्य पतनाच्छन्नमौत्पातिकं महत् ।। १० ।।

वैशम्पायनः -

राज्ञस्तु वचनं श्रुत्वा पराशरसुतः प्रभुः ।
कृष्णद्वैपायनो व्यास इदं वचनमब्रवीत् ।। ११ ।।

त्रयोदश समा राजन्नुत्पातानां फलं महत् ।
सर्वक्षत्रविनाशाय भविष्यति विशाम्पते ।। १२ ।।

त्वामेकं कारणं कृत्वा कालेन भरतर्षभ ।
समेतं पार्थिवं क्षत्रं क्षयं यास्यति भारत ।। १३ ।।

दुर्योधनापराधेन भीमार्जुनबलेन च ।। १४ ।।

स्वप्ने द्रक्ष्यसि राजेन्द्र क्षपान्ते त्वं वृषध्वजम् ।
तत्तेऽहं सम्प्रवक्ष्यामि तन्निबोध युधिष्ठिर ।। १५ ।।

यं च द्रक्ष्यसि राजेन्द्रं क्षपान्ते गोवृषध्वजम् ।।
नीलकण्ठं भवं स्थाणुं कपालिं त्रिपुरान्तकम् ।। १६ ।।

उग्रं रुद्रं पशुपतिं महादेवमुमापतिम् ।
हरं शर्वं वृषं शूलं पिनाकिं कृत्तिवाससम् ।। १७ ।।

कैलासकूटप्रतिमं वृषभेऽवस्थितं शिवम् ।
निरीक्षमाणं सततं पितृराजाश्रितां दिशम् ।
एवमीदृशकं स्वप्नं द्रक्ष्यसि त्वं विशाम्पते ।। १८ ।।

मा तत्कृते ह्यनुध्याहि कालो हि दुरतिक्रमः ।। १९ ।।

स्वस्ति तेऽस्तु गमिष्यामि कैलासं पर्वतं प्रति ।
अप्रमत्तः स्थितो दान्तः पृथिवीं परिपालय ।। २० ।।

(इत आरभ्याध्यायसमाप्तिपर्यन्तः पाठः क्वचित्कोशेषु नास्ति ।)

गते पितामहे राजा चिन्ताशोकसमन्वितः ।(०१)
निःश्वसन्नुष्णमसकृत्तमेवार्थं विचिन्तयन् ।।
कथं तु दैवं शक्येत पौरुषेण प्रबाधितुम् ।
अवश्यमेव भविता यदुक्तं परमर्षिणा ।।
ततोऽब्रवीन्महातेजाः सर्वान्भ्रातन्युधिष्ठिरः ।
श्रुतं वै पुरुषव्याघ्रा यन्मां द्वैपायनोऽब्रवीत् ।।
तदा तद्वचनं श्रुत्वा मरणे निश्चिता मतिः ।
सर्वक्षत्रस्य निधने यद्यहं हेतुरीप्सितः ।।

---

(०१)

कालेन निर्मितस्तात को ममार्थोऽस्ति जीवतः ।
एवं ब्रुवन्तं राजानं फाल्गुनः प्रत्यभाषत ।।
मा राजन्कश्मलं घोरं प्रविशो बुद्धिनाशनम् ।
सम्प्रधार्य महाराज यत्क्षेमं तत्समाचर ।।
ततोऽब्रवीत्सत्यधृतिर्भ्रातॄन्सर्वान्युधिष्ठिरः ।
द्वैपायनस्य वचनं ह्येवं समनुचिन्तयन् ।।
अद्यप्रभृति भद्रं वः प्रतिज्ञां मे निबोधत ।
त्रयोदश समास्तात को ममार्थोऽस्ति जीवतः ।।
न प्रवक्ष्यामि पुरुषं भ्रातॄनन्यांश्च पार्थिवान् ।
स्थितो निदेशे ज्ञातीनां योक्ष्ये तत्समुदाहरन् ।।
एवं मे वर्तमानस्य स्वसुतेष्वितरेषु च ।
भेदो न भविता लोके भेदमूलो हि विग्रहः ।।
विग्रहं दूरतो रक्षन्प्रियाण्येव समाचरन् ।
वाच्यतां न गमिष्यामि लोकेषु मनुजर्षभाः ।।
भ्रातुर्ज्येष्ठस्य वचनं पाण्डवाः सन्निशम्य तत् ।
तमेव समवर्तन्त धर्मराजहिते रताः ।।
संसत्सु समयं कृत्वा धर्मराड्भ्रातृभिः सह ।
पितंस्तर्प्य यथान्यायं देवताश्च विशाम्पते ।।
कृतमङ्गलकल्याणो भ्रातृभिः परिवारितः ।
गतेषु क्षत्रियेन्द्रेषु सर्वेषु भरतर्षभ ।।
युधिष्ठिरः सहामात्यः प्रविवेश पुरोत्तमम् ।
दुर्योधनो महाराज शकुनिश्चापि सौबलः ।

सभायां रमणीयायां तत्रैवास्ते नराधिप ।।

वैशम्पायनः -

एवमुक्त्वा स भगवान्कैलासं पर्वतं ययौ ।
कृष्णद्वैपायनो व्यासः सह शिष्यैः श्रुतानुगैः ।। २१ ।।

अस्मिन् पर्वणि ४९ अध्याये २१ श्लोकाः सन्ति

**द्यूतपर्वणि(१) प्रथमोऽध्यायः**

**इति श्रीमहाभारते सभापर्वणि द्यूतपर्वणि एकोनपञ्चाशोऽध्यायः ।। ४९ ।।**

# ५०.पञ्चाशोऽध्यायः

श्रीमन्महाभारततात्पर्यनिर्णये एकविंशाध्याये

विशेषतो जनार्दनः सभार्यको जगत्प्रभुः ।
यथा दिवौकसां सदस्यनन्तसद्गुणार्णवः ।।२६४।।
उपासिरे च तं नृपाः समस्तशः सुहृद्गणाः ।
तदाऽऽजगाम खड्गभृत् सहानुजः सुयोधनः ।।२६५।।
द्वारं सभाया हरिनीलरश्मिव्यूढं
त्वजानन् स विहाय भित्तिम् ।
अभ्यन्तराणां दृशिनोऽविघातिनीं
संस्फाटिकामाशु दृढं चुचुम्बे ।।२६६।।
प्रवेशयेतां च यमौ तमाशु
सभां भुजौ गृह्य नृपोपदिष्टौ ।
तत्रोपविष्टः क्षणमन्यतोऽगाद-

मृष्यमाणः श्रियमेषु दिव्याम् ।।२६७।।
तत्रेन्द्रनीलभुवि रत्नमयानि दृष्ट्वा
पद्मानि नीरमनसा जगृहे स्ववस्त्रम् ।
रत्नोरुदीधितिनिगूढजलं स्थलं च
मत्वा पपात सहितोऽवरजैर्जलौघे ।।२६८।।

तं प्राहसद् भगवता क्षितिभारनाश-
हेतोः सुसूचित उरुस्वरतोऽत्र भीमः ।
पाञ्चालराजसुतया च समं तथाऽन्यैः
स्वीयैस्तथाऽनु जहसुर्भगवन्महिष्यः ।।२६९।।
मन्दस्मितेन विलसद्वदनेन्दुबिम्बो
नारायणस्तु मुखमीक्ष्य मरुत्सुतस्य ।
नोवाच किञ्चिदथ धर्मसुतो निवार्य
प्रास्थापयद् वसनमाल्यविलेपनानि ।।२७०।।
कृष्णावृकोदरगतं बहुलं निधाय
क्रोधं ययौ सशकुनिर्धृतराष्ट्रपुत्रः ।
सुव्रीडितो नृपतिदत्तवराम्बरादीन्
न्यक्कृत्य मार्गगत आह स मातुलं स्वम् ।।२७१।।
यौ मामहसतां कृष्णाभीमौ कृष्णस्य सन्निधौ ।
तयोरकृत्वा सन्तापं नाहं जीवितुमुत्सहे ।।२७२।।
यदि मे शक्तिरत्र स्याद् घातयेयं वृकोदरम् ।
अग्रपूजां च कृष्णस्य विलुम्पेयं न संशयः ।।२७३।।
ईदृशं पाण्डवैश्वर्यं दृष्ट्वा को नाम जीवितम् ।
इच्छेत करदा येषां वैश्यवत् सर्वभूमिपाः ।।२७४।।
इत्युक्तः शकुनिर्वैरं दृढीकर्तुं वचोऽब्रवीत् ।

किं ते वैरेण राजेन्द्र बलिभिर्भ्रातृभिः पुनः ।।२७५।।
अनुजीवस्व तान् वीरान् गुणज्येष्ठान् बलाधिकान् ।
इतीरितोऽतिसंवृद्धकोप आह सुयोधनः ।।२७६।।
यदि तेषां तदैश्वर्यं न मां गच्छेदशेषतः ।
सर्वथा नैव जीवेयमिति सत्यं ब्रवीमि ते ।।२७७।।
न च बाहुबलाच्छक्ष्य आदातुं तां श्रियं क्वचित् ।
नेन्द्रोऽपि समरे शक्तस्तान् जेतुं किमु मानुषाः ।।२७८।।

## 02- 06- 50

युधिष्ठिरसभायां दुर्योधने निर्जलदेशे जलभ्रमेण परिधानमुत्कर्षति सति तथा सजलदेशे स्थलभ्रान्त्या अनवधानगमनेन जले पतति च । सति भीमादिभीरुपहासः ।। १ ।। चिन्तातान्तं दुर्योधनं प्रति शकुनिना चिन्ताहेतुप्रश्ने दुर्योधनेन तत्कथनपूर्वकं धृतराष्ट्रे स्वदुःखनिवेदनाय शकुनिं प्रति चोदनम् ।। २ ।। शकुनिना दुर्योधनं प्रति पाण्डवानां पौरुषेण अजय्यत्वकथनपूर्वकं द्यूतेन जेष्यामीति समाश्वासनादिकम् ।। ३ ।।

वैशम्पायनः -

वसन्दुर्योधनस्तस्यां सभायां पुरुषर्षभ ।
शनैर्ददर्श तां सर्वां सभां शकुनिना सह ।। १ ।।(०१)

तस्यां दिव्यानभिप्रायान्ददर्श कुरुनन्दनः ।
न दृष्टपूर्वा ये तेन नगरे नागसाह्वये ।। २ ।।(०२)

स कदाचित्सभामध्ये धार्तराष्ट्रो महीपतिः ।

तत्र स्फाटिकतोयां वै स्फाटिकाम्बुजशोभिताम् ।

(०१) (१) परं वसुं, स च (forवसन्), तत्र (forतस्यां), (२)पुरुषर्षभः तु नरर्षभ, (३)दिव्यां (forसर्वां), (४)सशकुनि,(forशकुनिना),.

(०२) (२)कुरुनन्दन, अपश्यतत (श्यंस्त)त्र तत्र ह), (३)अ (forन), हष्टपूर्व, सा येन, एतेन,सा तेन (forये तेन), न बष्टापूर्वा या तेन, अद्रश्यपूर्वा यैते च, हष्टं पूर्वमेतेन, प्र (न) हष्टापूर्वानेतेन, अहष्टपूर्वामेतेन,.

वार्पीं मत्वा स्थलमिव सवासाः प्रापतज्जले ।।(०१)

लक्षालङ्कारः- तत्र स्फाटिकतोयाम् इत्यत्र स्फाटिकवच्छोभमानशुभजलाम्, स्फाटिकवच्छोभमानशुभ्राम्बुजयुक्ताम् ।

स्फाटिकं स्थलमासाद्य जलमित्यभिशङ्कया ।।
सभां पुष्करिर्णीं मत्वा सहसा प्रापतज्जते ।। ३ ।।(०२)
स्ववस्त्रोत्कर्षणं राजा कृतवान्बुद्धिमोहितः ।
दुर्मना विमुखश्चैव परिचक्राम तां सभाम् ।।
तत्राप्येनं जनो हृष्टा जहसुः पाण्डवास्तदा ।(०३)
निःश्वसन्विमुखश्चापि परिचक्राम तां सभाम् ।।

जले निपतितं दृष्ट्वा भीमसेनो महाबलः ।
जहास जहसुश्चैव किङ्कराश्च सुयोधनम् ।(04)
वासांसि च शुभान्यस्मै प्रददू राजशासनात् ।। ४ ।।(०५)

तत्रैव द्रौपदी राजन्भीमसेनश्च पाण्डवः ।
तथागतं तु तं दृष्ट्वा भीमसेनो महाबलः ।
अर्जुनश्च यमौ चोभौ सर्वे ते प्राहसंस्तदा ।। ५ ।।(०६)

---

(०१) (१) समातो (ता) यादवैः, सवैः, (तत्र त्रीततः) (२)सन्वितां, शोभनां), (३)वापि, गत्वा (for मत्वा), स्थलमिव, सभां (समां) पुष्करिणिं मत्वा (हष्द्वा), (४)सहसा (for सवासाः), प्रपतज्,.

(०२) (३)स्फाठिकं,स्फाठिकांक, स्थलं, तलं(भ्तलं), (१) वस्त्रोत्कर्षणं, वस्त्रस्योत्क, स्ववस्त्राक, स्ववस्त्रात्क, राजन् (forराजा), .

(०३) (१) तत्र चैनं, तत्र ह्येनं, तदा, जना (forजनो), जहासैवममर्षितं (तः) दुर्मखः,
(३)दुर्मखः, दुर्मनाः चापि (forचैव), निक्षसनिविमुखश्चापि, (१) ततः स्थले निपतितो दुर्मना व्रीडितो नृपः । (निश्वासनिविमुखशश्चापि),.

(०४) (४)प्रददौ,प्रययू, राज्यशासनात्,.(३)तु (forच),शुभान्यस्य, तस्य चान्यानि वासांसि),

(०५) (१) जलेभिपतितं, निपतंतं पतिं हष्द्वा), (२)प्रहसुर, भीमसेनो महाबलः,.

(०६) (१) तदु (for तं) तत्रैव (नं) द्रौपदी राजन्, (२)भीमसेनश्च पाण्डवः,
(३)चैव (for चोभौ), स(४)प्रहसंस्, तथा, हष्टा चाप (व) हसंस्तदा,.

ततोन्यस्मिन्सभोद्देशे पुनर्दुर्योधनो नृपः ।
सस्फाटिकं तलमासाद्य जलमित्यभिशङ्कया ।। ६ ।।(०१)

नामर्षयत्ततस्तेषामवहासममर्षणः ।

आकारं रक्षमाणस्तु न स तान्समुदैक्षत ।(०२)

प्रविशन्नाहतो मूर्ध्नि व्याघूर्णित इव स्थितः ।(०३)

विघट्टयन्कराभ्यां तु निष्क्रम्याग्रे पपात ह ।(०४)

तद्वत्तं चेति मन्वानो द्वारस्थानादुपारमत् ।(०५)

स्ववस्त्रोत्कर्षणं राजा कृतवान्बुद्धिमोहितः ।

तत्राप्येतं जनो दृष्ट्वा जहसुः पाण्डवास्तदा ।। ७ ।।

वलभीं विकृताकारां ललाटेन समाहनत् ।

संवृतं चेति मन्वानो द्वारदेशादपागमत् ।। ८ ।।

पुनर्वसनमुत्क्षिप्य प्रतरिष्यन्निव स्थलम् ।
आरुरोह ततः सर्वे जहसुश्च पुनर्जनाः ।। ९ ।।(०६)

---

(०१) (सभादेशे, नृप),.
(०२) (१) नामर्षयस्, नामर्षय, नामर्षयंस्, न मर्षयत्, नामर्षयत्, ततः, तत्र (forततस्),.
(२)सोपहासममर्षितः, अपहासममर्षणात् (र्षणः), (३)आकारं गूहमानस्तु, रक्षन्नाकारमत्यर्थ (मात्मस्थं), रक्षणाकारमात्रस्थं), (४)समुदीक्षत, समवैक्षत, समन्तास्तमवै (चे) क्षत,
(०३) (पं:२),प्राविशन्,व्याधूर्णत, स्थलः (for स्थित), तादृशं च परं द्वारं स्फाटिकोरुकपाटकम् ।
(पं:३),तादृक्षं च परं, तातृशं चापरं, तहत्तम, तद्धृत्तम, तादृक्षमपर, रुकपाटिकं,.
(०४) (पं:४),विधट्टयत्, निश्क्रास्याग्रे), द्वारं तु वितताकारं समापेदे पुनश्च सः ।.
(०५) (१) द्धारं तु, विलंच,वेलेव, बिसे च, वळभिं, द्धारं तु (विलं च, स्थलं च, द्धारं च) वितताकारं,विलं च वृ (वि)तता, वळभीं विकृताकारां, द्धारां चापि कृताकारं बळभी विकृताकारा),
(२)समाहरत्,समापेदे पुनश्च सः (श्च ह), (३)संहतं, संहते, संवृत्तं, संवृतश्, तद्धत्तं, देश, देशं (forचेति),तद्धत्तं चापि मन्वानो,
(४)द्धारस्थानाद्, विनिर्गमन् (त्), अपागमत्, निर्गमन्, द्धारदाश (स्थान) मुपागमत्, स्थानादुपागामत्,.
(०६) (१) उत्क्षेप्य, स पुनर्वस्नमु), (२)प्रपतिष्यन्, प्रतरिष्यति वत्सलं,प्रतरिष्यंतिव स्थलं,

ततो नामर्षयत्तेषा सोऽपहासममर्षितः ।
रक्षन्नाकारमत्यर्थं समन्तात्समवैक्षत ।। १० ।।

एव प्रलम्भान्विविधान्प्राप्य तत्र विशाम्पते ।
पाण्डवेयाभ्यनुज्ञातस्ततो दुर्योधनो नृपः ।। १२ ।।[०१]

लक्षालङ्कारः-प्रलम्भान् वञ्चनानि ।

न तुष्टो धर्मराजस्य यज्ञमासाद्य तं तदा ।[०२]
जगाम स्वगृहं त्वन्यदृते दुर्योधनो नृपः ।।[०३]

लक्षालङ्कारः-जगाम स्वगृहम् इत्यत्र स्वगृहमृते अन्यद्गृहं जगामेति सम्बन्धः ।

दृष्ट्वा यज्ञविभूतिं ता पाण्डवानां यशस्विनाम् ।[०४]
पश्यतो दुःखदूनस्य पापामतिरजायत ।। १३ ।।[०५]

अप्रहृष्टेन मनसा राजसूये महाक्रतौ ।
प्रेक्ष्य तामद्भुतामृद्धिं जगाम गजसाह्वयम् ।[०६]
पाण्डवश्रीप्रतप्तस्य ध्यायमानस्य गच्छतः ।
दुर्योधनस्य नृपतेः पापा मतिरजायत ।[०७]

---

(३)जनाः (forततः) सर्व, (४)जहसुश्च,सुस्तं, जहसुः, किंकरा (पांडवा )भृशं,
(४)द्वारं तु पिहिताकारं स्फाटिकं प्रेक्ष्य भूमिपः । (पंः१),च (forतु), विवृता (forपिहिता),.
(०१) (१) एतान् (forएवं),प्रलंबान्, प्रलंभा, प्रलंभानि (वंचनानि),
(३) पांडवायाभ्यनिज्ञातास्,यामनुज्ञातस्, पांडवैर्नाभ्य, पांडवेयान, पांडवैरभ्य,
(४) मूर्खो (forततो),नृपाः,जगाम नगरं प्रति,
(०२) (पंः१),न्तुष्टो, तंगृष्ट्वा,ननुष्ट्वा, तथा (for तदा), .
(०३) (पंः२),त्वन्यदृते, तिवन्यान्नते,त्वन्य क्रते, तूर्ण राजा, दुर्योधनं नृपं,धनान्नृप, धनस्तदा,.
(०४) (पंः३),मनस्विनां,जयेन करमागंत,.
(०५) (पंः४),दुःखशूलस्य, दुर्विनीतस्य, गच्छतो दुःखशीलस्य, दुःखेनाविष्टमनसः, पापबुद्धिर्),.
(०६) (१) अप्रध्ट (कृ) ष्णेन, अपकृष्टो न,अपह्यष्टेन, अपकृ), (२)राजसूय), वृद्धिं (forऋद्धिं),.
(०७) (२)ध्यनम्लानस्य, घ्यानं स्थानस्य, ध्याय (न)मानस्य, ध्याय (न) ग्लानस्य, पश्यतः (forगच्छ),

पार्थान् सुमनसो दृष्ट्वा पार्थिवांश्च वशानुगान् ।
लोकं च तद्गतं दृष्ट्वा विवर्णस्समजायत ।। १४ ।।

कृत्स्नं चापि हितं लोकमाकुमारं कुरूद्वह ।[०१]

महिमानं परं चापि पाण्डवानां महात्मनाम् ।

दुर्योधनो धार्तराष्ट्रो विवर्णः समपद्यत ।। १५ ।।[०२]

स तु गच्छन्ननेकाग्रः सभामेकोऽन्वचिन्तयत् ।
श्रियं च तामनुपमां धर्मराजस्य धीमतः ।। १६ ।।[०३]

लक्षालङ्कारः-स तु गच्छन् इत्यत्र अनेकाग्रः एकाग्रचित्तरहितः ।

प्रमत्तो धृतराष्ट्रस्य पुत्रो दुर्योधनस्तदा ।
नाभ्यभाषत्सुबलजं भाषमाणं पुनः पुनः ।। १७ ।।[०४]

अनेकाग्रं तु तं दृष्ट्वा शकुनिः प्रत्यभाषत ।

शकुनिः-

दुर्योधन कुतोमूलं निःश्वसन्निव गच्छसि ।। १८ ।।[०५]

दुर्योधनः-

**देवर्षियक्षगन्धर्वाः तत्रागच्छन्ति नित्यशः ।**

---

(४) पापे,पाप०,.

(०१) (१) पार्थिवान्सुमनसो हष्द्वा), (२)तु (forच), (३)वापि,धृतं,धृति, तथा, ततो,तदा (forहितं),लोकं च तद्रतं हष्द्वा),विवर्णः समजायत, (४)विवर्णः (षर्ण्णः) समपद्यत,.

(०२) (१) अभिमानं (forमहि),परित्रापि, परित्यज्य,स पंचानां, मदं चापि (forपरं चापि),
(२) दृष्ट्वा तेषां यश (मन) स्विनां), (३)पापबुद्धिः (for धार्त),
(४)निर्विण्णः सम, परितप्यत मन्युना, पर्यतप्यत मन्युना (न्युमान्),.

(०३) (१) सानुगच्छन्), (२)सभामेवान्वच्चिंतयत् (न्), सभामेकोन्वच्चिंतयत् (न्), सभा तामनुचिंतयन्,.

(०४) (१) प्रमूढो, प्रतप्तो, (२)तथा, (३)नाभ्यलिनं, सुबहुशो, सुबलजां,
स नाभ्यभाषत्सुबलं, नाभापत्सुबलजं), (४) क- भाषमाणः भाप्यमाणः (णं), .

(०५) (१) तं च (तु) दुर्मनसं हष्द्वा,(२)क- गच्छसि । (४)कुतो नूनं, निश्रसन्, गच्छति, तिष्टसि,.

देवर्षियक्षगन्धर्वास् तक्षागच्छन्ति नित्यशः ।। १९ ।।[०१]

कृष्णस्तु दुर्मनास्तेषा विवर्धयति सम्पदः ।[०२]
आतुरास्तत्र नीयन्ते व्यवहारवचोऽधिकाः ।। २० ।।[०३]

गजाना तत्र गच्छन्ति विक्रेतारो महाप्रभाः ।[०४]
श्वरोष्ट्राश्वाजखड्गानां विक्रेतारस्तथा नृपाः ।। २१ ।।[०५]

लोकेऽस्मिन्कौरवश्शब्दः तत्रैव परिवर्तते ।
हरिप्रस्थपुरद्वारं सदा तु निबिडीकृतम् ।। २२ ।।
रथहस्त्यश्वयानाना रोहणेन सुदारुणम् ।।[०६]

दुर्योधन

दृष्ट्वेमां पृथिवीं कृत्स्नां युधिष्ठिरवशानुगाम् ।
जितामस्त्रप्रतापेन श्वेताश्वस्य महात्मनः ।। २३ ।।[०७]

तं च यज्ञं तथाभूतं दृष्ट्वा पार्थस्य मातल ।
यथा शक्रस्य देवेषु तथाभूत महाद्युतेः ।। २४ ।।[०८]

अमर्षेण तु सम्पूर्णो दह्यमानो दिवानिशम् ।

---

(०१) (पं:१),गच्छन्ति (आ).

(०२) (पं:२),संपदा,.

(०३) (पं:३),अक्रूरास्तत्र निधने वियवहाराश्र भौतिकाः,.

(०४) (पं:४),गजनां (forदन्धानां),तत्र (for नात्र), प्रभां (for प्रभाः), .

(०५) (पं:५),खरोष्ट्राणां च खड्गनां,नृप.

(०६) (पं:८),सदारुणां (forसदा नृणाम्), रोहणं तत्र चैव मे),.

(०७) (१) सर्वा (for कृत्स्नां),
(२)क-रोहणं तत्र मातुल । निध्नलोऽरिं प्रतापेन श्वेताश्वस्य महात्मनः । युधिष्टिरवशे स्थि(प्सि)तां,जितम्,शस्त्रप्रतोपेन, अस्त्रप्रभावेन,, निध्नतोरून्प्र),च धीमतः (च मातुलः) (for महात्मनः),.

(०८) (१) यथाभूतं, तथारुपं, तं तु यज्ञं तथा वृत्तं), (२)पार्थिव (for पार्थस्य), मातुलं,लः), (३)शास्त्रस्य (for शक्र), देवानां (forदेवेषु), (४)यथाभूतं, तथा पूतं, भूत, द्युतेः,मुने, ईश्ररस्य तथाविधं (धः),.

शुचिशुक्रागमे काले शुष्येत्तोयमिवाल्पकम्     ।। २५ ।।[०१]

पश्य सात्वतमुख्येन शिशुपालो निपातितः ।
न च तत्र पुमानासीत्कश्चित्तस्य पदानुगः     ।। २६ ।।[०२]

**दह्यमाना हि राजानः पाण्डवोत्थेन वह्निना ।**
क्षान्तं ततोऽपराधं ते कर्तुं को हि नार्हसि     ।। २७ ।।[०३]

लक्षालङ्कारः-क्षान्तं ततोऽपराधम् इत्यत्र ततः कारणात् क्षोभितं तं चैद्यवधाख्यमपराधं क्षान्तं क्षमाविषयं कर्तुं नार्हसि ।

वासुदेवेन तत्कर्म यथायुक्तं महत्कृतम् ।
सिद्धं च पाण्डुपुत्राणां प्रतापेन महात्मनाम्     ।। २८ ।।[०४]

तथा हि रत्नान्यादाय विविधानि नृपा नृपम् ।
उपातिष्ठन्त कौन्तेयं वैश्या इव करप्रदाः     ।। २९ ।।[०५]

श्रियं तथाऽऽगतां दृष्ट्वा ज्वलन्तीमिव पाण्डवे ।
अमर्षवशमापन्नो दह्यामि न तथोचितः     ।। ३० ।।[०६]

---

(०१) (१) तु संपूर्णो,स सं, सुसंपूर्ण), (२)दह्यामूशोन्, दह्यमानं) (३)राजन्, तात, शुष्ये (forकाले (forकाले), शुक्रागते तात, शुष्यते हृदयं मेद्य), (४)शुष्यत्, शुष्येत्, राजंस्, ग्रीष्मे, ग्रीष्म (for शुष्ये),.

(०२) (१) दुर्योधनः),पश्यन्,पश्यमानत्वमु), (२)पालो,तित),
(४)कश्चिदासीत्, दस्य, दत्र, त्तत्र, वशानुगः,.

(०३)२३, (१) दह्यमानं, महेष्वासा (for हि राजानः), दह्यमानं, दह्यमानमहेष्वासा,दह्यमानो महेष्वास), (२)पांडवोनुन, अध्वरे पांडवाग्निना), (३)क्षतवन्तो,क्षात्र, क्षांतं ततो, ते,तो,तु (forतं) (४)तत् (forतं) तं क्षं (तत्क्षं) तुमर्हसि, तत्कर्तुमर्हसि,.

(०४) २४, (१) यत् (for तत्), (२)यथायुक्तं (द्धं), (तथानुचितं), अयुक्तमिति छेद, महाकृतं), (३)सिद्धिं च, सिद्धिश्च, पाण्डुपुत्राणां,.

(०५)२५, (१) यथा हि, कथं हि, धनानि (forतथा हि), तथा (२)भृशं,नृप, नराधिपा, महानृपाः), (३)उपा (प)तिष्टन्त, उपा (अप) तिष्टन्ति,.

(०६) २६, (१) तथागतां, तां तथा ज्वलितां हष्द्वा), (२)ज्वलंतम्, श्रियं मातुल पांडवे),. (३)वश्यम्), (४)दह्येयम् (forदह्ये-हम्), दह्यामि न (दह्येमेह, दह्येहं च, पश्यामि न) तथोचितः (ताः), दह्येम

After Sl. 26, N ins.:

४२७.एवं स निश्चयं कृत्वा ततो वचनमब्रवीत् ।(०१)
पुनर्गान्धारनृपतिं दह्यमान इवाग्निना ।(०२)

वह्निमेव प्रवेक्ष्यामि भक्षयिष्यामि वा विषम् ।
अपो वापि प्रवेक्ष्यामि न हि शक्ष्यामि जीवितुम् ॥ ३१ ॥(०३)

को हि नाम पुमांल्लोके मर्षयिष्यति सत्त्ववान् ।
सपत्नानृद्ध्यतो दृष्ट्वा हीनमात्मानमेव च ॥ ३२ ॥(०४)

सोऽहं नास्मि न नाप्यस्मि न स्त्री न च पुनः पुमान् ।
योऽहं तां मर्षयाम्यद्य तादृशीं श्रियमागताम् ॥ ३३ ॥(०५)

ईश्वरत्वं पृथिव्याश्च वसुमत्तां च तादृशीम् ।
यज्ञं च तादृशं दृष्ट्वा मादृशः को न सञ्ज्वरेत् ॥ ३४ ॥(०६)

---

तथो,दह्यमानस्तथो, दह्येयमतथोचितं,
(०१) वैशं, (पं:१) पुनार् (for ततो).
(०२) (पं:२),नृपते, पुनर्भरतशर्दूल (लो), ततो नृपतिर्दूल,.
(०३)२७,दुर्योधन उ), (१) सोहमग्निं (forवह्निमेव), प्रवक्ष्यामि, प्रवि), (२)चामिषं (forवा विषम्), (३)आपो वापि (वा वि), अप्सु वा सं, अपो वाथ, कूपो वापि, अपो वा सं, प्रवक्ष्यामि), (४)शक्यामि,.
(०४) (१) पुमाॅल्लोको, तथा लोके), (२)मानवान्, शक्तिमान् (forसत्ववान्), मर्षयेत तथागतान् (यिष्यामि सारवान्)

(३)क- सपत्रान् विषये युक्तान् दृष्ट्वातेषु च तां श्रियम् ।संपन्नान् (ऽ. सपत्रान्). ऋद्धितो, ऋद्धतो. सपत्रा वृध्यतो दृष्वा, सपत्रान्विषये युक्तान्, (४)आत्मान, आत्मानम् (ऽ. आत्मन) हीन (हनि) मात्मानमेव च, दृष्वा तेषु च तां श्रियंऽ
(०५) (१) (२)स्त्रीणां (for स्त्री न ), सोहं नास्मि न नाद्यस्मि (चाप्यस्ति), सोहं नास्ति न चा (वा) प्यस्ति, (३)सोहं (नाहं) नास्मि न नाप्यस्मि, सोहं ना (सोहम) स्मि न चाप्यस्मि, न, नस्त्री न च पुनः पुमान्, सोहं, तन् (तां) योर्प्हत्वां (forयो-हं तां), मर्षयिष्यमि), (४)ताहशां, श्रियमीयतां, मीश्रितां, श्रियं तस्मिन्नशक्तितः,.
(०६) (१) पृथिव्यां च, (२)वसुमंतां, मत्ताश्र), (३)यज्ञस्य, ताहशीं),
(४)मादृशं, साहशः,माहशी, को नु (forको न), संज्वंलेत्, सजरेत्, संज्वरः,.

अशक्तश्चैक एवाहं तामाहर्तुं नृपश्रियम् ।
सहायांश्च न पश्यामि तेन मृत्युं विचिन्तये ।। ३५ ।।(०१)

दैवमेव परं मन्ये पौरुषं च निरर्थकम् ।
दृष्ट्वा कुन्तीसुते शुद्धां श्रियं तामहतां तथा ।। ३६ ।।(०२)

कृतो यत्नो मया पूर्वं विनाशे तस्य सौबल ।
तच्च सर्वमतिक्रम्य संवृद्धोऽप्स्विव पङ्कजम् ।। ३७ ।।(०३)

तेन दैवं परं मन्ये पौरुषं च निरर्थकम् ।
धार्तराष्ट्राश्च हीयन्ते पार्था वर्धन्ति नित्यशः ।। ३८ ।।(०४)

सोऽहं श्रियं च तां दृष्ट्वा सभां तां च तथाविधाम् ।
रक्षिभिश्चावहासं तं परितप्ये यथाग्निना ।। ३९ ।।(०५)

स मामभ्यनुजानीहि मातुलाद्य सुदुःखितम् ।
अमर्षं च समाविष्टं धृतराष्ट्रे निवेदय ।। ४० ।।(०६)

---

(०१) (१) चैव, त्वेक (forचैक), (२)ततः (forनृप), (३)सहायं च,
(४)क- तेन म मृत्युं विचिन्तये ।। विचिंतयन्, अचिन्तयं,.

(०२) (२)च (for तु), (३)पाण्डुसुते, कुंति, श्रुत्वा, शुद्धां,शुद्धां, (४)तान् (forताम्), आहतां, महतीं, उत्तमां, अहतां, आहृतं (forआहृतां),तथा, नयात् (for तथा),.

(०३) (१) कृते यत्रे,कृतयज्ञो), (२)वै मया, सौबले,सौबलः), (३)तं च (for तच्च),.(४)संवृद्धोप्स्विव, समृद्धो, समृद्धा, समृद्धोपि च, प्रवृद्धोप्स्विव, पंकजः, सुवुद्धोप्स्विव पंकजः, संवृद्धोप्स्विव पंकजः (ज), समृद्धास्तं च प्रत्यबं, सवृद्धोपि च पंकजं,

(०४) (१) दैवमेव (for तेन दैवं), देवं, दैव,देवे), (२)च (for तु), (३)धार्तराष्ट्रो, तु, च, प्र (for हि), दीर्यते, क्षीयंते), (४)सर्वशः, वर्धते चापि पाण्डवाः, वर्धते पाण्डवाश्च ते,.

(०५) (१) नाहं (for सो-हं), तथा (for च तां), द्रष्ट्वं (for हष्द्वा), (२)चैव (for तां च),.(३)स्वावहासं, चापं,तत् च (forतं),

(०६) (१) सभाम्,तं माम्,स मामप्यनु, (३)ममापीयं, ममिीमं, ममापीदं, ममाविष्टं,ममेदं त्वं (for समाविष्टं), अमर्षवशमाधिष्टं, अमर्षानलसंदग्धं, अमर्षणं ममापीदं, अमर्षवशमापन्नं),
(४)धार्तराष्ट्रे, धृतराष्ट्रं, निवेदयन्, दुर्योधनसंताप, दुर्योधलवाक्यं, दुर्योधनमन्युवाक्यं, दुर्योधन,

शकुनिरुवाच

दुर्योधन न तेऽमर्षः कार्यः प्रति युधिष्ठिरम् ।
भागधेयानि हि स्वानि पाण्डवा भुञ्जते सदा ।। ४१ ।।(०१)

तथाऽप्युपायैर्बहुभिः समारब्धास्त्वयाऽसकृत् ।
विधानं विविधाकारं परं तेषां विधानतः ।। ४२ ।।

अनेकैरभ्युपायैश्च त्वया न शकिताः पुरा ।
विमुक्ताश्च नरव्याघ्रा भागधेयपुरस्कृताः ।(०२)

तैर्लब्धा द्रौपदी भार्या द्रुपदश्च सुतैः सह ।
सहायः पृथिवीलाभे वासुदेवश्च वीर्यवान् ।। ४३ ।।(०३)

अजितः सोऽपि सर्वैर्हि सदेवासुरमानुषैः ।
तत्तेजसा प्रवृद्धोऽसौ तत्र का परिदेवना ।। ४४ ।।

लब्धश्चानभिभूतार्थैः पित्र्योंऽशः पृथिवीपते ।
विवृद्धस्तेजसा तेषां तत्र का परिदेवना ।। ४५ ।।(०४)

धनञ्जयेन गाण्डीवमक्षय्यौ च महेषुधी ।

---

दुर्योधनावहासः, दुर्योधनासूयावचनं (वर्णनं),दुर्योधनामर्षणं,

(०१) (१) कुतो,नतो (forन ते),मर्ष, (२)कार्य,युधि (for प्रति), (३) यस्यानि, यत्स्वानि, राज्यानि (for हि स्वानि), (४)नृप (for सदा), पांडवः (वाः) समुपाश्नु (ग)ते,.

(०२) (१) अपि (for अभि), ते (for च), तथाप्यु (ह्यु, भ्यु) पायैर्बबुभिः), (२)क्रिया लब्धा (for त्वयारब्धाः) त्वया ,पुरा, त्वया न शकिताः (नाशयितुं) पुरा,समिरब्धा (ब्ध) स्त्वयासकृत्, ४२९ आरब्धाश्च महाराज पुनः पुनररिन्दम । ४३०,उत्साहवन्तः पुरुषा नावसीदन्ति कर्मसु । (३)नरव्याघ्र, महाभागा,.

(०३) (१) चापि (forभार्या), (२)दुपदैश्र, दस्य, सहात्मजैः, सुतः सह), (३)सहायाः, सभायां (for सहायः), पृथिवीलंभे, पाला (पाल) लाभे, (४)वासुदावस्य,.

(०४) (१) (अ)नभिभूतार्थः (थैंः), भूयामर्थो वै,प्रभूतो (ता) र्थ, (ए) तै, प्रभूतोर्थः (थैंः), लब्धाश्र नाभिभूतार्थाः), (२)पित्र्यंशं (शः), पित्र्यंशः,महीपते (for पृथिवी), पित्र्यः, शश्रन्महीयते), (३)विवृद्धास्, विवृद्धिस्, प्रवृद्ध (द्धा) स्, ते तु,तेन (for तेषां), (४)परिवेदना.

लब्धान्यस्त्राणि दिव्यानि तोषयित्वा हुताशनम् ।। ४६ ।।(०१)

तेन कार्मुकमुख्येन बाहुवीर्येण चात्मनः ।
कृता वशे महीपालास्तत्र का परिदेवना ।। ४७ ।।(०२)

दुर्योधनः

अग्निदाहान्मयं चापि मोक्षयित्वा स दानवम् ।
सभां तां कारयामास सव्यसाची परन्तपः ।। ४८ ।।(०३)

तेन चैव मयेनोक्ताः किङ्करा नाम राक्षसाः ।
वहन्ति तां सभां भीमास्तत्र का परिदेवना ।। ४९ ।।(०४)

यच्चासहायतां राजन्नुक्तवानसि भारत ।
तन्मिथ्या भ्रातरो हीमे तव सर्वे वशानुगाः ।। ५० ।।(०५)

**द्रोणस्तव महेष्वासः सह पुत्रेण वीर्यवान् ।**
सूतपुत्रश्च राधेयो गौतमश्च महारथः ।। ५१ ।।(०६)

**स एकस्समरे सर्वान्पाण्डवान्सहसोमकान् ।**

---

(०१) (१) गांजीवम्, पीवम्), (२)अक्षय्ये (ये) हि (forच),तथैषुधी), (३)चोग्रणि (for दिव्यानि), लब्धानि चोग्राण्यरत्राणि, (४)तोष (for तर्प),.

(०२) (१) कामुक,दांडीव (for कार्मुक), (३)ह्यता (forकृता), धर्मे, वश,वशा,वशं (forवशे), (४) अत्र,तात (forतत्र), परिवादना,.

(०३) (१) अथ (for अग्नि), वापि, चैव, देवं,नाम (for चापि),
(२)मोच,मोह (forमोक्ष), च (तु) (for स), (४)परंतप,.

(०४) (१) तेनैव च (forतेन चैव),तेनैव दत्ता तैत्येन),
(३)रस्यां, भीमां (forभीमास्), (४)तव (for तत्र), परिवेदना,.

(०५) (१),यथा, यश्च (forयच्च), मुक्तवानसि (पि) (forउक्त), सांनिध्या,
(३)तं विद्या (for तन्मिथ्या),हि मे, भीमे (forहीमे), सह्यान्मे, तत्र सर्वे (र्व) वशा (शे) नुगाः (महारथाः),.

(०६) (१) तत्र (forतव), (२)सहपुत्रक्ष, सपुत्रोभिहि, वीर्यवान्, भारत (for धीमता),
(३)तु (for च) (४)दृढ (ढं) मित्रो (धन्वा, मित्र, मित्रं) (for गौतमश्र),४३(२).

विजेष्यति महाबाहो किं सहायैः करिष्यसि ।। ५२ ।।[०१]

भीष्मश्च पुरुषव्याघ्रो गौतमश्च महारथः ।
जयद्रथश्च बलवान्कृतास्त्रो दृढधन्वकः ।। ५३ ।।[०२]

अहं च सह सोदर्यैः सौमदत्तिश्च पार्थिवः ।
एतैस्त्वं सहितः सर्वैर्जय कृत्स्नां वसुन्धराम् ।। ५४ ।।[०३]

त्वया च सहितो राजन्नेतैश्चान्यैर्महारथैः ।
एतानेव विजेष्यामि यदि त्वमनुमन्यसे ।। ५५ ।।[०४]

एतेषु विजितेष्वद्य भविष्यति मही मम ।
सर्वे च पृथिवीपालाः सभा सा च महाधना ।। ५६ ।।[०५]

धनञ्जयो वासुदेवो भीमसेनो युधिष्ठिरः ।
नकुलः सहदेवश्च द्रुपदश्च सहात्मजैः ।। ५७ ।।[०६]

नैते युधि पराजेतुं शक्या देवगणैरपि ।
महारथा महेष्वासाः कृतास्त्रा युद्धदुर्मदाः ।। ५८ ।।[०७]

---

(०१) (पं:२),बाहो (for बाहुः) करिष्यति (for सि).

(०२) (पं:४),दृढवान् (for बल), कृतास्त्रैर् (forस्त्रो), विक्रमः (forधन्वकः), कृतास्त्रा (स्त्रान्) दृढधन्विनः,.

(०३) (१) अयं (for अहं), सोदर्यः, सौदर्यः, सौदर्यैः, (२)सो (सौ) मदत्तश्च, सोमदत्तिश्च,सौमदत्तेश्च, पार्थिवः, तौरवः (व) (forवीर्यवान्), (३)एतैश्च, एभिस्त्वं, भ्रातृभिः (for एतैस्त्वं),सहितैः (for तः), सर्वे), (४)जयेः, जये,जयेत् (for जय), सर्वा, सर्वान् (for कृत्स्नां),.

(०४) (१) यया (for त्वया), (अ)हं (forच), (२)सर्वैर् (for चान्यैर्), बलैः (for रथैः),.(३)एतान्येव, एतानहं, वधिष्यामि,च जे (forविजे),

(०५) (१) हि जिते,विदिते (forविजिते), (२)तव (तथा) (for मम) (३)स्पर्धे (for सर्वे), (४)सा सभा, सानुजा, महाधनाः, सभा च सुमहाधना, सा सभाश्च महाधनाः, .

(०६) (१) (२)वासु ,भीम, (४)सहानुजैः, सहात्मजः,महात्मजैः,.

(०७) (१) युद्धे (for युधि),पराजेतुं (जंतु), नरा जेतुं (for बलाज्जेतुं), (२)शक्या, देव (for सुर), (३) महारथ महेष्वास), (४)युधदु, युधि दु (for युद्धदुं),.

अहं तु तद्विजानामि विजेतुं येन शक्यते ।
युधिष्ठिरं स्वयं राजंस्तन्निबोध जुषस्व च ।। ५९ ।।(०१)

After Sl.16, K4 ins.:

४३३. शकुनेर्वचनं श्रुत्वा कुरुराजस्तमब्रवीत् ।

दुर्योधनः

अप्रमादेन सुहृदामन्येषा च महात्मनाम् ।
यदि शक्या विजेतु ते तन्ममाचक्ष्व मातुल ।। ६० ।।(०२)

शकुनिः-

द्यूतप्रियश्च कौन्तेयो न स जानाति देवितुम् ।
समाहूतश्च राजेन्द्रो न शक्ष्यति निवर्तितुम् ।। ६१ ।।(०३)

After Sl.18, G(2) 4 ins.:

४३४,कपटे विजयं शक्यमन्यथा जेतुमक्षमः ।(०४)

देवने कुशलश्चाहं न मेऽस्ति सदृशो भुवि ।
त्रिषु लोकेषु कौरव्य तं त्वं द्यूते समाह्वय ।। ६२ ।।(०५)

---

(०१) (१) तद्वै (for तु तद्),तत्र जानामि (for तद्विजा), (२)जीवितुं (for विजे), नैव, वै व,यो न (for येन), शक्यसि,शक्ष्यति, शक्ष्यसि, शक्ष्यसे, सक्यते (for शक्यते),
(३)युधिष्टिरः, महाराजं, त्वयं राजन्, तु (तं) राजेंद्र (द्रं) (for स्वयं राजन्),
(४)क- धनेश्वर । क-नरेश्वर । यतस्व च, जयस्व च,वचो मम, नरेश्वर (रः), जनेश्वर,धनेश्वर (for जुषस्व च).

(०२) (१) अप्रणाशेन, हारेण (forमादेल),शत्रूणाम् (forसुहृदाम्), (२)महीक्षितां (forमहा), (३)यथा (for यदि),शक्यो (for शक्या), वदि शक्या रणे जेतुं,यदि (था) शक्या (क्ष्या) मि जेतु तान् (ते),यथा शक्ष्या (शको) मि जेतुं तान् (त्वां),यथा श (शि) क्ष्यसि तान् (तं) जेतुं), (४)तत्वमाचक्ष्व,सौबल (for मातुल),.

(०३) (२)द्यूते प्रियश्, तु (forच) (२)यो न (for न च), स (forच),वेदितुं, देवितुंः),.(३)समाहृतश्र, राजेन्द्र, राजेन्द्रे, कौतेयो, पार्थोत्र (for राजेद्रो), (४)प्रशस्यति, न शक्यति,शक्ष्येति न (for न शक्ष्यति),

(०४)(सह्यम् (शक्यम्).

(०५) (१) देवेन (forदेवने), कुशलं), (२)कुशलो,सहशे (for सपशो), पुमान्, युधि (for भुवि), (३)कौंतेय,कौुव्य) (४)तत् (for तं), वै (for त्वं), द्यूतं, द्यूतायेत्या (द्यूत एवा) ह्य एवा )ह्यग्र स्वयं),.

तस्याक्षकुशलो राजन्नादास्येऽहमसंशयम् ।
राज्यं श्रियं च तां दीप्तां त्वदर्थं पुरुषर्षभ ।। ६३ ।।(०१)

इदं तु सर्वं त्वं राज्ञे दुर्योधन निवेदय ।

अनुज्ञातस्तु ते पित्रा विजेष्ये तान्न संशयः ।। ६४ ।।(०२)

दुर्योधनः-

त्वमेव कुरुमुख्याय धृतराष्ट्राय सौबल।
निवेदय यथान्यायं नाहं शक्ष्ये निवेदितुम् ।। ६५ ।।(०३)

**अस्मिन्  पर्वणि ५० अध्याये ६५ श्लोकाः सन्ति**

**द्यूतापर्वणि(२) द्वितायोऽध्यायः**

**इति श्रीमहाभारते शतसाहस्रिकायां वैयासिक्यां संहितायां सभापर्वणि द्यूतपर्वणि दुर्योधनसन्तापे पञ्चाशोऽध्यायः ।। ५०।।**

# ५१.एकपञ्चाशोऽध्यायः

श्रीमन्महाभारततात्पर्यनिर्णये एकविंशाध्याये
इतीरितः पापतम आह गान्धारको नृपः ।

---

(०१)   (१) तथा (for तस्य), तस्या (क्ष),कुशालो राजन्, त (अ) स्याक्षकौ(कु)शलाद्रार्यम्,  (२)आपरिष्ये (आदास्ये), न संशयः (for असं), आदास्यामि न संशयः,  ३,भोग्यं (forराज्यं), श्रियश्र, प्राप्तां (forदीप्तां) तां श्रियं महतीं चापि), (४)त्वदर्थे, भरतर्षभ (भः),.

(०२)   (१) च, हि (forतु) त्वं राज्ञो, राज्ञे त्वं),  (२)निबोधय (for निवे),

(३)अनुज्ञातं, च (for तु),पित्रा ते,

(४)विजेश्यंतं,विजेश्यतम्, विजिष्ये तान्, विजेष्यामि (for विजेष्ये तं) तान् (for तं),नात्र (for तं न), अ (न) संशयं (forन संशयः).

(०३) (१) (२)कुरु,धृत, मातुल (for ,सौबल),  (३)कामं (for न्यायं)

(४)नायं (for नाहं), शक्ष्ये निवेदितुं, शक्येद्य (शक्ष्यामि शकोमि) शंसितुं,  शकोमि शंसितुं, शक्ष्येद्य संपितुः शक्ष्यामि शंसितुं,  शंसितुमुत्सहे,  द्धूत,द्यूतमंत्र,  दुर्योधनसंताप, जयोपायकथनं, शकुनिदुर्मंत्रितं,.

पापिनामखिलानां च प्रधानं चक्रवर्तिनाम् ।।२७९।।
यां यां श्रियं प्रदीप्तां त्वं पाण्डवेषु प्रपश्यसि ।
तामक्लेशत आदास्ये क्रीडन्नक्षैस्त्वदन्तिके ।।२८०।।
इतीरितः प्रसन्नधीः सुयोधनो बभूव ह ।
प्रजग्मतुश्च तावुभौ विचित्रवीर्यजं नृपम् ।।२८१।।
धृतराष्ट्रमथोवाच द्वापरांशोऽतिपापकृत् ।
नास्तिक्यरूपः शकुनिर्विवर्णं हरिणं कृशम् ।।२८२।।
दुर्योधनं तु तच्छ्रुत्वा कुत इत्याह दुर्मनाः ।
अब्रूतां तौ नृपायाऽऽशु द्वाभ्यां यन्मन्त्रितं पथि ।।२८३।।
श्रुत्वैव तन्नेत्यवदत् स भूपति-
र्विरोधि धर्मस्य विनाशकारणम् ।
कुमन्त्रितं वो न ममैतदिष्टं
स्वबाहुवीर्याप्तमहाश्रियो हि ते ।।२८४।।
त्वयाऽपि निर्जित्य दिशो मखाग्र्याः
कार्याः स्पृधो मा गुणवत्तमैस्तैः ।
विशेषतो भ्रातृभिरग्र्यपौरुषै-
रित्युक्त आहाऽऽशु सुयोधनस्तम् ।।२८५।।
यदि श्रियं पाण्डवानां नाक्षैराच्छेत्तुमिच्छसि ।
मृतमेवाद्य मां विद्धि पाण्डवैस्त्वं सुखी भव ।।२८६।।
यदि मज्जीवितार्थी त्वमानयाऽऽश्विह पाण्डवान् ।
सभार्यान् देवनायैव न चाधर्मोऽत्र कश्चन ।।२८७।।
वेदानुजीविनो विप्राः क्षत्रियाः शस्त्रजीविनः ।
त्रुट्यते येन शत्रुश्च तच्छस्त्रं नैव चेतरत् ।।२८८।।
अतः स्वधर्म एवायं तवापि स्यात् फलं महत् ।
इत्युक्तो मा फलं मेऽस्तु तवैवास्त्विति सोऽब्रवीत् ।।२८९।।

एवं ब्रुवन्नपि नृप आविष्टः कलिना स्वयम् ।
पुत्रस्नेहाच्च विदुरमादिशत् पाण्डवान् प्रति ।।२९०।।

## 02- 06- 51

शकुनिना दुर्योधनस्य चिन्तया कार्श्यादिकं बेधितेन धृतराष्ट्रेण दुयोज्ञधनं प्रति चिन्ताकारणप्रश्नः ।। १ ।। दुर्योधनेन तत्कथनपूर्वकं धृतराष्ट्रं प्रति द्यूताभ्यनुज्ञान-प्रार्थनम् ।। २ ।। धृतराष्ट्रेण द्यूतसभानिर्माणाज्ञापनपूर्वकं पाण्डवानयनाय विदुरं प्रति चोदनम् ।। ३ ।। धृतराष्ट्रेण पृष्टस्य दुर्योधनस्यात्मनश्चिन्ताप्रकाशनम् ।। ४ ।। द्यूतायोजनार्थम् आग्रहश्च ।। धृतराष्ट्रस्य विदुरायेन्द्रप्रस्थं गन्तुमादेशः ।।

वैशम्पायनः -

अनुभूय तु राज्ञस्तं राजसूयं महाक्रतुम् ।
युधिष्ठिरस्य नृपतेर्गान्धारीपुत्रसंयुतः ।। १ ।।(०१)

After 1, S (G6 om, lines 2-3) ins.: B-P.No.218

विवेश हास्तिनपुरं दुर्योधनमतेन सः ।
बाढमित्येव शकुनिः दृढं हृदि चकार ह ।। २ ।।

अस्वस्थतां च तां दृष्ट्वा धार्तराष्ट्रस्य पापकृत् ।
पापः पापात्मना तेन समेत्य पृथिवीक्षिता ।। ३ ।।

भरतानां च दुष्टात्मा क्षयाय हि नृपश्रियाम् ।(०२)
प्रियकृन्मतमाज्ञाय पूर्वं दुर्योधनस्य तत् ।। ४ ।।

---

(०१) (१) स (for तु),राजंस्तं, राज्ञस्त्वं, तं राज्ञो (राज्ञे), (२)सुदुर्मातिः (सहाक्रतुम्) (३)शकुनिर् (for नृपतेर्), (४)गांधारि, संयुतं, संमतः (for संयुत) दुर्योधनसमन्वितत्र, दुर्योधनवशे स्थितः (वशे स्थितं, सुसंहितः, सुसंगतः, हिते रतः),.

(०२) (पं:१) हस्तिनपुरं (पं:२) युधि (ऽ. हृदि). (पं:४) तदा (ऽ. पाप) (पं:५)क्षयायायान्नपक्षयंऽ

प्रज्ञाचक्षुषमासीनं शकुनिः सौबलस्तदा ।(०१)

वैशसं सर्वलोकस्य हृदि कृत्वा सुदुर्मतिः ।
दैवेन विधिना चैव चोदितः क्रूरकर्मकृत् ॥ ५ ॥

आत्मवैरं हृदीकृत्य सौबलानां पुरस्कृतम् ।(०२)

दुर्योधनवचः श्रुत्वा धृतराष्ट्रं जनाधिपम् ।

उपगम्य महाप्राज्ञं शकुनिर्वाक्यमब्रवीत् ॥ ६ ॥(०३)

शकुनिः-

दुर्योधनो महाराज विवर्णो हरिणः कृशः ।
दीनश्चिन्तापरश्चैव तं विद्धि मनुजाधिप ॥ ७ ॥(०४)

न वै परीक्षसे सम्यगसह्यं शत्रुसम्भवम् ।
ज्येष्ठपुत्रस्य हृच्छोक किमर्थं नावबुध्यसे ॥ ८ ॥(०५)

वैशम्पायनः -

एवमुक्तश्शकुनिना धृतराष्ट्रो जनेश्वरः ।
दुर्योधन समाहूय इद वचनमब्रवीत् ॥ ९ ॥

---

(०१) (१) अस्थाय (forअज्ञाय), .

(०२) (पं:१) वैशस्य विनाशं (ऽ. वैशसं) (४)तथा (ऽ. तदा)

(०३) (१) गांधारराजः शकुनिः (अत्मवैरं हृदि कृत्य), (२)नराधिपं, जनेश्वरं, जनाधिप,सौबलानां पुरस्कृतं), (३)उपागम्य, महाप्रज्ञं, प्राज्ञाः, त्मानं (for प्राज्ञं),जनेश्वरं तथा ह्यत्र), (४)शनकैर् (for शकुनिर्),.

(०४) (१) शकुनिरुवाच (शकुनिः), प्रज्ञ, प्रज्ञ (for राज), (२)निर्विण्णो, विकर्णो, विदुरः, हरिणः,कृताः (forकृशः),

(३)दीनं चिंताभि (हि) संतप्तं), (४)तं विद्धि् (अर्तोपि) (for तद्धिद्धि), मनुजाधिप(पः) (for भरत),.

(०५) ५,नैव, न वा, न त्वं (for न वै), परीक्ष्यसे),अस्य वै,अस्य त्वं (for असह्यं), शोकसंभवं, राजसत्तम (मा) (for शत्रुसं), श्रेष्ट (for ज्येष्ट), वै शौकं,शौचत्वं, हृच्छोकं, त्वं शोकं , शोकं तं,शोकं त्वा,ते शोकं) इमं वै (त्वमिमं) (forकिमर्थ).

धृतराष्ट्र

दुर्योधन कुतोमूल भृशमार्तोऽसि पुत्रक ।
श्रोतव्यश्चेन्मया सोऽर्थो ब्रूहि मे कुरुनन्दन ।। १० ।।(०१)

अय त्वा शकुनिः प्राह विवर्णं हरिण कृशम् ।
चिन्तयश्च न पश्यामि शोकस्य तव सम्भवम् ।। ११ ।।(०२)

ऐश्वर्यं हि महत्पुत्र त्वयि सर्वं प्रतिष्ठितम् ।
भ्रातरः सुहृदश्चैव नाचरन्ति तवाप्रियम् ।। १२ ।।(०३)

After 8, T1 G4-6 ins.: B-P.No.218

त्वद्दत्तं चैव भुञ्जावो गान्धारी चाहमेव च ।
आच्छादयसि प्रावारानश्नासि पिशितादनम् ।। १३ ।।(०४)

लक्षालङ्कारः-आच्छादयसि इत्यत्र आव्रियते एभिः पुरुष इति आवराः वस्त्राणि । आजानेया वहन्ति इत्यत्र आजानेयाः सदश्वाः। 'आजानेयाः कुलीनाः स्युर्विनीताः साधुवाहिनः' इत्यमरः ।

आजानेया वहन्त्यश्वाः केनासि हरिणः कृशः ।। १४ ।।

शयनानि महार्हाणि योषितश्च मनोरमाः ।
गुणवन्ति च वेश्मानि विहाराश्च यथासुखम् ।।१५ ।।(०५)

---

(०१) (३)श्रोतव्यं (for व्यश्), चेन्),सार्ध (for सो-र्थो).

(०२) (१) त्वा, तु, च (for त्वां), (२)निर्विण्णं (forविवर्ण), (३)चिंतयन्वै,.

(०३)८, (१) तु, चच, सु (forहि), हि मया, हिमवत् (for हि महत्), ऐश्वर्य मम सर्वस्व), (२)तव सर्व, सर्व त्वयि, त्वयि पुत्र,समन्वितं,प्रतिष्टितं, समाहितं (for समर्पि), (४)तवाहितं (for प्रियम्), कुर्वति (तु),तव सु (सं)प्रियं (अमात्यास्त्वयि संस्थिताः), .

(०४) (१) वस्से (वसेः) शुभांस्त्वं (for अच्छादयसि), प्राव (वा)रणान्, प्रवरान्, अवारान् (for प्रावारान्), (२) पिशितोदनं, पिशदौ,विशदोदनं), (३)अजानीया,अजानेयो, आजानयो, वहंत्यश्वाः, (श्वान्, स्थाष्),(forवहन्ति त्वां), (४)कस्माच्छोचसि पुत्रक,.

(०५) १०, (१) यानानि च (for शयनानि) (२)सु (forच),हराः (for रमाः) (४) विहरस्व, विहासश्व,

देवानामिव ते सर्वं वाचि बद्धं न संशयः ।
स दीन इव दुर्धर्ष कस्माच्छोचसि पुत्रक ।। १६ ।।(०१)

मात्रा पित्रा च पुत्रस्य यद्वै कार्यं परं स्मृतम् ।
प्राप्तस्त्वमसि तत्तात निखिलां नः कुलश्रियम् ।। १७ ।।

उपस्थितः सर्वकामैस्त्रिदिवे वासवो यथा ।
विविधैरन्नपानैश्च प्रवरैः किं नु शोचसि ।। १८ ।।

निरुक्तं निगमं छन्दः सषडङ्गार्थशास्त्रवान् ।
अधीतः कृतविद्यस्त्वमष्टव्याकरणैः कृपात् ।। १९ ।।

हलायुधात्कृपाद्द्रोणादस्त्रविद्यामधीतवान् ।
भ्रातृज्येष्ठस्स्थितो राज्ये किन्नु शोचसि पुत्रक ।। २० ।।

पृथग्जनैरलभ्यं यदशनाच्छादनं बहु ।
प्रभुस्त्वं भुञ्जसे पुत्र संस्तुतः सूतमागधैः ।। २१ ।।

तस्य ते विदितप्रज्ञ शोकमूलमिदं कथम् ।
लोकेऽस्मिञ्ज्येष्ठभागी त्वं तन्ममाचक्ष्व पुत्रक ।। २२ ।।

वैशम्पायनः -

तस्य तद्वचनं श्रुत्वा मन्दः क्रोधवशानुगः ।
पितरं प्रत्युवाचेदं स्वमतिं सम्प्रकाशयन् ।। २३ ।।

दुर्योधनः-

अश्नाम्याच्छादये चाहं यथा कुपुरुषस्तथा ।

---

रांश्च, महीसुखाः (यथा),.
(०१) ११,(२)वाजिबंघम्,आधिपत्यम्,वाचि बद्धं असंशयं (for न संशयः), (३)न (for स), हीन (for दीन), दुर्बुद्धिः, दुर्धर्ष, दुर्धपः,दुर्धर्ष,.

अमर्षं धारये चोग्रं निनीषुः कालपर्ययम् ।। २४ ।।[०१]

अमर्षणः स्वाः प्रकृतीरभिभूय परं स्थितः ।
क्लेशान्मुमुक्षुः परजान्स वै पुरुष उच्यते ।। २५ ।।[०२]

सन्तोषो वै श्रियं हन्ति ह्यभिमानं च भारत ।
अनुक्रोशखशिश्रयं हन्ति सन्तोषश्चापि तावुभौ ।
अनुक्रोशभये चोभे यैर्वृतो नाश्नुते महत् ।। २६ ।।[०३]

न मां प्रीणाति मद्भुक्तं श्रियं दृष्ट्वा युधिष्ठिरे ।
अति ज्वलन्तीं कौन्तेये विवर्णकरणीं मम ।। २७ ।।[०४]

सपत्नानृध्यतोऽऽत्मानं हीयमानं निशम्य च ।
अदृश्यामपि कौन्तेयश्रियं पश्यन्निवोद्यताम् ।। २८ ।।

---

(०१)१२, (१) (आ) च्छादने, (आ) च्छादचेच् (forदये),वाहं (for चाहं), (२)कापुरुषस् (for कुपु), तव,तदा (for तथा), (३)धारयन्, धरये (for धारये), चाग्र्यं (for चोग्रं), (४)तितक्षन्, निनीषुः, प्रतीक्षन् (क्ष्य), तितीर्ष,तित्रीर्षन्, तितिक्षां,.

(०२) १३, (१) अमर्षिणः, अमर्षण,अमर्षितः, अमर्षणाः, अमर्षमाणः,(for अमर्षणः स्वाः),ते, स्वा, स्वां (त्वां) (for स्वाः), प्रकृती, प्रकृतिं), (२)परे स्थितः, परिस्थितां, परं स्थि,ः, परै स्थिताः (तां),परे स्थिते, परे स्थितां, चरेत्स्थितः, तराद्धितं,वरे स्थिते (for परे स्थिताः) अभिभूताः,परै, स्वकाः), (३)क्रोधान् (for क्लेशान्), क्लेशात् (दुःखात्), क्लेशान्मुक्तः (क्षुः) परं जानन्, परजात्, परजान् (जात्)ः शत्रुभवान्), (४)मर्षि,सैव (forस वै), वै,.

(०३)१४, (१) संतोषो हि, अनुकोशः (श, ध), संतोषः, (२)हि (ह) अभिमानश्, अविमानश्, अभि (ति) मानं च, अभिमानः, संतोषश्चापि तावु भौ ), (३)अनुग्धा (त्था) नुभये, अनर्थामभये,अननर्था भवाच्, अनुत्थानभये,अनुकोशो भयं,चैव,चोभौ, अनुक्रोशः भयं), (४)यैर्वृता,यैर्धृतो,यैर्धाता, तैर्वृतो (र्वातो),यैर्युतो, नाश्रुतो, शुश्रुतो (forनाश्नुते),महम्, महान्,महत्,.

(०४) (१) तन्,तं, किं, न, मामहति, मां प्रीणाति, मामर्षति, मा दहति, मामवैहि, मामवैति, मामपैति, मा पृच्छसि (for मामवति), मद्भुक्तं,दद्भुक्तां, तद्भुंक्तां,सभूतां,संभूतां, तां,भूतांः, तद्भूतां (forतद्भुक्तं), न प्रीणयति मां भुक्तं, (३)ज्वलंतीमति, अतिज्वलंतीं (ति), ज्वलंतमिव, कौंतेयान् राजेंद्र (for कौन्तेये), (४)कारिर्णीं, करणी, करिर्णीं, करुर्णीं, स्थितात्राज्ये सदोद्यतान्,.

तस्मादहं विवर्णश्च दीनश्च हरिणः कृशः ।। २९ ।।(०१)

अष्टाशीतिसहस्राणि स्नातका गृहमेधिनः ।
त्रिशंद्दासीक एकैको यान्बिभर्ति युधिष्ठिरः ।। ३० ।।(०२)

दशान्यानि सहस्राणि नित्यं तत्रान्नमुत्तमम् ।
भुञ्जते रुक्मपात्रीभिर्युधिष्ठिरनिवेशने ।। ३१ ।।(०३)

कदलीमृगमोकानि कृष्णश्यामारुणानि च ।
काम्बोजः प्राहिणोत्तस्मै परार्ध्यानपि कम्बलान् ।। ३२ ।।(०४)

गजयोषिद्गवाश्वस्य शतशोऽथ सहस्रशः ।
त्रिशतं चोष्ट्रवामीनां शतानि विचरन्त्युत ।। ३३ ।।(०५)

---

(०१) (१) ऋध्यतो दृष्ट्वा (त्मानं), ऋध्यतोस्माकं,अधितात्मानं, बध्यतोत्मानं, ऋध्यतः, ऋद्धान्सपत्नानात्मानं,
(२)परिक्ष्य च, समीक्ष्य च, निरीक्ष्य च, निशम्य च, निशा (श) म्यहं (म्य ह, म्य हि), निशाम्य, हानिमात्मन एव च,
(३)अहश्यन्नपि, अनहश्यान (म)पि, अपश्यन्नपि (न्निव),अहश्यानपि, अमृष्यानरपि, अघ्टष्यामपि,ि ामृशन्नपि,अतुष्यन्नपि, अपिष्टन्नपि,अहश्यान्, (श्रियं), कौंतेयान्, कौंतेय, कौंतेयं,
(४)स्थितान्,श्रियं,स्थिता (for स्थितां),इवाद्य तां,निबोध तां, स्थितान् (स्थितान्) पश्यामि (श्यति),चो (वो) द्यतान्,स्थितान्पश्यन्निवोद्यत्न्, स्थितात्राज्ये विलोक्य (कि),तान्, स्थितान्राज्ये सदोदि (द्य) तान्, नाहं पश्यामि वर्धितुं (वर्धतां, वर्धनं, विद्धितुं, वार्धितं, वध्यतां, वर्धतीं), स्थितानिव,उद्यतान्, ५.स (forच), ६.हीमश्च (forदीनश्च),.
(०२) १७,(२)स्नातकान् (forका), (३)कमेकैकं, भिरेकैको (कं), त एकैको, कसाहस्रा, क एकैके (for क एकैको), (४)यां,या (for यान्),.
(०३) १८, (१) वाशान्यानि (for दशा), (२)येषा (नित्य), मन्नं सुसंस्कृतं,नित्यं तत्राप्य (न्न) मुत्तमं, नित्यं तत्राप्यनुत्तमं, यतीनामूर्ध्वरेतसां, नित्य मग्रया (ग्रा) न्नमुत्तमं), (३)रुक्यपात्राणि, पात्रेस्तु,पात्रेषु, पात्रीषु, ४३९.शत्रोः ऋद्धिविशेषेण विरूपोऽन्नविवर्जितः । शत्रोराधि,तत्रोषधि (for शत्रोर्ऋद्धि),.
(०४) १९, (१) कदलीमृदनवेकति,कलिंद (कदली) मृगमौकानि,कदलीगर्भवर्णानि,कदलीकोनलत्वंचि, कामलत्वंविमोकानि,कंदसीमृगमोकानि, मृतमोकानि,मृगमोदानि, मृदुमोकानि,पत्रवर्णनि, (२)मारुकान्यपि, मरुहाणि च (for मारुणानि च) (३)कंबोजः, कांबोज (forकाम्बोजः),(४)नेत्रपट्टानि कंबलान्, पराघ्र्यान्,.
(०५)२०, (१) हययोषिद्रवाश्वस्य,द्राजाश्वास्य, द्रजानां च, द्रगश्वं च) गजयोषिद्रवा (जा) श्वस्य (श्वं च),रम्ययोषिद्रजाश्वं च,रथ (अधि) योषिद्रवाश्वानां (योषित्सहस्त्रमश्वानां), (२)सहस्त्राणि चतुर्दश), (३)

एवं सर्वाणि रत्नानि पृथिव्यां सर्वपार्थिवाः ।
प्रयच्छन्ति महाराच कुन्तीपुत्रस्य सर्वतः ।। ३४ ।।

After Sl.20, N ins.: B.P.No.220

राजन्या बलिमादाय समेता हि नृपक्षये ।[०१]
पृथग्विधानि रत्नानि पार्थिवाः पृथिवीपते ।
आहरन्क्रतुमुख्येऽस्मिन्कुन्तीपुत्राय भूरिशः ।[०२]

न क्वचिद्धि मया तादृग्दृष्टपूर्वो न च श्रुतः ।
यादृग्धनागमो यज्ञे पाण्डुपुत्रस्य धीमतः ।। ३५ ।।[०३]
असत्यं चेदिदं सर्वं सञ्जयं प्रष्टुमर्हसि ।। ३६ ।।[०४]

अपर्यन्तं धनौघं तं दृष्ट्वा शत्रोरहं नृप ।
शम नैवाभिगच्छामि चिन्तयानो विशाम्पते ।। ३७ ।।[०५]

ब्राह्मणा वाटधानाश्च गोमन्तः शतसङ्घशः ।

---

त्रिंशतश्चोष्ट्र (स्वाष्ट्र) वामीनां, त्रिशतं,चोष्ट्रनवामीनां(वाहानां),त्रिंशच्चैव तथोष्ट्राणां, त्रिंसत्तथो(त्रो),ष्ट्रवामीनां, त्रिंशतं चेष्ट, त्रिंशद्धयोष्ट्र), (४)शतान्युपनिनाय वै,सहस्त्राणि चरंत्युत(बहंत्युत, विशंत्युत,पराण्युत),शतानि त्रिंशतं (त्रीणि सहस्त्राणि),.

(०१)राजन्यो, राजभ्यो, राजन्या (for राजानो), समेतानि(forता हि),.

(०२) (२)पृथिवीपतेः, एवं तर्वाणि रत्नानि पृथिव्यां सर्वपार्थिवाः, (३)अहरन्, स्म (for -स्मिन्), प्रयच्छंति महाराज), (४)कुंतिपुत्राय, कुंतीपुत्रस्य, धीमतः, भारतः, सर्वतः (for भूरिशः),.

(०३) (१) क- कओशेषु- भिवारीणां । लक्षालङ्कारटीकायाम्-म्वार्याणाम् । आत्मवृद्धिम्, जन्म , अत्मानं, अरीणां, आर्याणां, अर्थानां, इव कांक्षिति, अभिकांक्षति, रक्षते), एष ते, नैधते, एवं ते (for एधते), जातिषु (for ज्ञा), वृद्धि,वृत्तिर्, वृद्धिं (for वृद्धिर्), विक्रमात् (forकमः) सद्योवृद्धिरविक्रमात्,.

(०४) (१) ,न प्राप्य, सं (अ)प्राप्य (प्यं) श्र(for नाप्राप्य) (२)संगमो,प्रशमो, संशमो (for संशयो), नो (forमे) न विद्यते (for भवि)अप्राप्य संशयो न भविष्यतीत्यन्वयः),

(३)आदास्ये तां, आवाप्स्ये तां,अवाप्येषां (for अवाप्स्ये वा),श्रेय (for श्रियं), चाहं (forतां हि),
(४)शिष्ये, शेषे,शये (forशेष्ये), शयिष्ये वा हतो युधि,.

वर्धन्ते पाण्डवा नित्य वय त्वस्थिरवृद्धयः ।। ३० ।।(०१)

लक्षालङ्कारः-अनावृत्तस्य इत्यत्र न विद्यते आवृत्तं आवर्तनं युधिष्ठिरश्रियः आकर्षणं यस्य स तथोक्तः ।

अस्मिन् पर्वणि ५३ अध्याये ३० श्लोकाः सन्ति

**द्यूतपर्वणि(५) पञ्चमोऽध्यायः**

**इति श्रीमहाभारते शतसाहस्रिकायं वैयासिक्यां संहितायां सभापर्वणि द्यूतपर्वणि दुर्योधनसन्तापे त्रिपञ्चशोऽध्यायः ।।५३।।**

# ५४.चतुःपञ्चाशोऽध्यायः

श्रीमन्महाभारततात्पर्यनिर्णये एकविंशाध्याये

न्यवारयत् तं विदुरो महत् ते पापं कुलस्यापि विनाशकोऽयम् ।
समुद्यमो नात्र विचार्यमस्ति कृथा न तस्मादयशश्च ते स्यात् ।।२९३।।
इति ब्रुवाणं कलहोऽत्र न स्यात्
निवारयामो वयमेव यस्मात् ।
द्रष्टुं सुतान् क्रीडत एकसंस्थान्
इच्छामि पार्थांश्च सुयोधनादीन् ।।२९४।।
अतः क्षिप्रमुपानेयाः पार्था इति बलोदितः ।
ययौ स विदुरः पार्थान् द्वारकां केशवे गते ।।२९५।।
गते हि पार्थसन्निधेः सुयोधनेऽथ नारदः ।
शशंस धर्मसूनुना प्रचोदितोऽरिमागतम् ।।२९६।।
क उद्यमी नृपेष्विति प्रपृष्ट आह नारदः ।

(०१) एतादृशास्य, ततोदृशस्य, अनाहुतस्य, अनादृतस्य, अनावृतस्य, अनावृत्तस्य, कर्मे (forकिं मे), जीवितस्य, विजितेन (forजीवि०), वर्धते, पांडवो, तात (forनित्यं), नु, हि(for तु), स्थिरबुद्धयः,स्थिरमुद्धयः, बंधयः, स्थितवृ०,(अ) ०हृतबुद्धयः,०हृतहबुद्धयः,०स्थिरवृत्तयः, (अ) स्थिपवृत्तयः, क्षतवृद्धयः,(अ) स्थिरबु, (अ) स्थितवृ, स्थिरावृद्धिविरहिणी वृत्तिर्येषां, अस्थिरा वृद्धिरहिता वृद्धिः संपत् येषाम् ।.

स सौभराड् वरं शिवादवाप वृष्णिनिर्जयम् ।।२९७।।
पांसुमुष्टिं सकृद्ग्रासी बहूनब्दांस्तपश्चरन् ।
आजगाम हरादाप्य वरं कृष्णजये पुनः ।।२९८।।
स श्रुत्वा मागधवधं दिशां विजयमेव च ।
राजसूयं क्रतुं चैव शिशुपालवधं तथा ।।२९९।।
यदून् प्रत्युद्यमं तूर्णं करोतीति निशम्य तत् ।
समैक्षद् धर्मजः कृष्णमुखशीतांशुमण्डलम् ।।३००।।
आस्त्वत्युक्त्वा स गोविन्दः प्रेषयामास यादवान् ।
प्रद्युम्नादीन् दिनैः कैश्चित् स्वयं चागात् सहाग्रजः ।।३।।

## 02- 06- 54

दुर्योधनं प्रति शकुनिना द्यूताय प्रोत्साहनम् ।। १ ।। धृतराष्ट्रेण द्यूतार्थं पाण्डवानयनाय विदुरप्रेषणम् ।। २ ।। पाण्डवानां द्यूतसभाप्रवेशः ।। ३ ।। विदुरयुधिष्ठिरयोः संलापः सपरिवारस्य युधिष्ठिरस्य हस्तिनापुरं प्रति प्रस्थानं तत्र गत्वा सर्वैः सह समागमश्च

यां त्वमेतां श्रियं दृष्ट्वा पाण्डुपुत्रे युधिष्ठिरे ।
तप्यसे तां हरिष्यामि द्यूतेनाहूयतां परम् ।। १ ।।

अगत्वा संशयमहम् अयुद्ध्वा च चमूमुखे ।
अक्षान् क्षिपन्नक्षतस्सन् विद्वानविदुषो जये ।। २ ।।

लक्षालङ्कारः-अक्षतः अक्षेषु विद्वान् इति सम्बन्धः । 'पणोऽक्षेषु ग्लहे' इत्यभिधानात् ग्लहः पणबन्धनम् ।

ग्लहान् धनूंषि मे विद्धि शरानक्षांश्च भारत ।
अक्षाणां हृदयं ज्यां रथं विद्धि ममास्तरम् ।। ४ ।।

धृतराष्ट्रः-

स्थितोऽस्मि शासने भ्रातुर्विदुरस्य महात्मनः ।

तेन सङ्गभ्य वेत्स्यामि मन्त्रस्यास्य विनिश्चयम्     ।। ५ ।।

दुर्योधनः

कृष्णादभ्यधिकस्सोऽपि बुद्ध्या क्षत्ता विशाम्पते ।
केवलं धर्ममेवाह न तद्विजयसाधनम्     ।। ६ ।।

जयश्च धर्मतोपेतस्तथैव भरतर्षभ ।
तस्माद्विनयतो जेतुस्तावुभौ च विरोधिनौ     ।। ७ ।।

लक्षालङ्कारः-जयश्च धर्मतपन इत्यत्र जयः युद्धेन शत्रूणां जयः धर्मतपनः, धर्मं अहिंसाख्यधर्मं तापयति नाशयतीति स तथोक्तः; तथैव तद्वदेव धर्मश्च जयतपनः, तस्मात् कारणाद्विरोधिनौ तावुभौ धर्मजयौ, विनयतः विनयेन प्रवर्तनात् जेता भवेत् । विनयेन अक्षशीलायां कृतायां तत्सम्पदाहरणाख्यजयोऽपि भविष्यति, तेषां हिंसा च न भविष्यतीति भावः ।

विहनिष्यति ते बुद्धिं विदुरो मुक्तसंशयः ।
पाण्डवानां हिते युक्तो न तथा मम कौरव     ।। ८ ।।

नारभेत् परसामर्थ्यात् पुरुषः कार्यमात्मनः ।
मतिसाम्यं द्वयोर्नास्ति कार्येषु कुरुनन्दल     ।। ९ ।।

भयं परिहरन् मन्द आत्मानं परिपालयन् ।
वर्षासु क्लिन्नपटवत् तिष्ठन्नेवावसीदति     ।। १० ।।

लक्षालङ्कारः-भयं परिहरन् मत्त इत्यत्र मत्त इत्यस्मच्छब्दात् तसिलन्तपञ्चमी, मदाख्यनिमित्तात् । भयं लोकापवादभयं परिहरन् दुर्योधन एव दुष्टः धृतराष्ट्रः किं करिष्यतीति बहिष्कुर्वन् । आत्मानं विनयेन परिरक्षन्, अत एव वर्षासु क्लिन्नवटवत् तिष्ठन् भवान् नावसीदति । यथा वटः निदाघसमये आपाततः जलासेकरहित इव तिष्ठति, मूलेन जलं पिबति च, तथैवेति भावः ।

न व्याधयो नापि यमश् श्रेयः प्राप्तिं प्रतीक्षते ।
यावदेव भवेत् कल्यस् तावच्छ्रेयस्समाचरेत्     ।। ११ ।।

धुतराष्ट्रः-

सर्वथा पुत्र बलिभिर् विग्रहं तैर्न रोचये ।
वैरं विकेशे सृजति तद्धै शस्त्रमनायसम् ।। १२ ।।[०१]

लक्षालङ्कारः-वैरं विकोशं सृजति इत्यत्र विकोशं विगतकोशस्थधनम् ।

अनर्थमर्थं मन्यसे राजपुत्र सङ्ग्रन्थितं कलहं चातिघोरम् ।

तद्वै प्रवृत्तं तु यथाकथाश्चित् विमोक्षयेच्चाप्यासिसायकांश्च ।। १३ ।।

दुर्योधनः-

द्यूते पुराणैर्व्यवहारः प्रणीतस्तत्रात्ययो नास्ति न समिप्रहापः ।

तद्रोचतां ते शकुनेर्वाक्यमद्य सभां क्षिप्रं त्वमिहाज्ञापयस्व ।। १४ ।।

स्वर्गद्वारं दीव्यतां नो विशिष्टं तद्वर्तिनां चापि तथैव युक्तम् ।

भवेदेवं ह्यत्मना तुल्यमेव दुरोदरं पाण्वैस्त्वं कुरुष्व ।। १५ ।।

लक्षालङ्कारः-दुरोदरं पाण्डवैः इत्यत्र दुरोदरं द्यूतं कुरुष्व कारयस्व ।

धृतराष्ट्रः-

वाक्यं न मे रोचते यत् त्वयोक्तं यत् ते प्रियं तत् क्रियतां नरेन्द्र ।

पश्चाचेत् त्वं तप्यसे दुस्तरं च वाक्यं न हीदं भावि चाद्य प्रयुक्तम् ।। १६ ।।

दृष्टं ह्येतद्विदुरेणैव सर्वं प्राप्तं ह्येतद्बुद्धिविद्यान्तगेन ।
तदेवैतदयशस्याभ्युपैति महद्भयं क्षत्रियबीजघाति ।। १७ ।।[०२]

लक्षालङ्कारः-तदैवैतद् इत्यत्र हे अयशस्य इति दुर्योधनं प्रति सम्बुद्धिः।

वैशम्पायनः-

इत्येवमुक्त्वा धृतराष्ट्रो मनीषी

---

(०१) वैरं विनाशं सृजति

(०२) तदैवेतदवशस्याभुपैति ।

दैवं मत्वा परमं दुस्तरं च ।
शशासोच्चैः पुरुषान् पुत्रवाक्ये
स्थितो राजा दैवसम्मूढचेताः ॥ १८ ॥
सहस्रस्थूणां हेमवैडूर्यचित्रां
शतद्वारां स्फाटिक तोरणाग्राम् ।
सभामग्र्यां कोशमात्रायतां मे
एतावद्विस्तारामाशु कुर्वन्तु युक्ताः ॥ १९ ॥
श्रुत्वा तस्य त्वरिता निर्विशङ्काः
प्राज्ञा दक्षास्तां तथा चक्रुराशु ।
सर्वद्रव्याण्युपजह्रुस्सभायां
सहस्रश शिल्पिलां चापि युक्ताः ॥ २० ॥
कालेनाल्पेनाथ निष्ठां गतां तां
सभां रम्यां बहुरत्नां विचित्राम् ।
चित्रैर्हैमैरासनैरभ्युपेताम्
आचख्युस्ते तस्य राज्ञः प्रतीताः ॥ २१ ॥
ततो विद्वान् विदुरं मन्त्रिमुख्यम्
उवाचेदं धृतराष्ट्रो नरेन्द्रः ।
युधिष्ठिरं राजपुत्रं हि गत्वा
मद्वाक्येन क्षिप्रमिहानयस्व ॥ २२ ॥
सभेयं मे बहुरत्ना विचित्रा शय्यासनैरुपपन्ना महार्हैः ।

सा दृश्यातां भ्रातृभिस्सार्धमेत्य सुहृद्द्यूतं वर्ततामत्र चैत्य ।। २३ ।।

मतमाज्ञाय पुत्रस्य धृतराष्ट्रः प्रतापवान् ।
मत्वा च दुस्तरं दैवम् एताद्राजा चकार ह ।। २४ ।।

अन्यायेन तथोक्तस्तु विदुरो विदुषां वरः ।
नाभ्यन्दद्वचो भ्रातुर् वचने चेदमब्रवीत् ।। २५ ।।

विदुरः-

नाहं नन्दे नृपते प्रैषमेतं मैवं कृथाः कुलनाशाद्बिभोमि ।
पुत्रैर्भिन्नैः कलहस्ते ध्रुवस्स्याद् एतच्छङ्के द्यूतकृते नरेन्द्र ।। २६ ।।

धृतराष्ट्रः-

नेह क्षत्तः कलहस्तस्य वै मेन चेद्दैवं प्रतिलोमं भविष्यत् ।
धात्रा तु दिष्टस्य वशे किलेदं.सर्वं जगच्चेष्टते न स्वतन्त्रम् ।। २७ ।।

तदद्य विदुर प्राप्य राजानं मम शासनात् ।
क्षिप्रमानय दुर्धर्षं कुन्तीपुत्रं युधिष्ठिरम् ।। २८ ।।

वैशम्पायनः

ततः प्रायाद्विदुरोऽश्वैरुदारैर्महाजवैर्बलिभिः साधुदान्तैः।
बलान्नियुक्तो धृतराष्ट्रेण राज्ञा मनीषिणां पाण्डवानां सकाशे ।। २९ ।।(०१)

सोऽभिपत्य तदध्वानमासाद्य नृपतेः पुरम्।
प्रविवेश महाबुद्धिः पूज्यमानो द्विजातिभिः ।। ३० ।।(०२)

---

(०१) (१) °रोश्वैरुदग्रैर्; रोश्वैर्विनीतैर् विनीतै; °रोच्चैरुदारैर्.; (२) मनो °न)जवैर्; महारावैर्; महाबलैर्.; बहुभिः; बलिभिः).; सुप्रदातैः; साधुमन्तैः; महाबलैः साधुदान्तैः; सुवेगैः; (३) बलाभियुक्तो.;
(४) मनीषिणा; °षेणा; मनर्षिणां; . मनीषिणं.; शकासे ); सकाशेऽ

(०२) (१) सोभिपद्यः; सोति ( ती; नि ); पत्य.; तम (°मा)ध्वानम्; तदाध्वानम्; . तथा°; मदध्वानम्.; तत् पुरम्; (५) स (For प्र-)

स राजगृहमासाद्य कुबेरभवनोपमम्।
अभ्यागच्छत धर्मात्मा धर्मराजं युधिष्ठिरम् ।। ३१ ।।(०१)

स वै राजा सत्यधृतिर्महात्मा हि अजातशत्रुर्विदुरं यथावत्।
पूजापूर्वं प्रतिगृह्याजमीढस् ततोऽपृच्छद्धृतराष्ट्रं सपुत्रम् ।। ३२ ।।(०२)

युधिष्ठिरः

विज्ञायते ते मनसोऽप्रहर्षः कच्चित्क्षत्तः कुशलेनागतोऽसि।
कच्चित्पुत्राः स्थविरस्यानुलोमा वशानुगाश्चापि विशोऽथ कच्चित् ।। ३३ ।।(०३)

विदुरः

राजा महात्मा कुशली सपुत्र
आस्ते वृतो ज्ञातिभिरिन्द्रकल्पै ः।
प्रीतो राजन्पुत्रगणैर्विनीतैर्
विशोक एवात्मरतिर्दृढात्मा ।। ३४ ।।(०४)
इदं ह्यु त्वां कुरुराजोऽभ्युवाच
पूर्वं पृष्ट्वा कुशलं चाव्ययं च ।
इयं सभा त्वत्सभातुल्यरूपा

---

(०१) (२) कुबेरभवनप्रभं.; (३) अभ्यगच्छत्सु-; अभ्यागच्छत; (च्च; त्स).; (४) राजपुत्रं; कुन्तीपुत्रं; धर्मराजं; धर्मात्मानंऽ

(०२) (१) स ( तं).; राजं. (२) आजातशत्रुर्; तु ह्यजातं.; (३) पूजां पूर्वं; प्रजापूर्वं.;( आ जमीढ; . ( आ )जिमीढसू.; (४) सूतोपृच्छद्; ततोगछद्; ततो पुत्रं; धृतराष्ट्रस्य पुत्रं.

(०३) (१) विज्ञायमानो (यते ते ).; ते मनसः. मानसो; मानसे.; मनसोप्रहर्षः;(For °सो न प्रहर्षः;).; (२) क्वचित् .; (३) क्वचित्; कश्चित् .; पुत्रः; श °स्यानुकूला;प्रसन्नः स्या.; अनुलोमाः;

(४) विशोथ; विशोद्य; विशोक; तथैवः; विशो हि; विशोस्य. विशः; कश्चित्; . क्वचित्; पौत्राश्चापि वीतशोकास्तु कच्चित्; वशानुगा वति- शोकाश्च कच्चित्.

(०४) (१) सुपुत्र; (२) वृत्तो (For वृतो).; राजभिर्; (For ज्ञातिभिर् ).; इन्द्रकल्पः. (३) पीतो.; राजा (For राजन् ).; पुत्रगुणैर्; प्रीतिगुणैर्; विनीतो; उदारैर्;(For विनीतैर् ). (४) (आ) त्मनतिर्; महात्मा (For दृढा ).; विशङ्कभावस्तु दृढं महात्माऽ

भ्रातणां ते दृश्यतामेत्य पुत्र ।। ३५।।(०१)

समागम्य भ्रातृभिः पार्थ तस्यां

सुहृद्द्यूतं क्रियतां रम्यतां च।

प्रीयामहे भवतां सङ्गमेन

समागताः कुरवश्चापि सर्वे ।। ३६ ।।(०२)

दुरोदरा विहिता ये तु तत्र

महात्मना धृतराष्ट्रेण राज्ञा।

तान्द्रक्ष्यसे कितवान्संन्निविष्टान्

इत्यागतोऽहं नृपते तज्जुषस्व ।। ३७ ।।(०३)

युधिष्ठिरः

द्यूते क्षत्तः कलहो विद्यते नः

को वै द्यूतं रोचयेद्बुध्यमानः।

किं वा भवान्मन्यते युक्तरूपं

भवद्वाक्ये सर्व एव स्थिताः स्मः ।। ३८ ।।(०४)

विदुरः

---

(०१) (१) च त्वा; . नु त्वां; तु त्वा ( तु; तु कृत्वा).; ज्ञुवाच.; (२)पूर्वँ; पृष्ट्वा.;हष्ट्वा (For पृष्ट्वा).; चाप्ययं च; वाचयं च; वाच्यपं च.; अव्ययं; पूर्वँ पृष्ट्वा कुशलानामयं च.;

(४) हश्य (दश)तामेत्य; (त);हश्यतामद्य; हश्यता मेद्य; पश्य तां मेद्य.

(०२) (१) समागत्य.; पार्थिवस्यां; तस्य पार्थाँ पार्थ तस्य.;(२) सुहृद्द्यूतः. कारण (यं); क्रिय; कौरय; रम्यतां; वर्तताम् (For क्रियतां).; आन्तरं च; क्रीडतां च; अद्य चेति.;

(३) प्रियामहे.; भवतां.; (४) सभां जताः; सभागताः; सहागताः. चापि (For चैव)

(०३) (१) दुरोदरे; दरो; दरोदरा (रे); ये च तेत्र; तत्र ग्रे तु.; (२) महात्मानो.; (३) तं (For तान्).; द्रक्ष्यसि स्वं (For द्रक्ष्यसे).; जितवान्.; संनिकृष्टान्.; (४) अभ्यागतान्; अभ्यागतोहं.; (ऽ) हं.; तज.; तां; ताञ्; तं (For तज्)

(०४) (१) हश्य (For विद्य).; नः. वै; च; वः; तु; न (For नः).; (२) को वा; क्रोधैर् (For को वै).; रोचये; ते; तां.; बुध्यमाश्र.; (३) तत्किं (For किं वा).;भवो (For भवान्).; मन्यसे; जन्यते.; प्राप्तकामं (For युक्तरूपं).; (४) तव (For भवद्).; स्थितां स्म.; भवद्धाकये सर्वथावस्थिताः स्मऽ

जानाम्यहं द्यूतमनर्थमूलं
कृतश्च यत्नोऽस्य मया निवारणे।
राजा च मां प्राहिणोत्त्वत्सकाशं
श्रुत्वा विद्वञ्छ्रेय इहाचरस्व ।। ३९ ।।(०१)

युधिष्ठिरः

के तत्रान्ये कितवा दीव्यमाना
विना राज्ञो धृतराष्ट्रस्य पुत्रैः।
पृच्छामि त्वां विदुर ब्रूहि नस्तान्
यैर्दीव्यामः शतशः सन्निपत्य।। ४० ।।(०२)

विदुरः

गान्धारराजः शकुनिर्विशाम्पते
राजा तु देवी कृतहस्तो मताक्षः।
विविंशतिश्चित्रसेनश्च राजा
सत्यव्रतः पुरुमित्रो जयश्च ।। ४१ ।।(०३)

लक्षालङ्कारः-राजा तु देवी इत्यत्र देवो देवनम् । 'धूर्तोऽक्षदेवी कितवः' इत्यमरः ।

---

(०१) (१) रूप (For मूलं).; (२) कृतस्य.; (ऽ)त्र; वि; (ऽ) र्थ (For ऽस्य).; निवारणे मया.; (३) च मां; हि मां; तु मा.; काशात्.; (४) स्वं वै (For श्रेय.; एव (इह).;.

(०२) (१) तत्रास्ते; सन् तत्र वै.; द्यूतमाना; दिव्य; दीप्य.;

(२) राज्ञः सभायां; राज्ञस्तु वै; वृता राज्ञो; नरास्तु वै; विना राज्ञा.;

(३) त्वा.;तत्वं; नस्तद्; नस्त्वं (For नस्तान्); पृच्छामि त्वां ब्रूहि विदुरस्तद्

(४) कैर् (For यैर्); यैद्रीव्यसे; ये दीव्यमानाः; कैद्रीव्येमः; यैद्रिव्यामः; कैद्रीव्यमानः; अन्यैद्रिव्ये; यैद्रिव्येमः; यैद्रीवितः; देविष्ये च वयः; अन्यैद्रीव्यैः; यैद्रीव्येम सततं शतशः; शकुनिः संनिपात्य;.

(०३) (१) गन्धारराजः (२) राजानुदेवी; राजा (राज्ञा) क्षदेवी; तिदेवः राजाह देवी; राजाधिदेवी; राजा तु देवी; क्षदेवी; कृतपातो; हस्ते; अकृतहस्तः (यथेच्छमक्षपातकः);! महाक्षः;

।(३) चित्रसेनोथ; नस्य; नः स राजन् (For राजा) (४) स्यवृतः; सत्रव्रतः कुरुमित्रो गयश्र.

युधिष्ठिरः

महामायाः कितवाः सन्निविष्टा  मायोपधा देवितारोऽत्र सन्ति।
धात्रा तु दिष्टस्य वशे किलेदं  न देवनं गिल्वैरद्य नैमे  ।। ४२ ।।(०१)

नाहं राज्ञो धृतराष्ट्रस्य शासनात्
न गन्तुमिच्छामि कवे दुरोदरम् ।
इष्टो हि पुत्रस्य पिता सदैव
तदस्मि कर्ता विदुरात्थ मां यथा  ।। ४३ ।।(०२)

न चाकामः शकुनिना देविताहं
न चेन्मां जिष्णुराह्वयिता सभायाम्।
आहूतोऽहं न निवर्ते कदाचित्
नथाहीदं शाश्वतं वै व्रतं मे  ।। ४४ ।।(०३)

---

(०१) (१) महानु (नु). भावाः; महा (मया) भागाः; मायाः ( मयाः);
(२) मायाविनो; मायापरा; मायोपाया; मायोपधा.;
(३) धात्रा सु; धात्रानु; त्रात्र.; शिष्टस्य; वितोदं; किलेद्यं; कवेदं.;
(४) नादेविनं; न देवनं; नादेवितं (For नादेवनं).; ते (For तैर्).; सर्वँ जगत्तिष्ट (चेष्ट) ति न स्वतन्त्रं.

(०२) (१) राज्ञा. धृतराष्ट्रशास. (२) आगन्तुम्; नागन्तुम् (For न गन्तुम्).; अर्हामि; अर्होस्मि (For इच्छामि).; कुर्वे (For कवे).; दरोदरं (रः); इष्टोसि.; सदैत;न दैवतम्; सुदैव.;
(४) तच्चास्मि; तस्मिन्; अस्मिन् (For तदस्मि).; त्वं कर्ता.; विदुरोत्थ; रार्थ.; त्य मा यथा; र्थमनाथ.; राजा सुतेष्टः स यथाह मां वै.

(०३) (१) च कामः; चाकामं; वाकामं (मः); कामतः. शकुनिर्; शक्रा ९२ शकुनिना).; व क्रीड)ताहं; देविता मां; देवनं (For देविताहं).; (
(२) न ह्यात्मना (For न चेन्मां).; जिष्णुर्; धृष्ट; धृष्टम्; हृष्टम्; धृष्टअ (For धृष्णुर्).; त्वा आह्वयता; स्वष्टत्साह्वयते; धृष्णुना (रा) ह्वयता; नृष्णुराह्वयता (For धृष्णुराह्वयिता).; अह्वयते; आह्वयते; अह्वयित्वा; आह्वयते.; न चेन्मां धृतराष्ट्रोह्वयिता सभायां; न चेन्मां धृतराष्ट्र आह्वयते (यिता) सभायां; न चाह्वयिता; धृतराष्ट्रः सभाया; न ह्यात्मानमधितातासभायां.;
(३) त्वं; वै; यन् (For (अ)हं).; तन्निवृत्तेः; न विवर्ते; न निवृत्ते; नातिवर्ते (For न निवर्ते).; कदामि.;

वैशम्पायनः

एवमुक्त्वा विदुरं धर्मराजः
प्रायाणिकं सर्वमाज्ञाप्य तूर्णम् ।
प्रायाच्छ्वोभूते सगणः सानुयात्रः
सह स्त्रीभिर्द्रौपदीमादि कृत्वा ।। ४५ ।।(०१)

लक्षालङ्कारः-द्रौपदीमादि कृत्वा इत्यत्र आदिर्यथा भवति तथा आदि (कृत्वा) ।

दैवं हि प्रज्ञां मुष्णाति तेजश्चक्षुः इवापतत्।
धातुश्च वशमन्वेति पाशैरिव करीस्थिनः ।। ४६ ।।(०२)

वैशम्पायनः

इत्युक्त्वा प्रययौ राजा सह क्षत्रा युधिष्ठिरः।
अमृष्यमाणस्तस्याथ समाह्वानमरिन्दमः ।। ४७ ।।(०३)

बाह्लीकेन रथं यत्तमास्थाय परवीरहा।
परिच्छन्नो ययौ पार्थो भ्रातृभिः परिवारितः ।। ४८ ।।(०४)

राजश्रिया दीप्यमानो ययौ ब्रह्मपुरःसरः।

---

(४) तथाहितं; तदा विघ्नं तथा (दा) हीदं (For तदाहितं). प्रतस्थे (For व्रतं मे)

(०१) (१) एवमुक्तवा तु; एवं तूक्तवा.; (२) प्रयाविकं; प्रायान्तिकं; सांयातिकं; प्रायाणिकं; दूर्ण.;
(३) प्रायात्ससूते ( सुते श्रेभूते); प्रायाच्छ्वो.; सयात्रः;(For सानुयात्).;
(४) द्रौपदिप्रमुखीभिः; याज्ञसेनीं गृहीत्वाऽ

(०२) प्राज्ञां; प्राज्ञाः; प्राज्ञां.; हि प्रज्ञां; प्रज्ञानं; तु प्रज्ञां; प्रज्ञा हि; प्रज्ञां हि; च प्रज्ञां.; वि (For तु).; पुष्णाति.; (२) तेजः चक्षुः. रिवापदि; रिवापतन्.; (३) दैवस्य).; (For धातुश्च ).; वशमभ्येति; . वशमत्येति.; (४) नरं; . वरैः; करी; करे (For नरः).; करस्थितः ( तै); विकर्षतः; (For नरः सितः).; स्थितः; शितः; क्षितौ; सितः ).

(०३) वैशं ॰ (१) इत्यादिश्य (For इत्युक्त्वा).; (२) कृत्वा; क्षत्ता (For क्षत्त्रा).; (३) तस्याथ; . तं पार्थः. (४) सहाह्वानम्.; अतन्द्रितः; अरिन्दम; अरेस्तदा ( था )

(०४) (१) बाह्लीकेन; बाहकेन; यत्तम्; तूर्णम् (For दत्तम् ).; बाह्लीकश्च रथैर्युक्तम्
(३) परिच्छिन्नो; ॰च्छिद्य; राजा; पार्थैः. (४) सर्वैश्च भ्रातृभिः).; पार्थिवैः; . पाण्डवैः; पाण्डव.

प्रविवेश ततो राजा पुरं नागाह्वयं प्रति ।। ४९ ।।[०१]

ततस्ते नृपशार्दूलाः चक्रुर्वै नृपशासनम्।

ततो राजा महातेजाः सधौम्यः सपरिच्छदः ।

ब्राह्मणैः स्वस्ति वाच्यैव निर्ययौ मन्दिराद् बहिः ।। ५० ।।

ब्राह्मणेभ्यो धनं दत्त्वा गत्यर्थं स यथाविधि ।
अन्येभ्यः स तु दत्त्वाऽर्थं गन्तु तत्रोपचक्रमे ।। ५१ ।।

लक्षालङ्कारः-ब्राह्मणेभ्यो धनम् इत्यत्र गम्यर्थं, गमिनः गन्तुः स्वस्य अर्थं प्रयोजनार्थम्।

सर्वलक्षणसम्पन्नं राजार्हं सपरिच्छदम् ।
तमारुह्य महाराजो गजेन्द्रं षष्टिहायनम् ।। ५२ ।।

निषसाद गजस्कन्धे काञ्चने परमासने ।

हारी किरीटी हेमाभः सर्वाभरणभूषितः ।। ५३।।

रराज राजन् पार्थो वै परया नृपशोभया ।
रुग्मवेदिगतः प्राज्यो ज्वलन्निव हुताशनः ।। ५४ ।।

ततो जगाम राजा स प्रहृष्टनरवाहनः ।
रथघोषेण महता पूरयन् वै नभस्स्थलम् ।। ५५ ।।

संस्तूयमानः स्तुतिभिः सूतमागधवन्दिभिः ।
स्वेनसैन्येन संवीतो यथाऽऽदित्यः स्वरश्मिभिः ।। ५६ ।।

पाण्डरेणातपत्रेण ध्रियमाणेन मूर्धनि ।
बभौ युधिष्ठिरो राजा पौर्णमास्यामिवोडुराट् ।। ५७ ।।

उभयोः पक्षयोश्चैव गजाश्वैः कुरुनन्दनः ।

---

(०१)( नगरं नागसाह्वयं).

चामरैर्हेमदण्डैश्च धूयमानः समन्ततः ।। ५८ ।।

धृतराष्ट्रेण चाहूतः कालस्य समयेन च ।

लक्षालङ्कारः-कालस्य समयेन इत्यत्र कालनामकपरमात्मनः समयेन सङ्कल्पेन ।

स हस्तिनपुरं गत्वा धृतराष्ट्रगृहं ययौ ।

समियाय च धर्मात्मा धृतराष्ट्रेण पाण्डवः ।। ५९।।

लक्षालङ्कारः-कालस्य समयेन इत्यत्र कालनामकपरमात्मनः समयेन सङ्कल्पेन ।

ततो द्रोणेन भीष्मेण कर्णेन च कृपेण च ।
समियाय यथान्यायं द्रौणिना च विभुः सह ।। ६० ।।

समेत्य च महाबाहुः सोमदत्तेन चैव हि ।
दुर्योधनेन सभ्रात्रा सौबलेन च वीर्यवान् ।। ६१ ।।

ये चान्ये तत्र राजानः पूर्वमेव समागताः ।

दुश्शसानेन कौन्तेयः सर्वैर्भ्रातृभिरेव च ।। ६२ ।।

जयद्रथेन हि तथा कुरुभिश्चापि सर्वशः ।
समेत्य कुरुभिः सर्वैर्यथान्यायमरिन्दमः ।। ६३ ।।
शोभयन्तौ महासैन्यं तावुभौ रूपशानिनौ ।। ६४ ।।

पृष्ठतोनुययौ धीमान् पार्थश्शस्त्रभृतां वरः।
श्वेताश्वो गाण्डिवं गृह्य अग्निदत्तं रथं गतः ।
सैन्यमध्ये ययौ राजन् कुरुराजो युधिष्ठिरः ।। ६५ ।।

द्रौपदीप्रमुखा नार्यस् सानुगास्सपरिच्छदाः।
आरुह्य ता विचित्राणि शिबिकानां शतानि च ।। ६६ ।।

महत्या सेनया राजन्नग्रे राज्ञो ययुस्तदा ।। ६७ ।।

समृद्धनरनागाश्वं सपताकरथध्वजम् ।
समृद्धरथनिस्त्रिंशं पत्तिभिर्घोषितस्वनम् ॥ ६८ ॥

शङ्खदुन्दुभितालानां वेणुवीणानुनादितम् ।
शुशुभे पाण्डवं सैन्यं प्रयातं तत् तदा नृप ॥ ६९ ॥

यथा कुबेरो लङ्कायां पुरा चात्यन्तशोभया ।
महत्या सेनया सार्धं गुरुमित्रं स गच्छति ॥ ७० ॥

तथा ययौ स पार्थो..पि महत्या च विभूतिना ।
सुसमृद्धेन सैन्येन यथा वैश्रवणस्तथा ॥ ७१ ॥

स सरांसि नदीश्चैव वनान्युपवनानि च।
अत्यक्रामन्महाराज पुरीं चाभ्यवपद्यत ॥ ७२ ॥

हस्तीपुरसमीपे तु कुरुराजो युधिष्ठिरः ।
चक्रे निवेशनं तत्र ततस्स सहसैनिकः ।
शिवे देशे समे चैव न्यवसत् पाण्डवस्तदा ॥ ७३ ॥

ततो राजन् समाहूय शोकविह्वलया गिरा ।
एतद्वाक्यं च सर्वस्वं धृतराष्ट्रचिकीर्षितम् ॥ ७४ ॥

आचचक्षे यथावृत्तं विदुरो..थ नृपस्य ह ।
श्रुत्वा तु भाषितं तेन धर्मराजो..ब्रवीदिदम् ॥ ७५ ॥

युधिष्ठिरः-

मर्षयामि ह्यहं क्षत्तः समाह्वानं व्रतेन मे ।
स्वस्त्यस्तु लोके विप्राणां प्रजानां चैव सर्वथा ॥ ७६ ॥

वैशम्पायनः-

इत्युक्त्वा प्रययौ राजा पुरं नागाह्वयं ततः ॥ ७७ ॥

धृतराष्ट्रेण चाहूतः कालस्य समयेन च ।(०१)
स हास्तिनपुरं गत्वा धृतराष्ट्रगृहं ययौ।
समियाय च धर्मात्मा धृतराष्ट्रेण पाण्डवः ।। ७८ ।।(०२)

तथा भीष्मेण द्रोणेन कर्णेन च कृपेण च ।
समियाय यथान्यायं द्रौणिना च विभुः सह ।। ७९ ।।(०३)

समेत्य च महाबाहुः सोमदत्तेन चैव ह ।
दुर्योधनेन शल्येन सौबलेन च वीर्यवान् ।। ८० ।।(०४)

ये चान्ये तत्र राजानः पूर्वमेव समागताः।(०५)
दुश्शासनेन वीरेण सर्वैर्भ्रातृभिरेव च ।। ८१ ।।(०६)

अन्यैश्च धार्तराष्ट्रैश्च नृपैरन्यैः समेयिवान्।(०७)

जयद्रथेन च तथा कुरुभिश्चापि सर्वशः।
समेत्य कुरुभिः सर्वैर्यथान्यायमरिन्दम * ।। ८२ ।।(०८)

---

(०१) (१) सेव्यमानो.; (२) ततो (For ययौ).; ब्रह्मपुरष्कृ (स्कृ) तः (३) धृतराष्ट्रस्य; (४) कालेन.

(०२) (१) हस्तिनपुरंम.; गत्वा हास्ति; (२) धृतराष्ट्रपुरं; गृहान्.; धृतराष्ट्र (स्थ) गृहं ययौ.;
(३/४) समीयाय सन्मेयाय; यथान्यायं (For च धर्मात्मा).; धृतराष्ट्रेण भीष्मेण समीयायाथ पाण्डवः.

(०३) (१/२) ततो (For तथा); द्रोणेन भीष्मेण; भीष्मेण कर्णेन.; कर्णेन भारद्वाजेन द्रौणिना च कृपेण
(३) समीयाय; समे -मे याय; यथान्यायौ
(४) चाभितः; चा च ); भिभुः; वा विभुः च विभाः; ( अ )थ विभुः (For च विभुः).

(०४) (१) बाह्ली (हि) केन तदा; ( था) राजा; बाह्लीकेन च राजेन्द्र; समेयाय (समेत्य च;बाह्लिकेन); यथान्यायं.

(२) चैव हि; वा विभुः; भूरिणा; चाभिभूः; (चापि ह ).; (३) वीरेण; कर्णेन; सभ्रात्रा (For शल्येन); दुर्योधने सह भ्रात्रा. (४) सोमदत्तेन पाण्डवः; कुरुभिः सौबलेन च.

(०५) (१/२) राजानं.; सिन्धुराजेन वै सार्धं तथा शकुनिना नृपऽ

(०६) (१) च तथा; कौतेयः; कौतेय (For वीरेण).; सर्वे; सर्वै.

(०७) (३) राज्ञा च; हि तदा; हि तथा.; (४) राजभिश्चापि (त्र).;.

(०८) (१) सर्वैश्च तथा चा; (For समेत्य).; सर्वे (For सर्वैर्).).

ततः सर्वैर्महाबाहुर्भ्रातृभिः परिवारितः।
प्रविवेश गृहं राज्ञो धृतराष्ट्रस्य धीमतः ।। ८३ ।।(०१)

ददर्श तत्र गान्धारीं देवीं पतिमनुव्रताम् ।
स्नुषाभिः संवृतां शश्वत्ताराभिरिव रोहिणीम् ।। ८४ ।।(०२)

अभिवाद्य स गान्धारीं तया च प्रतिनन्दितः।
ददर्श पितरं वृद्धं प्रज्ञाचक्षुषमीश्वरम् ।। ८५ ।।(०३)

राज्ञा मूर्धन्युपाघ्रातास्ते च कौरवनन्दनाः।
चत्वारः पाण्डवा राजन्भीमसेनपुरोगमाः ।। ८६ ।।(०४)

ततो हर्षः समभवत्कौरवाणां विशाम्पते।
तान्दृष्ट्वा पुरुषव्याघ्रान्पाण्डवान्प्रियदर्शनान् ।। ८७ ।।(०५)

विविशुस्तेऽभ्यनुज्ञाता रत्नवन्ति गृहाव्यथ
विविशुस्ता ङपायाना,द्रौपदी प्रमुखाः स्त्रियः ।। ८८ ।।(०६)

याज्ञसेन्याः परां वृद्धिं दृष्ट्वा प्रज्वलितामिव।

---

(०१) (२) भ्रातृभिश्च ततोत्तरैः; (३) पुरं (For गृहं).; (४) संमतं ( ते तः (For धीमतः)

(०२) (१) गान्धारिं; (२) भ्रातृभिः; परिवारितः; (३) सहितां; सर्व (For संवृ); तत्र (For शश्वत्);
(४) ०रेव रोहिणी; संवृतांऽ

(०३) (१) अभिवन्द्य सः; रोहिणीमिव.; च (For स).; स; सं (For च); प्रतिनन्दितं.; यया च प्रतिसन्दितः; तया चाप्यभिनन्दितः; तथा सम्प्रतिनन्दितः; स्नुषाभिः; संवृतां;
(३) ज्येष्ठं (For वृद्धं ); (४) ईदृशं (For ईश्वरम्).

(०४) (१) ( उ) ०पाघ्रातस्; (उ) पघ्रातास्.; राज्ञा (जा); च मूध्र्युपाघ्रातास्; तसू; राज्ञा मूर्द्धन्मुखाघ्रातासू ; राज्ञा च मूर्धन्युपाघ्रातास्; ( तस्); स राज्ञा मूध्र्युपाघ्रातास् (२) तेन तत्रा (भि) नद्य च.

(०५) (१) समाभवत्. (३) तान् दृष्ट्वा; पुरुषव्याघ्र; व्याघ्रः; (४) पाण्डवान्पुरुषर्षभान्.

(०६) (१) म स्तेप्यनुज्ञाता.; (२) भानुमन्ति (For रत्नं); गृहाणि च; गृहाण्युत.;
(३) विविशुशू (For ददृशुर्); चोपया (जा) तांसू; यानासू; यायाः; चोपजातासू.; ता; वै (For तान्); ता उपायाता चोपयातास्तान् ).;
(४) गाधारी दुःशला; दुःशीलां; दुःशली; (For द्रौपदीं); कौरव (For प्रमुखाः).;.

स्नुषास्ता धृतराष्ट्रस्य नातिप्रमनसोऽभवन् ।। ८९ ।।(०१)

ततस्ते पुरुषव्याघ्रा गत्वा स्त्रीभिस्तु संविदम्।
कृत्वा व्यायामपूर्वाणि कृत्यानि प्रतिकर्म च ।। ९० ।।(०२)

ततः कृताह्निकाः सर्वे दिव्यचन्दनभूषिताः।
कल्याणमनसस्सर्वे ब्राह्मणान्स्वस्ति वाच्य च ।। ९१ ।।(०३)

मनोज्ञमशनं भुक्त्वा विविशुः शरणान्यथ।
उपगीयमाना नारीभिरस्वपन्कुनन्दनाः ।। ९२ ।।(०४)

अनन्तरं च सुषुपुः न परपुरंजयाः*(०५)

जगाम तेषां सा रात्रिः पुण्या रतिविहारिणाम्।
संस्तूयमाना विश्रान्ताः काले निद्रामथात्यजन् ।। ९३ ।।(०६)

सुखोषितास्ते रजनीं प्रातः सर्वे कृताह्निकाः।
सभां रम्यां प्रविविशुः कितवैरभिसंवृनाम् ।। ९४ ।।(०७)

---

(०१) (१/२) यज्ञसेन्याः; परां वृद्धि.; याज्ञसेन्याः; परामिव; (३) चः स्म; तु तान् (For ता);
(४) नातिक्रमनसाभवन्; नातीव्र (नाप्रीत; न प्रीत); मनसोभवत्;( न् ).; प्रमनसः.
(०२) (२) सु; च (For तु ); (३) दत्वा (For कृत्वा); (४) कृत्यादि; कृतानि.; प्रीति- कर्माणि भारत.;.
(०३) (१) कृतास्तिकाः; कृताग्निकाः. (२) भूषिताः; रूक्षिताः; लेपिताः; रूपिताः. (३) सर्वे(For चैव); कल्पा (ल्या )स्तेजस्विनश्चैव.; ब्राह्मणाः.
(०४) (१) मनोन्यम्; अन्योन्यम् ; (For मनोज्ञम्); कृत्वा (For भुक्त्वा); मनोन्तमांशन भुक्त्वा;
(२) स्तरणान्यथ; भवनान्यथ; भवनान्युत; ( शयनान्युत); भवनान्यथाः शयनान्यथ; शयनान्यथा; शरणान्यथा; कल्याणमनसस्तदा;
(३) गन्धर्वैर् (For नारीभिर् ); (४) अवसन्; नारीभिः; सुषुपुः; सुष्वापुः; (For अस्वपन्); कुरुपुङ्गवाः.
(०५) (१)तत्प्राप्य (For सुषुपुः).
(०६) (२) पुण्य.; पतिविहारिणाम्; रतिविहारिणी.; (३) संस्तु (सू) यमाना.; विकान्ता
(४) काल्ये.; अवात्यजन्; अथाभजन्.
(०७) (१) सुघोषितास्.; ते (For तां).; (३) दिव्या (For रम्यां).; प्रविष्टास्ते; (For विशु).;
(४) अभिनन्दितां; नन्दिताः; संवृताः; सम्भृता; इह सम्भृतां;.

अस्मिन्  पर्वणि ५४अध्याये ९४३लोकाः सन्ति

( द्यूतपर्वणि (६) षष्ठोऽध्यायः)

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि द्यूतपर्वणि चतुःपञ्चाशोऽऽध्यायः ।। ५४।।

# ५५.पञ्चपञ्चाशोऽध्यायः

## 02- 06- 55

द्यूतस्यानौचित्यमुद्दिश्य युधिष्ठिरशकुनिसंवादः

वैशम्पायनः

प्रविश्य तां सभां पार्था युधिष्ठिरपुरोगमाः ।*

समेत्य पार्थिवान्मर्वान्पूजार्हानभिपूज्य च ।

यथावयः समेयाना उपविष्टा यथार्हतः ।

आसनेषु विचित्रेषु स्पर्ध्यास्तरणवस्तु च ।

अथ तेषूपविष्टेषु सर्वेष्वथ नृपेषु च ।

शकुनिः सौबलस्तत्र युधिष्ठिरमभाषत ।(०१)

शकुनिः

उपस्तीर्णा सभा राजन वयं त्वेने कृतक्षणाः ।
अक्षानुस्वा देवनस्य समयोऽस्तु युधिष्ठिर ।। १ ।।(०२)

(०१) ( रम्यां (For पार्था). समेदं (For मेत्य). समभ्येत्य; समायाता; समेत्याथ; याता. यथावयसमायत्तो उपविष्टो. श्रद्धास्त (For स्पर्ध्यास्त). पराध्र्घास्तरणेषु च; स्पर्धास्तरणवत्सु च. तेषु तत्र (For अथ तेषु). सर्वेषु च; ष्वेव (For ष्वथ). स्त्वेवं (For स्तत्र).).

(०२) (१) उपास्तिर्णा; उपासीमान्; सभं. (२) नक्तं; सर्वे; उक्ताश्; सभ्याश्; वयं (For रन्तुं). वेते; त्वयि; चैव; त्वेते (For चैते). अक्षा( सर्वे) वै कृतलक्षणा; सर्वार्थकृतलक्षणा(). कृतक्षणा. (३) मुक्त्वा; उस्वा. (४) समयिस्ति; सहायोस्तु. समयऽ

युधिष्ठिरः

निकृत्या देवनं पापं न क्षात्रोऽत्र पराक्रमः।
न च नीतिर्ध्रुवा राजन्किं त्वं द्यूतं प्रशंससि ।। २ ।।(०१)

न च मायां प्रशंसन्ति कृतिन : कितवस्य हि।
शकुने मैव नो जैषीरमार्गेण नृशंसवत् ।। ३ ।।(०२)

शकुनिः

यो तेवेत्ति सख्यं निकृतौ विधिज्ञश्चेष्टास्वखिन्नः कितवोऽक्षजासु।
महामतियो् वगदधानि द्यूतं स वै सर्वं लभते प्रक्रियासु ।। ४ ।।(०३)

अक्षग्रहः सोऽभिवेत्परं न-
स्तेनैव कालो भवतीदमात्थ ।
दीव्यामहे पार्थिव मा विशङ्कां

---

(०१) (१) क- निकृतिर्तेवनं । निकृतिर्; निकृत्या;. (२) अक्षात्रो; क्षत्रो; न क्षात्रं. वा; न (For त्र). अक्षे नात्र पराकमं.

(३) नीतिध्रुवा ( ध्रुवं); नीतिर्ध्रुवं. नीति. नैतन्नी( न्नि)तिविदामि( दां शि)ष्टं; नैतनीतिविदोभीष्टं; अपनीतं ध्रिवा राजन्; अपनीतिर्ध्रुवं राजन्. (४) किं; त्वं. नु; तु; तद् (For तद्वं). घूते; द्रूतंऽ

(०२) (१) क- मासं । महिमानं; न च मायां( मायाः; मावां) (For न हि मानं). (२) कतिनः; कृतिनः; निकृतो. कृतवस्य; वनस्य; किल तस्य. वै; हि (For ह). निकृतौ कितवैस्त्वह; निकृतिन कृतिस्य हि.

(३) मैवं; मालि; मा च; मां च; नैव (For मैव). नो जेषीर्; श्रियान्; निजैषिर् (For नो जैषीर्).

(४) न मार्गेण; (अ)नृशंसवत्; नृशंसवित्.

(०३) (१) योभ्येति; यो वेत्ति; न मेस्ति ( योन्वेति). सख्यं; सङ्ख्या; शङ्कं; सुखान्; सख्यां॰ सख्यान्; सङ्ख्यान्; गुणज्ञ; विधिज्ञै;.

(२) चेष्टाधखिन्नः; सुखं नं; सु खिन्न; स्ववीण; सुखं न; स्वखिन्नं. कितवोष्णजासु. अखिन्न; अक्षजासु.

(३) यो जानाति; यश्च जनोति; यस्य जानाति; योनुजानाति; यो विदधाति; यो न जानाति; योपि दधाति. सम्यक् (For घूतं).

(४) द्यूतंस; ( स)वै; सर्वै (For स वै). सर्वं; सहते. सर्व; सर्वो. ;भते; सह तै (For सहते). कियासु; यातनासु (For प्रक्रि॰).

कुरुष्व पाणं च चिरं च मा कृथाः ।। ५ ।। (०१)

लक्षालङ्कारः-अक्षग्रह इत्यत्र सः अक्षग्रहः अक्षेषु क्रियमाणः पणः अभिभवेत् पराभवं प्रापयेत् । तेनैव पराभवाख्यकारणेनैव कालः विहारकालः भवति । इदं पराभवप्रापणं आत्थ 'अमार्गेणमा नोजैषीरि'ति वदताऽमार्गेण जयस्य त्वयैवोक्तत्वादिति भावः । पाणं पणं कुरुष्वेति क्रियावृत्त्या योजना ।

युधिष्ठिरः

एवमाहासितो राजन् देवलो मुनिसत्तमः।
इमानि शोकद्वाराणि यो वै सश्चरते सदा ।। ६ ।।(०२)

लक्षालङ्कारः-इमानि शोकद्वाराणि इत्यत्र यः मायया कितवैः सह इदं पापं देवनं सदा सञ्चरते, सः इमानि शोकद्वाराणि वित्तव्ययपापादीनि सञ्चरते सम्यगाचरति।

धर्मेण तु जयो युद्धे तत्परं न तु देवनम् ।। ७ ।।

लक्षालङ्कारः-युद्धधर्मेण जयस्तु जय एव । तत् तस्मात्कारणात् तत् युद्धमेव पम् उत्तमम् ।

नार्या नेच्छन्ति भाषाभिर्मायया न चरन्त्युत ।

---

(०१) (१) अक्षग्राहां; ग्रहा; ग्रहा; ग्रह; ग्लह; (अ)भिभवत्; परो नसू; परं न; परं त्वां; परं तु; परांस्त्वं; परास्तु (For परं नस्). अक्षग्लहज्ञोभिभवेत्पुरा त्वं ( त्परांस्तु).

(२) दोषो; दोषेण; कल्यो काले (For कालो). लभति (For भवति). इदमर्थ; इदमाह; इह सौम्य; इतिमार्त्थ; इ पार्थ; इह मत्वा; इह पार्थ; इदमत्थ; इदमर्थं (For इदमात्थ).

(३) दीव्यावहे; देव्यावहे. दिव्य; दिव्य; विशङ्कं; विशङ्क; विशङ्की; शङ्का; च शङ्कां;.

(४) पणं कुरुष्वेह; कुरु प्रमाणं ( पातं) च; कुरु प्रपा( मा)णं च; कुरुष्व. पणं; पाणिं; पाणां; पानं (For पाणं).

(०२) (१) एमाहर्षि च सित; एवमाहा( ह)सितो राजन्; एवमाह( हा) महाप्रज्ञो; एवमाभौ सितो राजन्. (३) लोको द्धाराणि; शोकद्धाराणि; (४) यो वै( वै) भ्राम्यत्यलं ( नं) वशी.

इदं वै देवनं पापं मायया कितवैः सह ।

(१) मं. च; हि (For वै). (२) निकृत्या; निकृत्या; मायया. (३) तु जयेन्; भुजयोर् (For तु जयो). मध्ये; युद्धो (For युद्धे). (४) तं परं; परं तं; तद्धर्मं (For तत्परं). सारि; न तु (For साधु).

अजिह्ममशठं युद्धमेतत्सत्पुरुषव्रतम् ।। ८ ।।(०१)

लक्षालङ्कारः-भाषाभिः म्लेञ्छादिभाषाभिः नेच्छन्ति व्यवहर्तुं नेच्छन्ति ।

शक्तितो ब्राह्मणार्थाय शिक्षितुं प्रयतामहे ।
तद्वै विद्वान् मातिदेवीर्मा जैषीः शकुने परान् ।। ९ ।।(०२)

लक्षालङ्कारः-शिक्षितुं दुर्जनान् शिक्षितुम् । तत् विद्वान् त्वं मातिदेवीः अति धर्ममतिक्रम्य मा देवीः मा जैषीश्च ।

निकृत्या कामये नाहं सुखान्युत धनानि वा ।
किं तवासाद्य निकृतेर्वित्तमेतेन युज्यते ।। १० ।।(०३)

लक्षालङ्कारः- निकृतेः कापटन्यात् कृतेन एतेन देवनेन तव वित्तं अस्य दुर्योधनस्य अद्य युज्यते

---

(०१) (१) क-भार्याभृधन्ति भाणाभिर्मायया विचरन्त्युत ।

क- भार्यमिच्छन्ति वासोभिर्मायया विचरन्त्युत । क- नार्ये दीव्यान्ति भाषाभिः । मृच्छन्ति; नेछन्ति; कृप्यन्ति; दीव्यन्ति; नच्छन्ति; नार्या म्लेछभाषाभः; नार्या तु म्लेछभाषाभिः; भार्यामृच्छ( °च्छ)ति भाषाभिः; भार्यामृ( मि)च्छन्ति वासोभिः. भाषाभिः.

(२) प्र; वि, (अ)नु (For न). च चरन्त्युते; विचरत्युत. (३) अजिह्ममसितं; °मशने; मशहं; शकटं; मशस; युद्धे (For युद्धम्).

(४) सपुरुषव्रतं; सुपुरुष. तत्सर्वं पुरुषव्रतं; तच्च तत्पुरुष

(०२) (१) ब्राह्मणान्नूनं; णा यत्र; णार्थाय; णाश्चात्र; णार्थे यत्; णावा ( णान्वा)यं; णं ते यत्; णार्थे यं ( णानां च);. णार्थे यः (For णान्वन्धाञ्). वयं तु शक्तितो ( क्तिरो) विप्रान्; शक्तितो हि वयं विप्रान्; अशक्तितो ब्राह्मणार्थे.

(२) शक्षितुं; रक्षितुं; शिक्षितं; (३) वो; हि (For वै). विद्वन् ( त्); श्रेयो ( वृत्तं); विद्वान्; द्विजन् (For वित्तं). मादिदेवीर्;. अतिन्देवीर्; मा स्म देवीर्; मतिर्देवीर्; मातिदेवीर्. तद्वै विद्वन्मदर्थे वा.

(४) मा; जैषी. जेषीः; भैषीः परान् (For परम्). जैषी मा शकुने पराकृमात्ऽ

(०३) (१) कामं ये; कामाय; कामे यं; कामा ये (For कामये ). निकृत्या कामये नाहं ( निकृत्या).

(२) सुखानि; धनानि. सुखान्यथ; नि च (For न्युत). बलानि (For धना). च; चा; (उ)त; व; वः (For वा). (३)क- कितवैस्साद्यनिकृतिर् वृत्तिर्मे ते न पूज्यते । क- कितवस्याद्य ।

क- कितवासाद्यनिकृतेर्वृत्तिरेतेन पूज्यते । कितवस्यास्य निकृतेर् ( ते; तै); वस्याप्यभिकृतेर्; वस्येह कृतिनो; वा सद्य विकृतैर्; वा साह निकृतिर्; वस्याद्य निकृतैर्; वा सान्य निकृते; °वा साद्य निकृतैर्; °वा सत्यनिकृतैर्; वै साद्यनिकृतिर्; वै सा अनिकृतिर्; वस्याद्य निकृतेर्.

किमिति योजना ।

शकुनिः

योऽश्रोत्रियस्सुतं चैति निकृत्यैव युधिष्ठिर ।
विद्वानविदुषोऽभ्येति नाहुस्तां निकृतिं जनाः ।। ११ ।।(०१)

लक्षालङ्कारः-अश्रोत्रियः श्रुतितत्त्वमजानानः । सुतः पुत्रः, तं यः श्रोत्रियः निकृत्या अभ्येति, यो विद्वान् अविदुषः निकृत्या अभ्येति, तामेव निकृतिमाहुः । अन्यैः सह निकृतिः न दोषायेति भावः ।

अक्षैर्हि शिक्षितोऽभ्येति निकृत्यैव युधिष्ठिर ।
विद्वानविदुषोऽभ्येति नाहुस्तां निकृतिं जनाः(०२)
अकृतास्त्रं कृतास्त्राश्च दुर्बलं बलवत्तरः ।। १२ ।।(०३)

एवं कर्मसु सर्वेषु निकृत्यैव युधिष्ठिर ।(०४)

एवं त्वं मामिहाभ्येत्य निकृतिं यदि मन्यसे।

---

(४) वृत्तिम्; वित्तम्. एतेन (For एतन्न). युज्यते; शस्यते; पूज्यते. वृत्तं मे तेन युज्यते; वृत्ति तेन पूज्यते; वित्तमेते नियुज्यते; वृत्तिरेतेन पूज्यते; व्यक्तमेतन्न युज्यते; वृत्तिर्मे तेन पूज्यतेऽ

(०१) (१) श्रोत्रियः श्रोत्रियकृते; यो श्रोत्रियसुतं; श्रोत्रियः श्रोत्रियानेति; यो श्रोत्रियं चैति; यो श्रोत्रियानेति; यो श्रोत्रियेनेति; यं श्रोत्रियोभ्येति; यो श्रोत्रियाञ्चेत; यो श्रोत्रियो नेति; यो श्रोत्रियानेति; यो श्रोत्रियं मुक्तं; यो श्रोत्रिययुतः; यो श्रोत्रियमृतं. श्रोत्रियाः अश्रोत्रियं.

(२) निकृत्येव. युधिष्टिर. (३) (अ)त्येति; ह्येति; अभ्येति. विद्वांस्तु विदुषतोभ्येति. विद्वान्, अविदुष, अभ्येति. (४) तन् (For तां).

(०२) (१) क- अक्षाणि । अक्षान्हि; अज्ञान्हि; अशो हि; अक्षांश्च; अक्षाणि; अस्त्राणि (For अक्षैर्हि).

(२) अक्षा हि क्षिपकेयेत्य; अनक्षज्ञं मताक्षः सन्. (३) विद्वानविदुषोत्येति; अक्षाणि शिक्षितष्टेयेति.

(४) नाहुस्ते; नाहुस्तन् (For नाहुस्तां). जवा. ).

(०३) (१) अकृतास्त्रः. कृतास्त्रो वा; स्त्र च; स्त्रश्च; स्त्रं वै (For °खाश्च). कृतासुमकृतास्त्रं वा. बलवत्तरं. वंलवांस्तु सुदुर्वलान्; बलवन्तं सुदुर्बलः कृतास्त्रः; अकृतास्त्रं; वलवान्; दुर्बलं.)

( अविद्वान्विदुषोभ्येति; विद्वांश्च ( श्चा) विदुषो. निहुस्तां.).

(०४) ( युक्तेषु (For सर्वेषु). ) ( विद्वांश्च विदुषो° )

देवनाद्विनिवर्तस्व यदि ते विद्यते भयम् ।। १३ ।।(०१)

युधिष्ठिरः

आहूतो न निवर्तेयमिति मे व्रतमाहितम् ।
विधिश्च बलवान्राजन्दिष्टस्यास्मि वशे स्थितः ।। १४ ।।(०२)

अस्मिन्समागमे केन देवनं मे भविष्यति।
प्रतिपाणश्च  न्यस्तः ततो द्यूतं प्रवर्तताम् ।। १५ ।।(०३)

दुर्योधनः

अहं दातास्मि रत्नानां धनानां च विशाम्पते ।
मदर्थे देविता चायं शकुनिर्मातुलो मम ।। १६ ।।(०४)

युधिष्ठिरः

अन्येनान्यस्यै विषमं वै देवनं प्रतिभाति मे।
एतद्विद्वन्नुपादत्स्व काममेवं प्रवर्तताम् ।। १७ ।।(०५)

**अस्मिन्  पर्वणि ५५ अध्याये १७ श्लोकाः सन्ति**

**द्यूतपर्वणि(७) सप्तमोऽध्यायः**

---

(०१) (१) त्वं; मां. त्वां. भ्येति. (२) निःकृतिं; निकृतं; यदि; मन्यसे.
(३) देवनाद्धि निवर्तस्व. (४) वर्तते (For विद्य°).
(०२) (१) न निवर्तेव; विनिवर्तेयम्. (२) एवं (For इति). (३) बलवन्राज.
(४) दिष्टश्चापि ( स्मि); स्यास्य;. दिष्ट्यास्यास्मि; दिष्टस्यास्ति. वशं. स्थिताः.
(०३) (१) समागते. (३) पणश्चैव हि ( च); प्रतिपाणं च; प्रतिप्राणः. तु (For च). कोन्यस्तु; न्यस्तत्; को न्यस्तः; कोन्योसु; न्यस्ते;. (४) त्वत्तो ब्रूहि प्रवर्ततां.
(०४) (१) दास्यामि (For दाता°). रत्नानि (For नां). (२) धनानि (For नां). विविधानि धनानि च; धनानि विविधानि च. (३) मदर्थ; दीविता. योयं (For चायं).
(०५) (१) अन्यस्यान्येन; अन्येनास्य च; अन्ये नाशस्य. देविस्वं; वै धूतं ( देवत्वं) (For विषमं). अल्पेनान्यस्य देवनं. (२) विषमं (For देवनं).
(३) एवं (For एतद्). विद्वान्; हितान्; शुल्कन्; मत्वा; बुद्धवा; तत्त्वम्; दृष्ट्वा (For विद्वन्).
(४) प्रवर्त्यतां

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि द्यूतपर्वणि युधिष्ठिरशकुनिसंवादे पञ्चपञ्चाशत्तमोध्यायः।। ५९।।**

# ५६. षट्पञ्चाशोऽध्यायः

## 02- 06- 56

वैशम्पायनः

उपोह्यमाने द्यूते तु राजानः सर्व एव ते ।
धृतराष्ट्रं पुरस्कृत्य विविशुस्तां सभां ततः ।। १ ।।(०१)

भीष्मो द्रोणः कृपश्चैव विदुरश्च महामतिः।
नातिप्रीतेन मनसः तेऽन्ववर्तन्त भारत ।। २ ।।(०२)

ते द्वन्द्वशः पृथक्चैव सिंहस्कन्धा महौजसः।
सिंहासनानि भूरीणि विचित्राणि च भेजिरे ।। ३ ।।(०३)

शुशुभे सा सभा राजन्राजभिस्तैः समागतैः।
देवैरिव महाभागैः समुदीर्णं त्रिविष्टपम् ।। ४ ।।(०४)

सर्वे वेदविदः शूराः सर्वे भास्वरमूर्तयः।
प्रावर्तत महाराज सुहृद्द्यूतमनन्तरम् ।। ५ ।।(०५)

---

(०१) (१) प्रयुज्य( ह्य)माने; प्रवर्त°; उपाह्य; उपाद्य° ( उत्पाद्यं ); उपोह्य. उपोह्यमाणः. (२) राजानं. सन्ति (For सर्व). पार्थिवाः; एव हि; एव तु (For एव ते). (४) शुभां; नृप ( पं) (For ततः). विविशुस्तं शुभां सभांऽ

(०२) (१) भीष्मद्रोण; भीष्मद्रोणौ. द्रोण (For द्रोणः). (३) नातिप्रहृष्टमनसस्; नातिप्रतीत°; नातिप्रीतेन मनसा; नैवातिप्रीत ( ति)मनससू; नातिसुप्रीत° ( प्रीतिं); नातीव प्रियमाणास्ते. (४) तेनुवर्तत; तेन वर्तत; तेभ्यवतन्त; ते न्यवर्तत; तेन्ववर्तेत. भारतं. (अ)प्यपवर्तत नित्यशःऽ

(०३) (१) द्वन्द्वशश्च (For ते द्वन्द्वशः). चेति (For चैव). (२) सिंहस्कन्धाः; ग्रीवा.
(४) बि; तु (For च).

(०४) (३) महाराज; महाभोगै. (४) समवेतं; समु(°मि)दिर्ण. त्रिपिष्टपे. त्रिविष्टपं.

(०५) (१) शिष्टा (For शूरा). सर्वे वेद( देव)विशिष्टाश्च. (२) भास्करमूर्तय.

युधिष्ठिरः

**अयं बहुधनो राजन्सागरावर्तसन्निभः ।**
**मणिहारोत्तमः श्रीमान्कनकोत्तमभूषणः ।। ६ ।।(०१)**

**एतद्राज धनं मह्यं प्रतिपाणोऽत्र कस्तव।**
**भवत्वेष क्रमस्तात जयाम्येतद्दुरोदरम् ।। ७ ।।(०२)**

दुर्योधनः

**सन्ति मे मणयश्चैव धनानि विविधानि च ।**

**मत्सरश्च न मेऽर्थेषु जयामैद् दुरोदरम् ।। ८ ।।(०३)**

वैशम्पायनः

**ततो जग्राह शकुनिस्तानक्षानक्षतत्त्ववित्।**
**जितमित्येव शकुनितानक्षान् प्रत्यवद्यन ।। ९ ।।**

**शकुने हन्त दिव्यानो ऊहमानौ सहस्रशः ।**

---

(३) प्रावर्तत; प्रावर्तेते. (४) मुद्ययूतं; अनुत्तरं; प्रवर्ततां (For अनन्तरम्)

(०१) (१) बहुविधो; महाधनो; बहुमतो (For धनो). (२) सागरावर्तसंनिभः. (३) मणिर्हारान्तर (°हारान्तरः) श्रीमान्; मणिहारोत्त( त)रः श्रि; मणिर्दीप्ता( प्तो)र्कसङ्काश; मणिर्हा( हा)रोत्तमः श्रीमान्; मणिहीरान्तरः श्रीमान्; मणिहारोत्तम( °माः)श्रीमान् ( मन्); मणिहारस्तत श्री.

(४) श्रीमान्कनकभूषणः; कनकोत्तमभूषितः; कनकोज्वलज्वणः.

(०२) (१) राज (For राजन्). मम धनं (For धनं मह्यं). (२) परिमाण; प्रतिपाणिः; (अ)स्तु; (अ)स्ति; (अ)त्र (For तु). कश्च व(For कस्तव). तेन दिव्यामहे त्वया. (३) भवत्येष; अभवत्त्वेष; भवत्तेष; त्येव; त्वेतत् (For त्वेष). क्रमस्तावज. येन मां त्वं ( त्वं मां; मा त्वं) महाराज ( भाग); भवत्त्व प्रक्रमस्तावत. (४) जयाम्येतं; म्येतद्; दयाम्येतं (For जयाम्येनं). दुरोत्तरं; दरोदरं; अनन्तरं (For दुरोदरं). धनेन प्रति( °ती) दीव्यसेऽ

(०३) (१) ते (For मे). मणयश्चैवं; प्रनितिश्चैव; विस्मयाश्चैव. (२) रत्नानि (For धनानि). बहुलानि ( च बहूनि); सुबहूनि; विपुलानि (For विविधानि). बहुलानि धनानि च.

(३) मत्परश्च; मात्सर्यं च; मत्समश्च. मत्सर. च (For मे). न मत्सरश्च मेर्थेषु.

(४) जयस्येनं; ययामेनं° जयस्वैनं; जयत्स्वैनं; जयाम्येतं; म्येतद्; म्येतन्; मेतं; मैतं (For म्येनं). दरोदरं. जँ. क्रमस्तावज् (For कम);.

इमे निष्कसहस्रस्य कुण्डिनो हारिणः शतम् ।
एतच्छुत्वा तु शकुनिर्निकृतिं समुपाश्रितः ।[०१]

युधिष्ठिरः

मत्तः कैतवकेनैव यज्जितोऽस्मि दुरोदरे।
शकुने हन्त दीव्यामो ग्लहमानाः परस्परम् ।। १० ।।[०२]

इमे निष्कसहस्रस्य कुम्भिनो भरितं शुभम् ।[०३]

कोशो हिरण्यमक्षय्यं जातरूपमनेकशः।
एतद्राजन्मम धनं तेन दीव्याम्यहं त्वया ।। ११ ।।[०४]

लक्षालङ्कारः-इमे निष्कसहस्रस्य इत्यत्र भरितं अयुतं यथा भवति तथा निष्कसहस्रस्य कुम्भिनः निष्कसहस्रक्रयार्हकुम्भवन्तः इमे अर्थाः। अयुतायुतद्रव्यपरिपूर्णबहुसङ्ख्याकसौवर्णकुम्भान्तरस्स्थापितार्था इति यावत् ।

वैशम्पायनः

इत्युक्तः शकुनिः प्राह जितमित्येव तं नृपम् ।। १२ ।।

कौरवाणां कुलकरं ज्येष्ठं पाण्डवमच्युतम्।*(०५)

---

(०१) (१) गतो (ततो). (२) तानक्षा प्रत्यपघत. (४) तानक्षा प्रत्यपघत. (४) तानक्षान्प्रत्य( नथ)पघत.

(०२) (१) मत्त (गर्वित, ); स्वर्रः (For मत्तः);. केतवकेन; कितवकेन.; (ए)वं; (इ)ह (For (ए)व).; म(मं)त्रकैतवमेवैतद्.; (२) यजितोसि; तेस्मि; यजोतास्मि.

(३) दीव्याम; नि; मि; दी(दि)व्यावो.; (४) सहमानाः; ग्लहमानः; मानौ (नो; जूहमानाः). परस्परं (For सह).

(०३) (सन्ति निष्कसहस्रस्य कुण्डिनो(भाण्डिन्यो) भरिताः शुभाः।)

(०४) (१) अयं; सन्ति; इमा (For इमे).; निष्कसहस्राणां; (२) कुण्डितो; भो; कुण्डिन्यो; मञ्जु (जू)षा; भाण्डिनो; कुण्डले; भाण्डिन्यो; कुण्डिनो भारिता; भरिणा; इरिताः; हा(ह)रिणः; भरितं (भरिताः); भृशं; शुभाः (सति); सुतं ९२ शतम्).; कुण्डिनो भार उन्नतं. (३) कोशं; कोषो (कोटी) (For कोशो).; (४) जातं जातम्; जातरूपम्. अशेषतः (For अनेकशः).; (५) राज (For राजन्).; मम धनं; धनं दिव्यं (For धनं महां).; (६) दी(दे)व्यामहं; दीव्यामहे (For म्यहं).; तथा (For स्वया).

(०५)(श्रेष्ठं (For ज्येष्ठं).) (१) प्रास्य; प्राश्य (For प्राह).; (२) प्रयतानक्षहेतुवित्; तानक्षानक्षतत्ववित्;

जितमित्येव शकुनिर्युधिष्ठिरमभाषत ।*

जितमित्येव नृपते भूयस्त्वं केन दीव्यसे ।*

युधिष्ठिरः

अयं सहस्रसमितो वैयाघ्रः सुप्रतिष्ठितः।
सुचक्रोपस्करः श्रीमान्किङ्किणीजालमण्डितः।(०१)
संह्लादनो राजरथो य इहास्मानुपावहत् ।। १३ ।।(०२)
जैत्रो रथवरः पुण्यो मेघसागरनिःस्वनः ।। १४ ।।(०३)

अष्टौ यं कुररच्छायाः सदश्वा राष्ट्रसम्मताः
वहन्ति नैषा मुच्येत पदा भूमिमुपस्पृशन्।
एतद्राजन् धनं मह्यं तेन दीव्याम्यहं त्वया ।। १५ ।।(०४)

लक्षालङ्कारः-वहन्ति नैषा मुच्येत इत्यत्र एते हयाः यदा भूमिं रणभूमिं पदा उपास्पृशन्, तदा एषा भूमिः पदात् न मुच्येत । रणभूमिं परित्यज्य पलायनं न कुर्वन्तीति भावः ।

---

प्रहसन्पापचेतनः;.

(०१) (१) अह (For अयं);. °समितौः; °संमितो; सहस्रसं (म)मितश्चायं; अयं सहस्रसामिको.; (२) इतो वैः; वैयाघ्रः; सुः;(स)प्रतिष्ठितः; सुप्रदंशनः; सुप्रवर्तिनः; (३) स्व- (For सु-).; सर्वोपक्रमणः; श्रीमान्; सुचक्रोपस्कृतः श्रीं; सुचक्रो भास्करश्री; सुचक्रोपस्करश्री; उपस्करः.

(०२) (१) संह्लादानो; संव्हदनोः; संराः;(ह्ला)जनोः; संह्लादनो; राजपथो; वहो (For रथो).;.

(०३)(२) उपाहरत्; °वहन्; उदावहत्; उदाहरत्; उदावहः; उपावहत्. परहास्माद्युवादह. (३) मम रथः (For रथवरः). (४) निस्वनः.

(०४) (१) अष्टा मे; तं; च(For यं).; कुरुरुत्त्याः; कुरवछायाः; कुलिशप्रायः (°च्छायाः); कुलसपन्नाः; कुमुदच्छायाः; कुललक्षायाः; कुररछाटाः; सुह्मजाः कुवलयच्छायाः;

(२) राष्ट्रवर्धनाः; राजसमताः. (३) नैवमुच्येतः; तेषामप्येक; नै (चै; ते-; चा)षां मुच्ये;(ध्य; व्ये) त; ये न दृश्यन्ते; ये वा प्रजवाः; नैते मुह्यन्ति;(ये); वायुजवाः; नैषां युज्यन्ते; नैशिषां मुख्ये; येन मुच्यन्ते; (For नैषामुच्येत); मुच्येत (वेगेन); नैषा मुच्येत.

(४) पदाद्; पादाद्; पाद-; तदा; पदा. अपि स्पृशन्; उपस्पृशेत्; °शत्; उपास्पृशन्; (उपास्थसन्). स्पृशं;(°श)तश्चरणैर्मही; किश्चिद्धमिं स्पृशन्ति वै; (च; ये).;

(५) मम धनं (For धनं मह्यं).; एतद्राजधनं मह्यं (दिव्यं).; (६) सौबल (For (अ) हं त्वया)

वैशम्पायनः

एवं श्रुत्वा व्यवसितो निकृतिं समुपाश्रितः।
जितमित्येव शकुनिर्युधिष्ठिरमभाषत ।। १६ ।।(०१)

युधिष्ठिरः

सहस्रसङ्ख्या नागा मे मत्तास्तिष्ठन्ति सौबल।
हेमकक्ष्याः कृतापीडाः पद्मिनो हेममालिनः ।। १७ ।।(०२)

लक्षालङ्कारः-हेमकक्ष्या इत्यत्र हेमकक्ष्याः सुवर्णोदरबन्धनोपेताः। कृतापीडाः कृतशिरोलङ्काराः। 'इभस्स्तम्बेरमः पद्मी' इत्यभिधानात् पद्मिनो गजाः ।

सुदन्ता राजवहनाः सर्वशब्दक्षमा युधि।
ईषादन्ता महाकायाः सर्वे इष्टकरेणवः ।।१८ ।।(०३)

लक्षालङ्कारः-इष्टाः करेणवः येषां ते तथोक्ताः ।

सर्वे च पुरभेत्तारो नवमेघनिभा गजाः।
एतद्राजन्मम धनं तेन दीव्याम्यहं त्वया ।।१९ ।।(०४)

वैशम्पायनः

---

(०१) (१/२) एवं (For एतत्).; व्यवसितं (For तो).; निकृतिं; निष्कृतिं (For निकृतिं).; समुपाश्रिताः; समुप (पा); स्थितः; पश्रितः; तमेवंवादिनं पार्थ प्रहसन्नि (न्ने)व सौबलः;

(३) वचो तं (For शकुनिर्).; (४) उवाच ह (For अभाषत); तानक्षान्प्रत्यपद्यतऽ

(०२) (१) नागानां; नागा ये.; (२) एतत्तिष्ठति (For मत्तास्तिष्ठन्ति);

(३) हेमकक्ष्याः(४) पत्तिनो; पद्मिनी; पद्मिनो;. वनं (For हेमं).

(०३) (१) सुदन्ता (तो); राजवदनाः; °भवना; °वसनाः(२) सर्वशब्दसहा; सर्वा (र्वे)शिक्षाक्षमा; सर्वशब्दसमा; सर्वशस्त्र (त्र) सहा; सर्वशस्त्र (ब्द)वहा.

(४) सर्वे प्वेष्ट°; सर्वे चाष्टकरेण च; सर्वे चोष्ट्रकरेणवः; तावत्यश्च कं. इष्टकरेणवः;.

(०४) (१) (ऽ)रे- (For च); रिपुहन्तारो; परिभेत्तारो.; (२) नवं; नवमे (घ.)प्रतिभा-(For नगमेधनिभा).;

(३) राज- (For राजन्);. मम धनं; धनं दिव्यं (For धनं मह्यं); तद्राजन्धन मक्षय्यं.; दीव्यमहं; दीव्यामहे.

इत्येवंवादिनं पार्थं प्रहसन्निव सौबलः।
जितमित्येव शकुनिर्युधिष्ठिरमभाषत ।। २० ।।[०१]

स तच्छ्रुत्वा व्यवसितो निकृतिं समुपस्थितः ।[०२]

युधिष्ठिरः

शतं दासीसहस्राणि तरुण्यो हेमभद्रिकाः।
कश्चुकेयूरधारिण्यो निष्ककण्ठ्यः स्वलङ्कृताः ।। २१ ।।[०३]

लक्षालङ्कारः-कश्चुकेयूर इत्यत्र कश्चुः कश्चुकः ।

महार्हमाल्याभरणाः सुवस्त्राश्चन्दनोक्षिताः।
मणीन्हेम च बिभ्रत्यश्चतुःषष्टिविशारदाः ।। २२ ।।
अनुसेवां चरन्तीमाः कुशला नृत्यसामसु।[०४]

स्नातकानाममात्यानां राज्ञां च मम शासनात् ।। २३ ।।

एतद्राजन्मम धनं तेन दीव्याम्यहं त्वया ।। २४ ।।[०५]

वैशम्पायनः

एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः।

---

(०१) (१) (ए)त्येवंवां.; (२) जितमित्याह सौबलः.

(०२) (३) चोक्त्वा तं (तु); चोक्ता नः;(For शकुनिर्).; (४) उवाच ह (For अभाषत). तानक्षान्प्र (रक्षानप्र)त्यपद्यत.

(०३) (१) दासी ( °स्थः)सहस्राणां; दास्यः (°सि-)सहस्राणि. (२) हेमभूषणाः; हेमभद्रिकाः; वै प्रभद्रकाः; वैत्रभद्रिकाः; मे प्रभद्रकाः; मन्दरूपिणः; हेमभद्रकाः; (For मे प्रभद्रिकाः). (३) सर्वाः; स्वर्ण; शङ्ख; जाम्बु; कश्चु- (For कम्बु-); हारिण्यो(For धारिणयो).; (४) कण्ठाः; कर्णाः;.

(०४) (२) सुवर्णाश. ° चदनोषिताः; (३) मणि- (For मणीन्).; हेमं च; हेमानि.; बिभ्रत्यः;
(४) नृत्यगीतविशारदाः; चतुःषष्टि विशारदाः.

(०५) (१) अनुसेवाः; ° अनुवास; अनु; चरन्तीमा; च रत्नाभाः; चरन्त्येताः; चरून्तीमान्; (२) कुशलौन्.; नृत्य (त्त)कमसु; नृत्यगीतिषु (° तके); नृ (वृ)त्तसामसु; नृतसानुषु.; साम; सामसु.; (३) अमर्त्यानां (For अमात्यानां);
(४) राज (For राजन्). मम धनं; धनं दिव्यं (For धनं मह्यं). (६) दीव्यामह; दिव्याम्य.

जितमित्येव शकुनिर्युधिष्ठिरमभाषत ।। २५ ।।(०१)

युधिष्ठिरः

एतावन्ति च दासानां सहस्राण्युत सन्ति मे।
प्रदक्षिणानुलोमाश्च प्रावारवसनाः सदा ।। २६ ।।(०२)

लक्षालङ्कारः-प्रदक्षिणानुलोमा इत्यत्र प्रदक्षिणानुलोमाः प्रकृष्टानि दक्षिणानि दक्षिणावर्तान्यनुकूललोमान्येषां ते, लक्षणवन्त इत्यर्थः।

प्राज्ञा मेधाविनो दान्ता युवानो मृष्टकुण्डलाः ।
पात्रीहस्ता दिवारात्रमतिथीन्भोजयन्त्युत ।
एतद्राजन्मम धनं तेन दीव्याम्यहं त्वया ।। २७ ।।(०३)

वैशम्पायनः

एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः।
जितमित्येव शकुनिर्युधिष्ठिरमभाषत ।। २८ ।।(०४)

युधिष्ठिरः

रथास्तावन्त एवेमे हेमभाण्डाः पताकिनः।

---

(०१) (१) स तच् (For ° एतम्); व्यवसितं.; (२) निकृतिं; निकृति; समुप(पा)स्थितः; स्वयमाश्रितः; स समाश्रितः (४) उवाच ह (For अभाषत).; तानक्षान्प्रत्यपद्यतऽ

(०२) (१) एतावति च; चैत्ये च; वतो हि; एवं तावन्ति. ° दाशानां; दासीनां.

(२) (अ) पि (For (उ)त).;सहस्राणि वसन्ति मे.

(३) दक्षिण श्चानुलोमाश्च; प्रदक्षिणानुसामाश्च; दक्षाश्चैवानुकूलाश्च; प्रदक्षिणानुलोमाश्च; प्रदक्षिणाः अनुलोमाः;

(४) प्रावारा (प्रवरा)वसनाः (वरणाः) प्रवारवसनाः; °वरणाः; °वदनाः प्रवारः तथा (For सदा).

(०३) (१) प्रज्ञा°; प्राज्ञो; दान्ता; दन्ता (For दक्षा).; (३) पात्रहस्ता; परी°; पात्रि (४) पूजयन्ति (For भोजं).;ये; ते; च; मे; वै (For (उ) त).

(४) राज (For राजन्).; मम धनं; भो धनं दिव्यं; (For धनं मह्यं).; दीव्यामहे (For म्यहं).

(०४) (१/२) व्यवसितं (For °तो); निकृतिः; निष्कृतिं (For निकृतिं).; समुपस्थितः (For पाश्रितः). इत्येवमुक्ते पार्थेनकृतवैरो दुरात्मवान्. (३) उवाच ह (For अभाषत).

हयैर्विनीतैः सम्पन्ना रथिभिश्चित्रयोधिभिः ।। २९ ।।[०१]

लक्षालङ्कारः- हेमभाण्डाः सुवर्णोपकरणानि ।

एकैको ह्यत्र लभते सहस्रपरमां भृतिम्।
युध्यतोऽयुध्यतो वापि वेतनं मासकालिकम् ।। ३० ।।[०२]

लक्षालङ्कारः-एकैकः रथी सहस्रपरमां सहस्रादुपरितनां भृतिं भरणाय कल्पितद्रव्यम् ।

एतद्राजन्मम धनं तेन दीव्याम्यहं त्वया ।। ३१ ।।[०३]

वैशम्पायनः

इत्येवमुक्ते वचने कृतवैरो दुरात्मवान् ।
जितमित्येव शकुनिर्युधिष्ठिरमभाषत ।। ३२ ।।[०४]

युधिष्ठिरः

अश्वांस्तित्तिरिकल्माषान्गान्धर्वान्हेममालिनः।
ददौ चित्ररथस्तुष्टो यांस्तान्गाण्डीवधन्वने।
एतद्राजन्मम धनं तेन दीव्याम्यहं त्वया ।। ३३ ।।[०५]

---

(०१) (१) रथासू; अथ (For रथासू); एवैमे; एवैते (For एवेमे);
(२) हेमदण्डाः; (ड-); महद्दडाः; हैमभाडाः; (३) संयुक्ता (For पन्ना); वाहैः श्वेतैश्च सं.

(०२) (१) ह्यत्र (For यत्र); भजते (For लभ).; (२) परमं धृतिं; °परमाहृति; परमां भृतिं;भृतिं;
(३) युध्यतायुध्यतो वापि; युध्येतोयु;.
(४) स; (सा)मकालिकं; भो सका°; व्यासका°; मासिका°; मास (°सि)कल्पितं;.

(०३) (१) राज (For राजन्). मम धनं; धनं दिव्यं (For धनं मह्यं).;
(२) दीच्याम (°न) हं; दिव्याम्यहं.

(०४) (१/२) उक्ते (For उक्ते).; वचने; धर्मात्मा (For पार्थेन); दुराशयः; दुरात्मवान्. ए (इत्ये)तच्छ्रत्वा व्यवसितो निकृतिं समुपाश्रितः; समुपस्थितः (For पाश्रितः).

(०५) (१) अश्वांस्तित्तिरकल्माषान्; अश्वास्तित्तिरिकल्माषा; (२) गन्धर्वान्; गान्धर्वा;
(४) यांस्तु; एतान्; यांस्तां (For यांस्तान्); गाञ्जीव-धन्विने.

युद्धे जितः पराभूतः प्रीतिपूर्वमरिन्दमः।*(०१)

वैशम्पायनः

एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः।
जितमित्येव शकुनिर्युधिष्ठिरमभाषत ।। ३४ ।।(०२)

युधिष्ठिरः

रथानां शकटानां च श्रेष्ठानां चायुतानि मे।
युक्तान्येव हि तिष्ठन्ति वाहैरुच्चावचैस्तथा ।। ३५ ।।(०३)

एवं वर्णस्य वर्णस्य समुच्चीय सहस्रशः।
क्षीरं पिबन्तस्तिष्ठन्ति भुञ्जानाः शालितण्डुलान् ।। ३६ ।।(०४)

लक्षालङ्कारः-एवं वर्णस्य वर्णस्य इत्यत्र क्षत्रवैश्यादिवर्णस्य समुच्चयसहस्रशः समुच्चयस्य समुदायस्य सहस्रशः सहस्राणि ।

यथा समुदिता वीराः सर्वे वीरपराक्रमाः।। *(०५)

षष्टिस्तानि सहस्राणि सर्वे विपुलवक्षसः।
एतद्राजन्मम धनं तेन दीव्याम्यहं त्वया ।। ३७ ।।(०६)

---

(०१) ( दम °दम (For दमः)) (५) राज (For राजन्); मम धनं; धनं दिव्यं (For धनं मह्य).;
(६) दीव्यामहे; महं (For म्यहं).

(०२) (१) व्यवसितं (२) निकृतिं; समुपस्थितः.

(०३) (२) श्रेष्ठानां; यानानां (For हयानां); अयुतानि; वायुं (For चायु); च (For मे).;
(३) इव तिष्ठन्ति; अवतिष्टन्ते; युक्तान्येव हि (च) तिष्टन्ति; (४) पत्रैर् (For वाहैर्);. वाहैरश्वैः; नृप; भृशं; तथा; हयै (अपि); (For वृताः).

(०४) (१) वर्णस्य सर्वस्य ( पर्णं);एक (एवं)वर्णा विवर्णाश्च; एकवर्णा (र्ण-) विवर्णस्य; एवं वर्णप्रवर्णस्य; एवं सुवर्णवर्णस्य; (२) समुच्चायसहस्रहः; समुच्चयविभागिनः; समुच्चयसहस्रशः; समुच्छ्रयसह°; स मुमोच.

(०५) (१) समुद्धता (For दिता).) (३) पियन्ति; त; तं; तिस् (४) °तदुलान्.

(०६) (१) षप्टयं; षष्टि; षष्टि (For षष्टिस्;); शतस; सन्ति स. (२) सर्व-; नृणां (For सर्वे).; विपुल- (For पृथुल-);वक्षसां (For -वक्षसः); (३) राज- (For राजन्); मम धनं; धनं दिव्यं (For धनं मद्यं).
(४) दीव्यामह; दिव्याम्यहं; दीव्यामहे.

वैशम्पायनः

एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः।
जितमित्येव शकुनिर्युधिष्ठिरमभाषत ।। ३८ ।।(०७)

युधिष्ठिरः

ताम्रलोहैः परिवृता निधयो ये चतुःशताः ।
पञ्चद्रौणिक एकैकः सुवर्णस्याहतस्य वै । ।। ३९ ।।

एतद्राजन्मम धनं तेन दीव्याम्यहं त्वया ।। ४०।।(०८)

जातरूपस्य मुख्यस्य अनर्घेयस्य भारत।*(०९)

**वैशम्पायनः**

एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः।
जितमित्येव शकुनिर्युधिष्ठिरमभाषत ।। ४१।।(१०)

**अस्मिन् पर्वणि ५६ अध्याये ४१ श्लोकाः सन्ति**

**द्यूतपर्वणि(८) अष्टमोऽध्यायः**

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि द्यूतपर्वणि देवने षट्पञ्चाशोऽध्यायः।। ५६।।**

# ५७.सप्तपञ्चाशोऽध्यायः

## 02- 06- 57

---

(०७) (१) व्यवसितं; (२) निकृतिं; समुपस्थितः.

(०८) (१) °लोह- (For °लोहैः); (२) निधनो ये (For मे); चतुःशिलाः; °शतं (For शताः);
(३) पञ्चद्रौणीक; °द्रेणिक; °द्रोणिक; °द्रोणक; °द्रौणिकम्; °द्रौणक; °द्रोणिकम्; एकैकं; एवैकः
(४) हतस्य (For (आ) हतस्य). च (For वै);.

(०९) (१) सर्वं (For मुख्यं).; अनर्घस्य च; अनर्ध्येयस्य सर्वशः(For भारत).)
(५) राज-; राण- (For राजन्); मम धनं (For धनं मह्यं).; (६) दीव्यामहं; °महे.

(१०) (१) व्यवसितं; (२) निकृतिं; समुपस्थितः.

धृतराष्ट्रं प्रति विदुरकर्तृकमुद्बोधनम्

विदुरः

महाराज विजानीहि यत्त्वां वक्ष्यामि मच्छणु ।
मुमूर्षोरौषधमिव न रोचेनहि न ते श्रुतम् ।। १ ।।

योवै पुरा जातमात्रो रूरोद गोमायुवद्विस्वरं पापचेताः।

वैशम्पायनः

एवं प्रवर्तिते द्यूते घोरे सर्वापहारिणि।
सर्वसंशयनिर्मोक्ता विदुरो वाक्यमब्रवीत्।(०१)

दुर्योधनो भरतानां कुलघ्नः सोऽयं व्यक्तं भवता कालहेतुः ।। २ ।।(०२)

गृहे वसन्तं गोमायुं त्वं वै तं तु न बुध्यसे ।
दुर्योधनस्य रूपेण शृणु काव्यां गिरं मम ।। ३ ।।(०३)

मधु वै माध्विको लब्ध्वा प्रपातं नाव बुध्यते ।
आरुह्य तेन सज्जेत वा पतनं वार्दिगच्छति ।। ४ ।।(०४)

लक्षालङ्कारः-मधु वै माध्विक इत्यत्र माध्विको मद्यकर्ता ।

---

(०१) (१) विजानीयाद् (For नीहि).;(२) यत्वा; त्वया (For यत्त्वां).;भारत (For तच्छ्रुणु).;
(३) भेषजम्; औषधिम्; ओषध.;(४) च मे (For ते).;पि वो ध्रुवं; न रोचत यदबुवं; रोचतामपि ते ध्रुवं; रोचतामिह ते क्षुतं; न रोचेद यदमुवन्; रोचते हि (रोचन्तै वि; रोचतेपि) न ते( मे) श्रुतं; न रोचेत (ते (For त्ते) ) वचो मम; रोचतोपि न ते श्रुतं.(एवं प्रवृत्ते द्यूते तु द्यूते घोरे. )

(०२) (१) तद्वै; यो वै (For यद्वै).;रुराव यो; रुरोद (For रुराव);
(२) विस्मरः; र-(For रं).;(३) भरतानां (For भार°).;
(४) यो (For सो).;व्यक्तो; नूनं; व्यक्तं (For युक्तो).;भवतां (ता); भाविता (Forभविता).; नाश (For काल).

(०३) (१) विशन्तं (For वसन्तं).;(२)क- मन्दो । क-नं तु । यं (For त्वं).;सत्यान् (°न्या); मोहान्; तं तु (मन्दो) (For मत्वा).;युध्यसे (For बु°).;स्वमत्या नावबुध्यसे; यन्मोहान्नाव; इमं त्वं नावं; कथं त्वं नावं ;(३) दुर्योधनस्वरूपेण.;(४) क- काम्यां; कार्यां; काव्यां.

(०४) (१) माधुको; मधुहा (°हान्); माध्विकं; माध्विकिर् (कीर्); माध्विको.; बुद्ध्वा; बध्वा (For

सोऽयं मत्तोऽक्षद्यूते मधुवन्न परीक्षते।
प्रपातं बुध्यते नैव वैरं कृत्वा महारथैः ।। ५ ।।(०१)

लक्षालङ्कारः-मधुवत् मधुकर्तृवत् ।

विदितं मे महाराज्ञ स्वे परे वासमञ्जसम् ।

लक्षालङ्कारः-स्वे परे वा इत्यत्र स्वे स्वकीये दुर्योधने, परे धर्मराजे वा असमञ्जसं अन्याय्यम् ।

विषादन्ति च दैवेन देवनेन महारथैः ।

अन्धका यादवा भोजाः समेताः कसमत्यजन्।(०२)

पुत्रं सन्त्यक्तवान्पूर्वं पौराणां हितकाम्यया ।।(०३)

नियोगाच्च हते तस्मिन्कृष्णेनामित्रघातिना ।। ६ ।।(०४)

---

लब्ध्वा).;

(२) प्रापतन्. प्रपातः नैव पश्यति; नैव बुध्यते; नैव ( नाव-) बुध्यसे

(३) मज्जति च वा; तं मुह्यति च; तं मज्जते वा; यं स तस्मात्तु; तं सज्जति वा; तेन सज्जे (ज्ये)त; (अ)तिती मज्जस्व; तेन भज्येत (°ते); तत्र सज्जेत (For तं मज्जति वा). मज्जति.;

(४) च; न (For वा); (अ)भि; (अ)पि; नि- (For (अ)धि).; प्रपातं नावगच्छति;.

(०१) (१) अयं मत्तो; अप्रमत्तो; सोयमुक्तः; सोयं मत्तेन; सोयं मातः;(ऽ) क्षदूतेन; देवनेन (ने वै);(ऽ) क्षद्यूतेन; कैतवेन. देवेन (देवनेन).;

(२) न निरीक्षते; न परीक्षा (क्ष्य)से;नाववीक्षते.;राजलुब्ध() सुतस्तव; प्रभुः सन्न परीक्षते.;

(३) क-प्रापक्य तद् । प्राप्य तद् (For प्रपातं); बुध्यसे. नैष; नैवं.;

(४) कृत्वा वैरं; वैरं कुर्वन्; नाशं कृत्वा. अकारिभिः (For महारथैः)

(६)क- राचसेवाऽ क-स्वपक्षेषु ।.

(०२) (१) मे (For ते).; प्राज्ञ; राजं (For °राज).;(२) भोजेष्वे (षे; स्वे)व; राजंश्चैव (For राजस्वेव).; (अ)समञ्जसा.; भोजेष्वेवेदमञ्जसं; स्वपक्षे वा (क्षेष्व)समञ्जसं; राजसेवासमञ्जसं; स्वपदे वा धनञ्जयं; ज्ञातिसङ्घेसमञ्जसं; स्वे परे वासमञ्जसं.

(०३)(३) अधका; यथैव (For अन्धका).;यादवभोजाः;यादवां.;(४) समेतान्.

(०४) (१) तु (For च).;नियोगाद्धिहिते; गावहते. नियोगात्. कंसे (For तस्मिन्).;(२)क-कर्शिना । कर्षिणा; कर्शिना; घातिनः.;.

एवं ते ज्ञातयः सर्वे मोदमानाः शतं समाः।[०१]
त्वन्नियुक्तः सव्यसाची निगृह्णातु सुयोधनम् ।। ७ ।।[०२]
निग्रहादस्य पापस्य मोदन्तां कुरवः सुखम् ।। ८ ।।[०३]

काकेनेमांश्चित्रबर्हान्शार्दूलान्क्रोष्टुकेन च ।
क्रीणीष्व पाण्डवान्राजन्मा मज्जीः शोकसागरे ।। ९ ।।[०४]

त्यजेन् कुलार्थे पुरुषं ग्रामस्यार्थे कुलं त्यजेत्।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ।। १० ।।[०५]

सर्वज्ञः सर्वभावज्ञः सर्वशत्रुभयङ्करः।
इति स्म भाषते काव्यो जम्भत्यागे समासुरान् ।। ११ ।।[०६]

हिरण्यष्ठीविनः कांश्चित्पक्षिणो वनगोचरान्।
गृहे किल कृतावासान् लोभाद्राजा न्यपीडयत् ।। १२ ।।[०७]

---

(०१) (१) एधन्ते (For एवं ते).;सर्वा (For सर्वे).;(२) मोदन्नाना; मोदन्ते स्म (For मोदमानाः).

(०२) (१) संनियुक्तः; अग्नियुक्तः (For त्वन्नि).;(२) युधिष्ठिरं; धनञ्जयः (For सुयो).;.

(०३) (१) विग्रहाद् .;(४) मोदन्ते.; ज्ञातयः (For कुरवः).;सखा (For सुखम्).

(०४) (१) वर्णान् (For बर्हान्).;विचित्रबर्हान्काकेन (॰न्कालने); विचित्रवाहान्काकेन.;(२) क्रोनकेन; चित्रकेन; क्रोष्ट (ष्ट्र) केन.;(३) वृणीहि (For क्रीणीष्व).;(४) निमज्जीः; मा मज्जेः; माजीजः (For मा मज्जीः ).

(०५) (१) कुलार्थं.; त्यजेदेकं कुलस्यार्थे.; (४) स्वात्मार्थे; ह्या॰ (For आ).

(०६) (१) सर्वस्य (For ज्ञः).;सर्वज्ञः सर्वभाषी च.;(२) सुरशत्रु-; शूरः शत्रु; सर्वशत्रुर्; पुरा शत्रु-; स्फुरः शत्रु; सुशत्रुः सु-.;(३) सम्भाषते (॰तो)(For स्म भा).;(४) जम्भनाशे; जृम्भत्यागे (For जम्भ).; जम्भत्याग-.

(०७) (१) हरिणाष्ठिवनिः; हिरण्यष्ठीविनं; ष्ठीवनः;ष्ठीविना; जीविनः. कांश्चित्-. हिरण्यजीवाः कश्चित्तु; हिरण्यार्थे नवः कश्चित्.;(२) पक्षिणं.; वनगोचरं; राः.(३) गेहे (For गृहे).;किल कृते वासान्; किल कृतावासं; कृतकिलावासान्; किल कृतावासो; किलावसाल्लोभात्; कुलकृतावासान्.;

(४) मोहाद्; लोभाद् . राजन्प्रपीडयत्; राजन्न (राजन्)पीडयेत; राजा न्यपीडयत्; राजन्नघा (॰या) तयत्; राजान्वघात.

सदोपभुग्नो लोभान्धो हिरण्यार्थी परन्तप ।

लक्षालङ्कारः-सदोपभुग्नः वक्रीभूतः ।

आयतिं च तदात्वं च उभे सद्यो व्यनाशयत् ।। १३ ।।(०१)

लक्षालङ्कारः-आयतिं च ददत्त्वं च इत्यत्र ददतो भावः ददत्त्वम् ।

तथात्वकामः पाण्डूनां मा द्रुहः पुरुषर्षभ ।
मोहात्मा तप्स्यसे पश्चात्पक्षि(त्रि)हा पुरुषो यथा।(०२)
एतेन तव नाशः स्याद्बळिशाच्छबरो यथा। ।। १४ ।।(०३)

लक्षालङ्कारः-तथात्वकामः पाण्डूनां इत्यत्र अकामः परवित्तेषु कामनारहितः ।

जातं जातं पाण्डवेभ्यः पुष्पमादत्स्व भारत।
मालाकार इवारामे स्नेहं कुर्वन्पुनः पुनः ।। १५ ।।(०४)

---

(०१) (१) क- सदैव भोज्यांल्लोभात्मा हिरण्यार्थेऽतपत्पुनः । क- सदोऽपि भोग्यांल्लोभान्धो हिरण्यार्थे । सदोपयोगाल्लोभान्धो; स (प )दौपयुज्य लो; सदो( स॰ चो)पभोगलो; स चो(चा)पभुज्य (पीड्य)लोभान्धो (भार्थीः भार्थो; भार्त्तो); स चोपभुञ्जते लोभी; स (ये) दैव लोभाद्धोगात्मा; सदोपभोगा (ज्या)ल्लोभान्तो (ते); सदैव भोज्या (॰गा)ल्लोभात्मा; सदोपभाग्याल्लोभान्धो; सदोपभोग्याल्लोभात्मा.; सदोपभुग्नः (-वक्री- भूतः).;

(२) हरणार्थे; हिरण्यार्थ; हिरण्यार्थी. परन्तपः; तपत्पुनः.(३) आयातं च; आयतीं च.; सदा त्वं च; तदार्थं च; तदा स्वं च; ददत्त्वं च. आयतिं तदात्वं .;

(४) उभं; उभ-; द्वयं; उभौ; स्वयं (For उभे.; विनाशयन्; विनाशयत्; विनाशयेत्; च्यनाशयत्; (ऽ)प्यनाशयत.

(०२) (१) क- तदात्म । तदात्वकामान्; यदात्मकामं; तदात्मकामः; तथार्थ (त्व)कामः;तद (दा) र्थकामः (मा); राज्यकामात् (कामः); तदात्वकामाः.पाण्डवान्; पां(डून्) वा; पाण्डवेयान् ;पाण्डवांस्त्वं; पार्थंस्त्वं (स्तु); पाण्डूनां; त्वं पार्थान् (For पाण्डूंस्त्वं).;

(२) मा द्रुहीर्; मा द्रोहीर् (हि); मा द्रोहो; ह्यते; द्रुह (For मा द्रुहो).; कुरुसत्तम; पुरुषर्षभ (For भरत) मा द्राही.;भव भारत. (३) तप्स्यसे; तप्यते; मोहात्सन्तप्स्यसे ( -तप्यसे; स्पर्शसे); माहात्म्यात्तप्स्यसे; मोहान्मा तप्स्य (प्य)से.;(४) पक्षिणः; पाक्षिकं; अक्षिहा; पत्रिहा; पक्षिहा. ).

(०३) ( शुफरो; शद (॰ह)रो (For शबरो).).

(०४) (१) जातजातं ;(२) पुष्पावादत्स्व; पुष्पमाधत्स्व; पूजामादत्स्व.;(३) इवारामान्; इहारामे.;(४) मैवं कार्षीः ; स्नेहात्कुर्वन्. स्नेहं.

वृक्षानङ्गारकारीव मा च धाक्षो : समूलकान्।
मा गमः ससुतामात्यः ससुहृच्च पराभवम् ।। १६ ।।(०१)

समवेतान्हि कः पार्थान्प्रतियुध्येत भारत ।। १७ ।।(०२)

मरुद्भिः सहितो राजन्नपि साक्षान्मरुत्पतिः।(०३)
युधि जेतुमशक्तो हि पाण्डवान्पुरुषोत्तमः ।। १८ ।।(०४)

विदुरः

द्यूतं मूलं कलहस्यातिधोरं मिथो भेदं महतो वै भयाय ।
यदास्थितोऽयं धृतराष्ट्रस्य पुत्रो दुर्योधनः सृजते वैरमुग्रम् ।। १९ ।।

*५१९ (अधिकपाठः - कपाठे)

दुर्योधने क्रीडति पाण्डवेन

दृष्ट्वा धनं पापमगागतं तत् ।

आनन्दमापश्यसि नैव पातं

महाभयं पुत्रवियोगजं त्वम् ।

तकक न्तयस यूतऽस्मन्मज्जमानान्न पश्यस ।

दुर्योधनापराधेन पुत्रानन्यांश्च भूपते ।।*(०५)

---

(०१) (१) रकार्थीव; रक इव (For रकारीव).; च (For (इ) व).;(२) मैवं; मैव; मा च (For मैनान्).; धक्षीः; धाक्षिः; दार्क्षीः. सुदुर्लभान्; सुमूलकान्.;

(३) सबलामात्यः; स्वसुता; सजना.;(४) सुबलश्च; स्वबल; ससुत; ससुहृच्च; सबलं च; सबलस्त्वं; सधनश्च; सपुत्र.; पराक्रमं;यमक्षयं.

(०२) (१) समवेतो (For °तान्).;समवेतैर्हि कः पार्थैः;.

(०३) (१) मन्त्रिभः (For मरुद्भिः).;(२) पुरन्दरः (For मरुत्पतिः).

(०४)(त्तमान् (For त्तमः).).

(०५) (१) नुयाति; ति(°पि)पापं; भ्युपैहिः; °तिपात; ति (पि)घोरं (रो) (For नुपाति);. (२) भेदो वा; °भिदाय; भेदा; भेदान्; भेदं; भेदोयं;(For यन्); भेद्यं; भेदाय; महतो; महितो (For महते).; दारुणाय; वै भयायः दारुणं यत्; वै; रणाय (For वा रणाय);. रणाय वा; (३) तथास्थितो°; तच्च स्थितो; तदा°; धना; ऽयैं; (४) सृजति (ते) हि; सृजति; सृजतीह (For सृजते).

ज्ञाताः प्रियाः शान्तनवा भैमसेनाः सबाह्लिकाः।
दुर्योधनापराधेन कृच्छ्रं प्राप्स्यन्ति सर्वशः ।। २० ।।(०१)

लक्षालङ्कारः-ज्ञाताः प्रिया इत्यत्र भैमसेनाः भयङ्करसेनासहिताः । 'काम्भोजा बाह्लिका हयाः' इत्यभिधानात्, सबाह्लिकाः सहतुरगाः।

दुर्योधनो मदेनैष क्षेमं राष्ट्रादपोहति।
विषाणं गौरिव मदात्स्वयमारुजतेऽऽत्मनः ।। २१ ।।(०२)

यश्चित्तमन्वेति परस्य राजन्
वीरः कविः स्वामति दृष्टिम्।
नावं समुद्र इव बालनेत्राम्
आरुह्य घोरे व्यसने निमज्जेत् ।। २२ ।।(०३)

लक्षालङ्कारः-नावं समुद्र इव इत्यत्र बालः बालक एव नेता यस्याः ताम्।

दुर्योधनो ग्लहते पाण्डवेन प्रियायसे त्वं जयतीति तथ ।

---

(०१) (१) प्रातिपेयाः; प्रतीपान्वयजाः; प्रतिपीयाः; °पा (प)याः प्रीतिप्रा(पे)याः;प्रातीपी;(पे)याः; प्रातीचायाः; प्रातीविकः; प्रातिपीडाः; °वीर्याः; °वीयाः; ज्ञाताः प्रियाः;

(२) भीमसेनाः; भैमसेनात्; सबाह्लीकाः; (३) सूर्योधना°; °नापराये; (४) कृत्स्नं; कृतं.

(०२) (१) दुर्योधन; वर्तेदेनैव;(For मदेनैव); (ए)ष (For (ए) व); (२) क्षिप्र; क्षेमं; राष्ट्रं व्यपोहति; राष्ट्राद्व्यपो; राष्ट्रादपाहति; अपोहत; (३) बलात्; महान् (त्); महत् (For मदात्);

(४) स्वक(का)म्; स्वरम् (For स्वयम्); आभजते; आरुह्यते; आरुरुजे; आरुहते (For आरुजते). मदात्; (ऽऽ)त्मनः (For बलात्).

(०३) (१) यश्चितयन्वेत्ति; कच्चित्त्वस्तवेति; अन्वेति;

(२) धीरः; वीरः; अभिपत्य; अनीत्य; अवमन्य;(त्य); प्रतिपद्य (अभिपद्य); अभिपद्य; अतिमत्य; अपतीत् (For अतिपत्य);. ऋतेषु निस्वात्मनि मृष्टदृष्टिः.

(३) नादं; नाहं; बालं; (For नावं); समुद्राद्; बालनीत्याम्; चा (बा)लनेयाम्; बालनेत्रीम्; °पोत्रीम्; (४) स मज्जेत्; स मज्जति; निमज्जन् (For निमज्जेत्).

अतिमात्रं जायते सम्प्रहारो यतो विनाशः समुपैति पुंसाम् । २३ ।।(०१)

लक्षालङ्कारः-ग्लहते पणं बध्नाति ।

सर्वाणि मर्माण्यभिसम्प्रहारो यतो विनाशः समुपैति पुंसाम् ।*

आकर्षतेऽ वाक्यबलप्रणीतो हृदि प्रौढो मन्त्रपदः समाधिः।
युधिष्ठिरेण सकलस्तवास्तु सुखप्रदस्सुचिरं ने सुशन्ना ।। २४ ।।(०२)

लक्षालङ्कारः-आकर्षते वाक्यबलप्रणीत इत्यत्र युधिष्ठिरेण वाक्यबलात् प्रणीतः कृतः हृदि प्रौढः प्रौढियुक्तः मन्त्रपदः भविष्यत्कार्याणामालोचनस्य स्थानभूतः सुधन्वा सुष्ठु तव पुत्रस्य धनवान् सकलः समाधिः तूष्णीं स्थितिः तव चित्तम् आकर्षते अङ्गीकारयति । ते सुचिरं सुखप्रदोऽस्तु । कञ्चित्कालं अनेन द्रव्येण सुखी भव । पश्चाद्भाविकार्यं त्वमेवानुभविष्यसीति भावः ।

---

(०१) (१) ग्लहति च; ग्लहते; दुर्योधनो यल्लभते पाण्डवेभ्यः;

(२) पर्यायसे; प्रीया; प्रियायसि; सम्प्रीयसे; प्रियां; स्वं (For त्वं); जयसीति; तं च; पश्च (For तच्च);

(३) क-अतीव न ज्ञायते । अतिनम्रा जायते; इति नर्मा ज्ञायते; अतिनर्मा तज्जयति; अतः समुन्मज्जति; अतिनर्माण्यन्मज्जति; (अतिनर्मा- व्युत्थितः); अतः समुन्मूर्छति; (र्मा (आ) जायते!); अतिनर्माजायते; अतिमान्त्र; (अनन्तरं);जायते; अतीव न (मा; ना-)ज्ञायते (For अतिनर्माज्जायते). अतिनर्मा सम्प्रहरो; सम्प्रहारे; (४) विनाशं- द्यूते (For पुंसाम्).

(०२) (१) क- आकर्षते वाग्बलं संप्रणीतो । क- ऽवाक्फलः । क- आकर्षस्तेऽवाक्फलः कुप्रणीतो . आहर्षस्त; आकर्षयस्ते; आकर्षस्ते; ( आ)र्षस्ते वा; आकर्षते; बार्हलः; स्वे (वा स्वे) धने; वाक्फल; वार्कफलः; वाफलः; फल-; (ऽ)वाक्फलं; वाग्बलं (लः); वाक्फलः; वाङ्मात्रेण फलं यस्मिन्; वाक्यबल-; अवाक्फलः; (नीचगामिफलं). सु; (स)प्रणीतो;(°कोः कु°);ष्णीतो; (कु); सम्प्र;

(२) प्ररूढो; प्रौढं; प्रौढे; पोप्यो; प्रौढो; मन्त्रपदैः; °पथः; °मयः; °पादः; °फलं; °वत्; मन्त्रपदः; यमाधिः; समाधि;

(३) सकलः; सपत्रः(For सफल) सकलाः; सस्नुवतु; पुष्कलस्तवास्तु; कलहः; पस्तवोस्तु; सक(°मु) लस्त;(°स्स)वास्तु (कलहस्ते तु मास्तु); कलहस्तवायं; सर्वकालंस्त (स्त)वास्तुः; सफलः; संस्तवोऽस्त;

(४) सुत्वा सुनीतो; सुप्रस्थरिक्तो सन्नः; रिक्तो; सुम्ने सुरिक्तो; साम्नः; सुऽरक्तो; सूचितो; साम्न; (सम्यक्) सुविः (रि) क्तो; ; तथानुनीता; तथा सुनीतौ; साम्नः सुरिक्तो; (अ) रिमतिः; रित्तेः; (अ) विमतेः(ति); अरिमतेः; अचिंतितो-भिमः(ग) तः स्वबन्धुना; (सुधन्वा); अचिन्तितो वै रमतः; (नियतः); सुधन्वन्; सुखप्रदः; सुचिरं ते (°त; तैः) सुधन्वा (सुधन्वना; सपन्थाः; सुपथा);. सुधन्वा.

प्रातिपीयाः शान्तनवाश्च राजन्
काम्यां वाचं मान्य संसदि कौरवाणाम्।
वैश्वानरं प्रज्वलितं सुघोरं
को युद्धेन प्रज्ञानयिनोतनन्नम् ।। २५ ।।(०१)

यदा मन्युं पाण्डवोऽजातशत्रुर्न संयच्छेदक्षमदाभिभूतः ।
वृकोदरः सव्यसाची यमौ च कोऽत्र स्याना नुमुले वै नदानीम्।। २६ ।।(०२)

महाराज प्रभवस्त्वं धनानां
पुरा द्यूतान्मनसा यावदिच्छेः।
बहुवित्तान्पाण्डवांश्चेज्जयस्त्वं
किं चेदं नस्याद्वसु विन्देह पार्थान् ।। २७ ।।(०३)

---

(०१) (१) प्रातिपेयाः; प्रीतिपीयाः; शारद्वतः; प्रातीपीयाः; प्रादापियाः; प्रातीचीयाः प्रतिपीयाः; प्रातिजय्याः; पातिवीयाः प्रातिपीयाः; शान्तनवशू; श्रृणुध्वं (णु त्वं); च सर्वे; च भीष्मो; च राज्ञः; च राजन्;

(२) काव्यं; काम्यां; (म्या) काव्यां; ममा॰ (For मा); वा (For वः); शृणुत मा स्म कुप्या; शृणुते मां ममाद्य; शृणुता; (णुतां; ॰ण्वता)माद्य कुप्य; संसदि कौरवाणां; शृणुतामत्यसाध्यां; शृणुतामद्य मा प्रज्ञप्य; शृणुते मात्यगाद्धः; शृणुते मां यगाद्ध; द्विमर्य मां च चाद्वत्; शृण मात्यगाद्धः; प्रमदत मात्यगाद्धः; (For शृणुत मात्यगाद्धः); द्रोणश्च शृण्वन्तु वचो ममेदं.

(३) सुज्वलितं; प्रज्वलन्तं; ॰त्वतं; ॰लितं; सुमोघम्; सुघोरम्;

(४) अयुद्धेन प्रशमयोत्पतन्त; अयुद्धे;(बिधे)नैव प्रशमय;(॰माय)चोत्पतन्तं; मा यास्यध्व मन्दमनुप्रपन्नाः;(मन्दं); अयुद्धेन प्रशमयस्वो त्यतन्तं; यन्धेन प्रशमयेतोत्पतन्तं; युद्धेन प्रशम; ॰शमि; ॰शमी;यतोत्प॰; अयुध्य तेन प्रविशदतोत्पतं; को युद्धेन प्रशमयितोत्पतन्तं; अयुद्धेनेव शमस्वोत्पतन्तं; अयुद्धेन प्रशामयस्व.

(०२) (१) वैरं (For मन्युं); (२)क-दक्षमदाभिभूतः । सु (For न).; संयमच्छेद्; संशयच्छेद्; संयक्षेद्; सङ्गच्छेद् (For संयच्छेद्) अक्षमाभिभूतः; अक्षमायाभि॰; अक्षमदाभि; (॰मदावि॰); प्रमदाभि; अक्षमा चाभि;(For अक्षमयाभि); (४) नु (For ऽत्र); कोत्र स्थाताः; क्रोधं मोक्तारः;(च)क्रे कात्रद्वीपाः; कोत्र स्वातौ; कोवस्थाता (For कोऽत्र द्वीपः). द्वीपः; छे स्यात्; तुमले; नस्; वै (For वसू).

(०३) (१) महाराजः; जा; प्रभुर्वै त्वं; प्रभवे (वै)स्त्वं; त्वं प्रभवो; प्रभवत्वं॰; प्रभावः वै धनानां; धनानाम्; (२) विना(For पुरा); द्यूतैद्; द्यूतं (For द्यूतान्); प्रागेव द्यूतान्; द्यूतान्; स्याद; मनसो (For मनसा); यद्यदिच्छेः; वा यदी (॰दि);च्छेत्; यावदिच्छे; यावदिच्छेत; (३) वित्तान् (For वित्तं); चैत्पाण्डवानां;

जानीमहे देवितं सौबलस्य

वेद द्यूते निकृतिं पार्वतीयः।

यतः प्राप्तः शकुनिस्तत्र यातु

मायायोगी  भारत पार्वतीयः ।। २८ ।।(०१)

**अस्मिन्  पर्वणि ५७ अध्याये २८ श्लोकाः सन्ति**

**द्यूतपर्वणि(९) नवमोऽध्यायः ।**

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां  सभापर्वणि द्यूतपर्वणि विदुरवाक्ये सप्तपञ्चाशोऽध्यायः।। ५७।।**

# ५८.अष्टपञ्चाशोऽध्यायः

## 02- 06- 58

दुर्योधनकर्तृकं विदुरस्य भर्त्सनं विदुरकर्तृकं तस्मै सोपालम्भं हितोपदेशनम् ।।

दुर्योधनः

परेषामेव यशसा श्लाघसे त्वं

सदा छन्नः कुत्सयन्धार्तराष्ट्रान्।

जानीमस्त्वां विदुर यत्प्रियस्त्वं

---

पाण्डवाश्चेन् (वास्ते) पाण्डवानां;पाण्डवश्चेत् (For पाण्डवांश्चेत्). जयस्त्वं; जसस्तं; जेयेस्त्वं; जयेस्वं; (For जयेस्त्वं); (४) कं॰ किन्ते तत्; चेदं;(चिद्धं; वं यद्वसु!);(For तेन); वस्तु; बहु; वसु; नेहात्र; विञ्छेह; विन्दे न; विदेन्न;विदे ह; जित्वे(ते)ह; वृन्देन; जित्वेव; विन्देत; विन्देह; कार्यं; तेन; पार्थात्.

(०१)  (१) क- देवनं; जल्पितं; देवितुं (For देवितं). (२) अक्षधूते; देवयूतं (For वेद द्यूते). निः(निष्))कृतिं; निकृतिः पार्थिवीयः. (३)यत्र; ततः; तत्र (For यतः). पार्थः; प्राप्तिः(For प्राप्तः). (४) मा यूयधद्; मा यूयुध्यन्; मा युयुध; (॰धः मा योधयः); मायायुद्धे; मा यूयुधो (मायाप्लवो; मा यूयुधे); मायावोधिः मायायुधो; मायोपधो;  मायायो; (या)गी (For मायायोधी). भूपते; भारतः; भारतं; भवति (For भारत); पार्थिवीयः; पार्वतीयाः(या); पाण्डवे;(॰नी)यान्; पार्वतीयौ; पार्वतीयानूत.

बालानिवास्मानवमन्यसे त्वम् ।। १ ।।(०१)

सविज्ञेयः पुरुषोऽन्यत्रकामो

निन्दाप्रशंसे हि तथा युनक्ति।

जिह्वा त्मनो हृदये निर्णिलक्ति

च्यायो निरीहमनसः प्रातिकूल्यम् ।। २ ।।(०२)

(मनः(कथं) ते हृदयं व्यनक्ति यो न ज्यायसः कृथा मनसः)

उत्सङ्गे च व्याल इवाहितोऽसि

मार्जारवत्पोषकं चोपहंसि।

भर्तृघ्नं त्वां न हि पापीय आहुस्

तस्मात्क्षत्तः किं न बिभेषि पापात् ।। ३ ।।(०३)

---

(०१) (१) एव; एवं; एष (for एव); यशसं; यशः यशसां; यशा; यशसे (for यशसा); श्लाघ्यसे त्वं; (२) यथाच्छन्नः; सदा च नः; यदाच्छन्नः; सदासन्नः; सं(सं)प्रच्छन्नः; सदा क्षत्तः; यदात्थ नः यदच्छिन्नः; सदा छिन्नः; सभाल्गुनः; सदा च व (for सदा छन्नः); कुत्साय; कुत्ससे; कुरुषे (for कुत्सयन्);

(३) जानीमहे; ०मसवा; जानीयसवां; जानीमि ता; जानामि त्वा (for जानीमस्त्वां); विदुरो; विप्रियस्त्वं; न मा प्रियस्त्वां); योप्रियस्त्वं; ममाप्रियत्वात्; यदप्रियत्वात् (for यत्प्रियस्त्वं); यत्प्रियः

(४) बलानिवास्मान्; बालानस्मान् , इव; अप (for अव-); अव-; यत्; च; वै; नित्यमेव (for त्वम्);.

(०२) (१) स विज्ञेयः (य-); अविं; सुखं ज्ञेयः (for सुवि०) पुरुषा; मर्तुकामो; सर्वकामो; ह्यत्र कामो;

(२) निन्दाप्रशन्ते; निन्दां प्रशंसे; निन्दाप्रशंसा; निदास्तुती; ति(for हि); श्र (प्री; श्रे)यसे यथा त्वं; सदृशं युनक्ति (for हि तथा युनक्ति); युनक्ते; व्युनक्ति (for युनक्ति); (३)क- निर्णनक्ति । जिह्वा मनो; जिह्वामने; जिह्वा (०त्वा) कथं ते; जिह्वात्मनो; जिह्वं मनो; महात्मनो; जिह्वानिनो; निन्दात्मनो (for जिह्वा मनस्ते); मनस्; हृदयं; हृदये; व्यनक्ति; युनक्ति; निर्णि (०नि) नक्ति; नं निनक्ति; निर्विनक्ति; निर्ननक्तिः व्यजते ते; निर्म्यनक्ति; (४) प्रायो यो निराह; सम्यग्या वाह; व्ययो निराह; यो यो निराह; यां योत्तरान्; यो न (नः) ज्यायसः कृथाः यो नः कृथाः (कृत्वा); ज्यायोत्तरान्; ज्यायो (ज्यायो हि) निरीह (हं; ०हः) (for ज्यायो निराह); स्वनमा (for मनसः); प्रातिकल्पं; ज्यायःप्रातिकूल्यं। ज्येष्ठप्रातिकूल्यं ।.

(०३) (१) क- उत्सङ्केन । उत्सङ्गे; उत्सङ्गे नु; उत्सङ्गे च (for ड्रेन); नाग (for व्याल); इवावृतोसि; इवोनृतोसि; इवाधृतोसि; ०हितोसि; ०कृतोसि; ०दृतोसि; ०हतोस्मि; ०मृतोसि; ०हृतोस्मि (for ०हृतोऽसि);

(२) मार्जार इव (for मार्जारवत्); मूषकं; मूषि (०ष) कान् (कं) (for पोषकं); चाभिहंसि; चोपहिंसि; नोपहंसि; चाव; चापि हिंसि (for चोपहंसि); मार्जारवत्पोष्यवर्गं निहंसि;

जित्वा शत्रून्फलमाप्तं महन्नो
मान क्षत्तः परुषाणीह वोचः
विद्धिद्धिस्न्वं सम्प्रयोगाभिनन्द
मुहुर्दोषं याहि नः सम्प्रमोहा त् ।। ४ ।।(०१)

अमित्रतां याति परोऽक्षमं ब्रुवन्
निगूहसे गुह्यममित्रसंस्तवे ।
तवाश्रितो यत् त्वरितं न बाधसे
यदिच्छसि त्वं तदिहास्य भाषसे ।। ५ ।।(०२)

साम्ना च दानेन च भेदनेन वधेन मायाप्रतिदर्शनेन ।
न त मिन्द्रजालेन च मोहनेन यूतेन मन्त्रौषधिसाधनेन ।
एभिः प्रकारैरपरैश्च सर्वै राबुद्धिमन्तो विजयन्त्यरातीन् ।(०३)

---

(३) भर्तृघ्नं त्वां; भर्तृन् घ्नत्वा; भर्तृश्चनात्वां; भर्तृघ्नत्वान्; भर्तृघ्नं न हि त्वां; नापि (for न हि); पापीयम्; पापीयसम्; पापीय; किं न क्षत्तर्; किं न क्षत्तः

(४)क- भा तितिक्षन् क्षिपेस्त्वम् । मा तितिक्षु क्षिपस्त्वं (for किं न बिभेषि पापात्);

(०१) (१) हित्वा (for जि); मे; ते; वै (for नो); न हन्मो (for महन्नो);

(२) मा स्मः मा मा; मा नः (for मास्मान्); पुरुषाणां विचेतः (for परुषाणीह वोचः); ह; व्याह (for (इ)ह ); वोच; वाचः (for वोचः); (३) द्विषह्यस्त्वं; द्विषज्यस्त्वं; द्विषभ्यः;

(४) मुधा (for मुहुर्); त्वेषं; दोषं (for द्वेषं); याहि (for यासि); न (for नः); सम्प्रहारात्; ०योगात्; मोहात्; द्वेषं न यासि सम्प्रमोहनात्;.

(०२) (१) अमित्रितां; अमित्रं या (for अमित्रतां); परो (for नरो); (ऽ)क्षमो; परोक्षमधुवन्; नरो ब्रुवन्वै (for नरोऽक्षमं ब्रुवन्); अक्षमं;

(२) निगृह्णतो; गृहसे (ते); न गृह्णते; निगृ (गू) ह्यते; न रंहसे (for निगृह्णते); गृह्यम्; गुप्तम्; कुःहृदि; गुह्यम्; अमित्रसंनिधौ; ०सम्भवे; मित्रसंस्तवात् (for अमित्रसंस्तवे);.

(०३) (३) तदाश्रयापत्रपा; तदाशिापत्रप; तदाश्रिँपह्मप; तदाशिोपत्रप; तो यत्र स; ०तः पार्थिवम् (for तदाशिापत्रपा); तद्, आशिः, अपत्रपा (लज्जा); किं च; किं नु; एव (अव) (for किं न); बाधसे (धावसे) (for बाधते); तवाशिा (तं) यत्त्वरितं न (हि) बाधसे (०ते);

(४) अभि; अप; अस्य (for अद्य); भाषते; भाषसे (अभि);.

मा नोऽवमंस्था विमां मनस्तवेदं
शिक्षस्व बुद्धि स्थविराणां सकाशात् ।
यशो रक्षस्व विदुर त्वं वृणीहि
मा व्यापृतः परकार्येषु भूस्त्वम् ॥ ६ ॥[०१]

क्षत्तः

अहं कर्तेति विदुर मति
मा नो नित्य परुषाणीह वोचः।
न त्वां पृच्छामि विदुर यद्धितं मे
स्वस्ति क्षत्तर्मा तितिक्षुक्षिणु त्वम् ॥ ७ ॥[०२]

लक्षालङ्कारः-जिह्वा मनो हृदयम् इत्यत्र निर्णिनक्ति 'निजिर् शौचपृथग्भावयोः' इति धातोः तव जिह्वा मनः हृदयं च पृथग्भावं प्राप्नोति। 'मनस्यन्यद्वचस्यन्यत्कर्मण्यन्यत्' इति वाक्यार्थमनुकरोषीति भावः । ज्यायः अतिशयितं तव मनसः प्रातिकूल्यं निरीहं निष्फलं इति योजना ।

एकः शास्ता न द्वितीयोऽस्ति शास्ता
गर्भे शयानं पुरुषं शास्ति शास्ता।
तेनानुशिष्टः प्रवणादिवाम्भो

---

(०१) (१) (ऽ)तिमंस्था; विमंस्था; विघ्न (for विघ्न); विमनस्तवेदं; विमनाः (०न) स्तवेमां;
(३) सत्प्रणीतं; सुप्रणीतं; स्य प्र; सम्प्रणीत; स्त्वं प्रणीहिः सम्प्रणीहि (for सम्प्रणीतं); (त्वं वृणीहि);
(४) मात्याहृतः; मा व्यापृतः; मा व्यापृत; माद्यापृतः; मान्यावृतं (for मा व्यापृतः); परकार्येथ (for कार्येषु);.

(०२) (१) कार्तेति; कार्तिकेति; क्षत्तेति (for कर्तेति); विदुरम्; मातिमं (सं) स्था; मा च मं; अतीव मं (for मावमं); (२) मनोः मान्यो (for मा नो); पुरुषाणि (for परु०); ह्यवोच (for ( )ह वोचः); वोच; वाचः; वोचं (for वोचः); (३)क- क्षत्तर्मा तितिक्षन् क्षिपेस्त्वम् । त्वा (for त्वां); विदुरं; (४) स्वस्ति ते (for स्वस्ति); तितिक्षुं; (अ)तितीक्ष्णं; तितिक्षं (०क्ष); तितिक्षून् , क्षण त्वं; शृणुध्वं; किणु त्वं; क्षिपे (प) स्त्वं (for क्षिणु त्वम्); क्षिणु;.

यथा नियुक्तोऽस्मि तथा वहामि ।। ८ ।।(०१)

लक्षालङ्कारः-तेनानुशिष्ट इत्यत्र 'प्रवणः क्रमनिम्नोर्व्याम्' इत्यभिधानात् क्रमेण निम्नभूप्रदेशात् अम्भ इवेत्यर्थः ।

भिनत्ति शिरसा शैलं महीं भेदयते च यः ।
स एव तस्य कुरुते कार्याणामनुशासनम्।
स एव तस्य कुरुते कार्याणामनुशासनम् ।। ९ ।।(०२)

यो बलादनुशास्तीह सोऽमित्रं तेन विन्दति।
यस्सतामनुवृत्तं तु समुपेक्षत्य पण्डितः ।। १० ।।(०३)

लक्षालङ्कारः-यो बलात् इत्यत्र बलात् भृत्यबलतः विचार्य । तस्य राज्ञः।

प्रदीप्य यः प्रदीप्ताग्निं प्रज्वरं नाभिधावति ।

---

(०१) (१) (ऽ)स्तु; हि; (ऽ)ति (for ऽस्ति); शास्ता (ऽस्ति); (२) गर्ते (for गर्भे); शयानः पुरुषः; नास्ति (for शास्ति); यो वै (for शास्ता);

(३) ते च; तेन अतिशिष्टः; अनुशब्दः; अवशिष्टः (for अनुशिष्टः); प्रस्रवणाद्; प्रणवाद्; प्रणयाद्; प्रवाणाद्; प्रवणाद्; (४) क- भवामि करोमि (for वाहामि);.

(०२) (१) निहन्ति (for भिनत्ति); तरसा (for शि); (२) अहिं भेदयते; महीं (मही) भेदयते; अहीन् भोजयते; अहीं भो (०भा) जयते; महिं भोजयते; ति य; हि यः; (ऽ)चलः; पदा (for च यः); अहिं वा भोजयेत्तु यः;

(३) धीरेव; त एवं; स एव; कस्य (for तस्य); कुरुत; कुरुते तस्य;त्वा (वृ) त्तः; तावेव तस्य कुरुतः; (४) कार्यान्नाम्; कार्याकार्यानुशासनं; तावपि तस्य विधेरनुशासनं कुरुत इत्यन्वयः.

(०३) (१) बालान्; बालम्; बलाद्; (२) सोमात्रं; सौमित्रं; सो मैत्रीं; सोऽमित्रं; च न; ननु; न तु (for तेन); विन्दते;

(३) वृत्तताम्; यः सताम्; मित्रताम्; आ (ना) त्मनो यस्तु; अनुवृत्तस्य; अनुवृत्ति तु (for अनुवृत्तं तु); अनुवृत्तिं; मित्रं मोहादनुवृत्तं (तु); मित्रं मोहानुवृत्त तु; मित्रत्वाद (त्वम) नुवर्ततं; योसतामनुसवृत्त; योसमामनुवृत्तस्तु;

(४) समुपेक्षेदपण्डितः; स (त)मूपेक्षत्य (०क्ष्येत्य; ०क्षेत्य; क्षेत) पण्डितः; समुपेक्षेत पण्डित;.

तस्माच्च न स विन्देत शिष्टं कश्चन भारत ।। ११ ।।(०१)

लक्षालङ्कारः-तस्माच्च न स विन्देत इत्यत्र तस्माद् भटात् सः राजा शिष्टं अवशिष्टं कश्चन पुरुषार्थम् ।

न वासयेत्पारवर्ग्यं द्विषन्तं
विशेषतः क्षत्तरहितं चैव मन्ये।
यत्रेच्छसि विदुर तत्र गच्छ
सान्त्वयमानाऽपि ह्यसती स्त्री जिहासनि ।। १२ ।।(०२)

न वासयेत्पारवश्यं द्विषन्तं न विशेषतः ।
कर्तारमिहितं चैव मन्ये यत्रैच्छ कं ।
सुसान्त्वितापि ह्यसती स्त्री जहाति ।।
न वासयेत्परं वर्गं द्विषन्तं च विशेषतः ।*
क्षत्तारमहितं चैव मन्ये यत्रेष्टमिच्छति ।
विदुरात्र न वस्तव्यं गच्छ स त्वं यथेष्टतः ।
सान्त्वमानापि ह्यसती स्त्रीयथा जहाति तथा च त्वम् ।

---

(०१) (१) प्रदीपये; आदीप्य (स-) यः; प्रदीप्य; प्राक्; यः प्रदीपाद्भिः प्रदीप्ताय; प्रदीपाग्निं; प्रविशति; प्रदीप्तारि (रीः; रिं; रं); प्ताद्भि; प्रदीप्ताग्निं; प्रदिप्य सम्प्रदिप्तार्थिः (र्चिः); (२) क- सत्वरं । क- प्रत्यरं । क- प्रदहन्नभि । प्राक्चिरं; प्राक्षवन्; यस्त्वरन्; योत्वरन्; प्र(प्रा)तरन्; प्रक्करं; प्रत्यरिं; प्रज्वलन्; प्रत्वरं (for प्रात्त्वरन्); प्रा (श) प्तुं रत्नानि धावति; प्रमादम (प्रप्तादं सो) प्रत्यरत्नाभिधावति; प्राक् नाभिधावति; (३) नस्यापि; तदस्मापि; भस्माभि; नस्माच्च (for भस्मापि); स न; नस्माच्छिवं स विन्देत; भस्मापीतसंर्विदेत; (४) द्यू (क्व) चन; कश्चन (पुरुषार्य); वा क्व च; किश्चन (for क्वचन);.

(०२) (१) निवासयेत् (for न वा); पारवर्गं (र्गं-); पावक्यं; पारवार्यं; पापवर्गं; द्विषन्तं च; द्विष्टं तं च; विद्विषन्तं (for द्विषन्तं); न वासयेद्वा परवर्ग्यं द्विषन्तं;

(२) कृत्य (कृप) रहितं; शत्रुरहितं; शत्रुहितं; क्षत्तः कुरुहितं (for क्षत्तरहितं); चैव म (मा ) न्ये (for मनुष्यम्); (३) स; यत्रेच्छसि त्वं; यत्रेष्टष्णिछसि (for स यत्रेच्छसि); (४) सुसां (शां) ०त्विता; सान्त्ज्यमानापि (for सुसान्त्वितापि); स्त्री ह्यसती; असती स्त्री (हि); स्त्री असती; ह्यसती (for ह्यसती स्त्री);.

न शसये त्वां परवर्गद्विषन्तं च विशेषतः ।
क्षत्तारमहितं चैव मन्ये यदृष्टमिच्छसि ।
विदुर तत्र गच्छ त्वं सान्त्वमाना ह्यसति स्त्री जहाति ।
न वासयेत्तं पुरुषं न द्विषन्तं विशेषतः ।
न क्षत्तरहितं चैव तव मन्ये यथेच्छसि ।
विदुरं तत्र गच्छ त्वं सान्त्व्यमानो विमुह्यसि ।(०३)
न वासयत्पारवर्ख्यं न द्विषन्तं विशेषतः ।(०४)
क्षत्तारमहितं मन्ये न मन्ये हितमात्मनः ।
सन्त्व्यमाना ह्यसती स्त्री जहाति ।(०५)

विदुरः

एतावता ये पुरुषं सत्यजन्ति
तेषां सख्यमन्तवद् ब्रूम राजन्।
राज्ञां हिं चित्तानि परिप्लुतानि
सान्त्वं दत्त्वा मुसलैर्घातयन्ति ।। १३ ।।(०६)

लक्षालङ्कारः-परिप्लुतानि परितः प्लवन्ति चञ्चलानीत्यर्थः ।

अबालंमां मन्यसे राजपुत्र

---

(०३) यथा जहासति;

(०४) यत्रेच्छसि त्वं विदुर तत्र गच्छ ।

(०५) ( वासये (for ०यत्); पारवश्यन्त (for पारवर्ग्य न); मपि तं (for महितं);).

(०६) (१) पुरुषं ये; ये पुरं; वदन्ति; सन्त्यजन्ति; षं त्यजति ते; (२)क-मन्तवन्तं ब्रवीभि । क-मन्तवत्तह्ब्रवीषि । क- मन्त्रवह्ब्रहि राजन् । सव्य; सङ्ख्यम् (for सख्यम्); ब्रूम राजन्; तद्ब्रवीमि (for ब्रूहि राजन्); तेषां वृत्तं साक्षिवहिराजन्; ते (ये) षां राजन्सख्यमनन्तमाहुः; षां सख्यमन्तवन्तं (०मन्तवत्तं; मन्तमत्तद्) ब्रवीमि; साक्षिवद्ब्रहि राजन् , (३) राजा; ०ज्ञा (for० ज्ञां); हि; वित्तानि (for चि); परिस्तुतानि; परीप्सितानि; परिवृतानि; परितप्लु०; परिप्लुतानि; विप्लुतानि; (४) सातं; सान्त्वैर् (for सान्त्वं); सन्त्वदन्ता (for सान्त्वं दत्त्वा); मुशलैर् मुषलैर्; मुसले;.

बालोऽहमित्येव सुमन्दबुद्धे।
यः सौहृदे पुरुषं स्थापयित्वा
पश्चादेनं दूषयते स बालः ।। १४ ।।(०१)

न श्रेयसे नीयते मन्दबुद्धिः
स्त्री श्रोत्रियस्येव गृहे प्रदुष्टा।
ब्रुवन्न रुच्येद्भरतर्षभाम पतिः
कुमार्या इव षष्टिवर्षः ।। १५ ।।(०२)

लक्षालङ्कारः-न रोचे सेवां न रोचे ।।

अनुप्रियं चेदनुकाङ्क्षसे त्वं
सर्वेषु कार्येषु हिताहितेषु।
स्त्रियश्च राजञ्जडपङ्गुकांश्च
पृच्छ त्वं वै तादृशांश्चैव मुदान् ।। १६।।(०३)

लक्षालङ्कारः-अनुप्रियं चेत् इत्यत्र हिताहितेषु कार्येषु अनुप्रियम् अनुकूलतया प्रियं; हितेऽप्यनुकूलमहितेऽप्यनुकूलमित्यर्थः ।

---

(०१) (१) अ (आ) बाल (०लं) त्वं; अबालं मां; अबालं त्वां (त्वा) (for अबालस्त्वं); राजपुत्रं; (२) हि; (ऽ)यम् (for ऽहम्); इत्येवम्; अस्मीति (for इत्येव); अहमेवेति; अमन्दबुद्धेः स मन्द; सुमन्दबुद्धिः (द्ध); सुमन्द युद्धे; सुमन्दबुद्धेः; (३) सौहृदं; प्रथमं; पुरुषे; ष; (४) दूषयन्ते; दूषयसे (for यते); बाल; बाला;.
(०२) (१) न श्रेयसा; नाश्रयसे; अश्रेयसे; प्रीयते; नायते; नीयसे; धायते; धीमत; धीयते; युज्यसे (for नीयते); मन्दबुद्धे; (२) प्रदुष्टः; स्त्रियः क्षत्रियस्यैव गृह दुटा; (३)क- रुच्येत्पुरुषर्षभस्य च। क- रुच्यै भरतर्षभस्य । क- रुच्यद्भरतर्षभाय । ब्रु (ब्रा) वन्न (for ध्रुवं न); ध्रुवं; रोचे; रोचते; रुच्येद्; रुच्ये; रुच्यै; दूयिष्ये (for रोचेद्); भरतर्षभाय; भस्य; षष्टिवर्गः; षाष्टिवर्षः;.
(०३) (१) क- अयुप्रियं । क- मम प्रियं । अतः (ता) प्रियं; अतः श्रियं; मामप्रियं; अनुप्रियं; अभि (अति-; इतु ) काङ्क्षसे; अनुकाङ्क्षते; (३) स्त्रियं० च; तथा वै (for च राजञ्); जडपुङ्गकांश्च; पंशुकांश्च; ०पङ्गुलाश्च; पङ्कुकांश्च; ०पङ्ककांश्च; पङ्गुकाश्च;
(४) सं (स) पृच्छ त्वं (स्त्वं); पृ (वां) च्छस्व तान् (तान्; त्वं); पृच्छ त्वरन् (for पृच्छ त्वं वै); त्वा (या) दृशाश्चैव; सर्वान्; मूर्धा (for मूढान्);.

लभ्यः खलु पीयोन नरो (नु) प्रियवागिह।
अप्रियस्य हि पथ्यस्य वक्ता श्रोता च दुर्लभः ।। १७ ।।[०१]

यस्तु धर्मपरश्च स्याद्धित्वा भर्तुः प्रियाप्रिये।
अप्रियाण्याह पथ्यानि तेन राजा सहायवान् ।। १८ ।।[०२]

नाप्रियस्साधुर्भवति न मेधावी न पण्डितः।
प्रियेष्वेतानि दृश्यन्ते यावद्वेषो हि भारत ।। १९ ।।[०३]

लक्षालङ्कारः-नाप्रियः साधुर्भवति न मेधावी इत्यत्र अप्रियः यस्य यस्मिन् प्रीतिः नास्ती सः अप्रियः ।

अव्याधिकं कटुजं तीक्ष्णमुष्णं
यथोंषधं परुषं पूतिगन्धि।
सतां पेयं यन्न पिबन्त्यसन्तो
मन्युं महाराज परं प्रशाम्य ।। २० ।।[०४]

---

(०१) (१) प्रातिपेय (०या); प्रातिपीयो; प्रतीपीयः; प्रतीपो यः; च पापीयान्; प्रातिवीर्यो; प्रातिविधो; लभ्यं सदा प्रग्निपीय; लभ्य (भ) ते खलु पापीयान् (लभ्यते); सुलभाः पुरुषा राजन् ,

(२) नरोत्र; सर्वत्र; नरो यः; नरः सु- (for नरोऽनु-); नरः (for इह); नरो अप्रियवागिह; नरो नु (ना) प्रियवागिव; सततं प्रियवादिनः; प्रियवाक; (३) चः हि (for तु);.

(०२) (१) क- पुराद्धस्य । क- परश्वास्य । क- पराश्वास्य । धर्मे समाश्वस्य; में परां स्वस्य; धर्मपरश्च स्याद् (०श्चास्य; श्च स्यान्); धर्म (धर्त्ते; धर्मे) मु (०म) पाश्यि; धर्मपरः शश्वद्; धर्मे परुद्धस्थ; धर्मे परार्थस्य; धर्मं परामृश्य; धर्मे परो हित्वा; धर्मो परच्यस्य; धर्मं पुरस्कृत्य (for धर्मे पराश्वस्य); पराश्वस्य;

(२) प्रियाप्रियौ; (३) (ए)व (for (आ)ह); कथ्यानि;.

(०३) (१) शुभानि (for प्रियेष्वेतानि); (ऽ)थ (for हि);(४)क-यां च द्वेषे च भारत । क-द्वेष्ये पापानि । क- यावद्धर्षो हि । द्वेष्ये पापानि भारत; यान्त्वं द्वेषान्हि भारत;).

(०४) (१) अय्या (स्या) धिकं; कटुजं (०ज-); कटु; करकं; करशकं (for कटुकं ); तीक्ष्नू मुष्णं; शीर्षरोगि (०गं);

(२) यशोमुष्णन्; मुखं; ०जुषं; ययोमुषं; यथौषधं; यशोदूषं (for मुषं); पुरुषं (०ष-); परुषं; ०गन्धिं; ०गन्धं; गन्धिः; यशोमुषं पापफलोदयं च; (३) स्वयं (for पेयं); सन्तापेयं; (अग्निवत्सन्तापकरं); मन्युर् मिव प्रशाम्यः पिबन्मशाम्य; पिब प्रशस्ता; बलप्रवाहं (for पिब प्रशाम्य); पिब; प्रशाम्यं; प्रशाम्य वै;.

वैचित्रवीर्यस्य यशो धनं च
वाञ्छाम्यहं सहपुत्रस्य शश्वत्।
यथा तथा वाऽस्तु मनश्च वोऽस्तु
ममापि च स्वस्ति दिशन्तु विप्राः ।। २१ ।।(०१)

आशीविषान्नेत्रविषान्कोपयेन्न च पण्डितः।
एवं तेऽहं वदामीदं प्रयतः कुरुनन्दन ।। २२ ।।(०२)

लक्षालङ्कारः-आशीविषान् इत्यत्र अशीविषान् सर्पान्, नेत्रविषान् नेत्रयोः कोपाख्यविषं येषां तान् शूरपुरुषांश्च न कोपयेत् ।

अस्मिन् पर्वणि ५८ अध्याये २२ श्लोकाः सन्ति

**द्यूतपर्वणि(१०) दशमोऽध्यायः**

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्या संहितायां सभापर्वणि द्यूतपर्वणि विदुरहितवाक्ये अष्टपञ्चाशोऽध्यायः।। ५८।।**

# ५९.एकोनषष्टितमोध्यायः

श्रीमन्महाभारततात्पर्यनिर्णये एकविंशाध्याये

---

(०१) (१) विचित्रः; वैचित्र्य (for वैचित्र०); शरो (for यशो); हि (for च); (२) जाना० (for वाञ्छां); (

३)क- नसश्च तेऽतु । यथा यथा; तथा तथा (for यथा तथा); वास्तु; तेस्तु; ते सु; (ए) वास्तु (वोऽस्तु); मनश्च वोस्तु; नम (नभे) श्च तेस्तु; शिवं च वोस्तु; यशः शिवं च; तथैव राजन्; मनः शिवोस्तु (for नमश्च वोऽस्तु); (४) च; वः स्वस्ति; स्वस्ति प्र (for च स्वस्ति); देवाः; सन्तः (for विप्राः);.

(०२) (१) आशीविषाः दृष्टिविषाः; (२) कोपयेत न; येन्न च; ०यिर्न तु (for येन्न तु); (३) एतत् (for एवं); (इ)ह; (ए)ष (for ()दं);

(४) प्रियं च; त्वत्प्रियं; न मन्ता; वदतः; भवतः (for प्रयतः); कुरुनन्दनः नावमन्ता कुरूद्वह; द्यूत; विदुरवाक्यं (बुद्धिः); दुर्योधनविदुरवाक्यं;.

विदुरस्तु ततो गत्वा धर्मराजमथाऽह्वयत् ।
भ्रातृभिर्वार्यमाणोऽपि कृष्णया च स धर्मराट् ।
सार्द्धं मात्रा भ्रातृभिश्च कृष्णया च ययौ द्रुतम् ।।३०२।।
ज्येष्ठाज्ञयैव विदुर आह्वयन्नपि धर्मजम् ।
नाऽगन्तव्यमिति प्राह दोषानुक्त्वाऽक्षजान् बहून्।।३०३।।
इतीह दोषसञ्चयस्तथापि ते पितुर्वचः ।
समीक्ष्य तद्वयं स्वयं कुरुष्व कार्यमात्मनः ।।३०४।।
इतीरितोऽपि पाण्डवो ययौ कलिप्रवेशतः ।
विचित्रवीर्यजं च तं समासदत् ससैनिकः ।।३०५।।
कल्यावेशान्नृपतिः प्रतिजज्ञे पूर्वमेव धर्मात्मा ।
आहूतो द्यूतकरणान्निवर्तेयं नैव वारितोऽपीति ।।३०६।।
तेनाऽयात् स्वसुहृद्भिर्निवार्यमाणोऽपि नागपुरमाशु ।
न हि धर्मो द्यूतकृतो विशेषतः क्षत्रियस्य लोकगुरोः।।३०७।।
वैचित्रवीर्यतनयेन तु पाण्डुपुत्राः
सम्भावितास्तमुप च न्यविशन् निशां ताम् ।
प्रातश्च भीष्ममुखराः सकलाश्च भूपा
आसेदुराशु च सभां सह पाण्डुपुत्रैः ।।३०८।।
वैचित्रवीर्यनृपतिर्विदुरान्वितोऽस्य
गान्धारराजसहितास्तनयाः सकर्णाः ।
प्राप्ताः सभातलमथाऽह्वयदत्र धर्म-
राजं सुतः सुबलकस्य स देवनाय ।।३०९।।
सर्वांश्च तत्र कलिराविशदेव भीम-
पूर्वान् विनैव चतुरः सपृथां च कृष्णाम् ।
क्षत्तारमेव च ततो न हि भीष्ममुख्यै-
स्ते वारिताः कुलविनाशनकर्मवृत्ताः ।।३१०।।

भीमादिभिः स विदुरेण च वार्यमाणो
द्यूते निधाय पणमप्यखिलं स्ववित्तम् ।
गान्धारकेण विदिताक्षहृदा जितो द्राक्
पाण्डोः सुतोऽथ नकुलं न्यदधात् पणाय ।।३११।।

दुश्शासनेन द्रौपद्याः सभानयनम् । तस्याः वचनम् ।

## 02- 06- 59

शकुनिः

बहु वित्तं पराजैषीः पाण्डवानां युधिष्ठिर ।**
आचक्ष्व वित्तं कौन्तेय यदि तेऽस्त्यपराजितम् ।। १ ।।(०१)

युधिष्ठिरः

मम वित्तमसङ्ख्येयं यदहं वेद सौबल ।
अथ त्वं शकुने कस्माद्वित्तं समनुपृच्छसि ।। २ ।।(०२)

अयुतं प्रयुतं चैव निखर्वं खर्वमर्बुदम् ।
प्रखर्वं च निखर्वं च समुद्रं चात्र सौबल ।
एतन्मम धनं राजन् तेन दीव्याम्यहं त्वया ।। ३ ।।(०३)

---

(०१) (१) पुराजैषं (for पराजैषीः ); (१) युधिष्ठिरः;
(४) ( अ) पराजयः; पराजितं; (अ)पराजयं; यद्यस्त्येव पराजितं; यद्यस्त्येव पराजितं;यदि दियस्तु पराजितं;.
(०२) (१) सम-; बहु (for मम ); (२) तदहं; यदिदं; यदयं (for यदहं );
(३/४) अधसवं; अतस्त्वं; अदत्तं (for अथ त्वं ); पश्चाद्; तस्माद् (for कस्माद् ); कस्मात् वित्तं; मामनु (for समनुं );.
(०३) अयुतं प्रयुतं चैव पद्मां खर्वमथार्बुदम् । प्रखर्वं च निखर्वं च शङ्ख चैव निखर्वं कोटिरेव च ।
(१) अयुतं; नि (for प्र०० ); (२) शकु पद्मं; (शङ्कपद्मसू); पद्मं खर्वं; अथ (for तथा ); निखर्वं (नियुतं) खर्वमर्बुदं; (३) प्रखर्वं च; खर्वं चैव (for शङ्खं चैव ); समुद्रं च; परार्धं च; महापद्मं (for निखर्वं च ); निखर्वं चैव (for चाथ) शङ्खं चः; कचं प्रतिकचं चैव; कचप्रं (प्र-) निकचप्रं च; (४) समरं (for समुद्रं );

मध्यं चैव परार्धं च सपरं चात्र पण्यताम्।(०१)

कबन्धं निकबन्धं च सागरं चात्र पण्यताम् ।(०२)

वैशम्पायनः

एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः।
जितमित्येव शकुनिः तानक्षात् प्रत्यपद्यन ।। ४ ।।(०३)

युधिष्ठिरः

गजाश्वं बहुधेनूकमसङ्ख्येयमजाविकम्।
यत्किञ्चिदनुपर्णाशां प्राक्सिन ध्दोरिति सौबल ।। ५ ।।(०४)

एतन्मम धनं राजन् तेन दीव्याम्यहं त्वया ।। ६ ।।(०५)

वैशम्पायनः

एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः ।*
जितमित्येव शकुनिर्युतातक्षात् प्रत्यपद्यत ।। ७।।*

युधिष्ठिरः

---

पण्यानां; पश्यतां;सौबलः; वर्ण्यतां (for पण्यताम् ); महापद्मं च कोटयः; समर्थानुपपद्यते; निखर्वं कोटिरे(मे) व च; महापद्मानि कोटिशः;.

(०१) कठं च निकठं चैव; कबन्धं निकवन्धं च । सपुरं (for सपर ; समरं चानुपश्यताः समं चानुपसह्यते; समं चैवानुपश्यतां; समं चानुपयुज्यते; समं चानुपपद्यतेः समं चानुपमद्युतेतश्च ।);).

(०२) (कचध्वं निकचध्वं च; कटं च निकटं चैवम्; परमं; अपरं; सपरं(for सागरं); (५) एवं (for एतन्); महा- (for मम); राजन्मम धनं; (६) दीव्यामहं, दीव्यामहे, दिव्याम्यहं;.

(०३) (१) व्यवसितं; न्यवसितो; (२) निःकृर्तिं; निश्रुतिं (for निकृतिं); समपद्यत; समुपासृतः; समुपस्थितः; स समाश्रिः; तानक्षान्प्रत्यपद्यत;(४)क- ग्रधिविरमभाषत ।।.

(०४) (१) गावश्च; गवाश्व-; गजाश्व-;(श्रं); गवां च (for गवाश्वं ); बहु खच्छेतद्; बहूधेनुकम्; बहुधेनुकम्;बहुधेनुकम्; बहुधेनूनाम्; (२) अपर्यन्तम् (forअसङ्ख्येयम्);
(३) अनुप (व )र्णाशां; (सां); अमनु(व)ष्याणां अनुवर्णास्तां (for अनुवर्णानां ); .

(०५) (१) प्रोसिन्धोर; प्राक्सिद्धेर्; इति; इव (for अपि ); (२) राजन्मम धनं; सर्वं (for राजंस्); (६) दीव्यामहं, दिव्याम्यहं ;.

पुरं जनपदो भूमिरब्राह्मणधनैः सह ।*
अब्राह्मणाश्च पुरुषा राजञ्शिष्टं धनं मम ।*
एतद्राजन्धनं तेन दीव्याम्यहं त्वया ।। ८ ।।

वैशम्पायनः

एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः ।*
जितमित्येव शकुनिर्युतानक्षान् प्रत्यपद्यत ।। ९ ।।*

युधिष्ठिर

राजपुत्रा इमे राजञ्शोभन्ते ञ्चभूषिताः ।
कुण्डलानि च निष्काश्च सर्वशश्चाङ्गभूषणाः ।। १० ।।

एतन्मम धनं राजंस्तेन दीव्याम्यहं त्वया ।। ११ ।।

वैशम्पायनः

एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः।
जितमित्येव शकुनिर्युधिष्ठिरमभाषत ।। १२ ।।[०१]

युधिष्ठिरः

पुरं जनपदो भूमिरब्राह्मणधनैः सह ।
अब्राह्मणाश्च पुरुषा राजञ्छिष्टं धनं मम।
एतद्राजन्मम धनं तेन दीव्याम्यहं त्वया।[०२]

वैशम्पायनः

एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः।

---

(०१) (१) व्यवसितं; (२) वःकृतिं; समुप(०पा) स्थितः, (४) तानक्षान्प्रत्यपद्यत; जितमित्यवभाषत;.
(०२) (१) जनपदाभूमिर्; जयपथो भूमिर्; जनपदोपेतं; अब्राह्मणजनैः; न ब्राह्मणधनैः (४) शिष्टं मतं; शिष्टधनं; (५) मम धनं (for धनं मह्यं ); एतन्मम धनं राजत; (६) दीव्यामहं, दिव्याम्यहं ;.

जितमित्येव शकुनिर्युधिष्ठिरमभाषत।(०१)

युधिष्ठिरः

राजपुत्रा इमे राजञ्छोभन्ते यैर्विभूषिताः।

कुण्डलानि च निष्काश्च सर्वं राजविभूषणम्।

एतन्मम धनं राजंस्तेन दीव्याम्यहं त्वया।। (०२)

वासांसि च महार्हाणि सर्वमन्यद्विनायुधैः ।।*(०३)

युधिष्ठिरः

श्यामो युवा लोहिताक्षः सिंहस्कन्धो महाझुतिः।

नकुलो ग्लह एवैको एतद्वै मद्धतं धनम् ।। १३ ।।(०४)

शकुनिः

प्रियस्ते नकुलो राजन्राजपुत्रो युधिष्ठिर ।**

अस्माकं धनतां प्राप्तो भूयस्त्वं केनेह दीव्यसे ।। १४ ।।(०५)

वैशम्पायनः

एवमुक्त्वाऽथ शकुतिस्तानक्षान् प्रत्यपद्यत।

---

(०१) (१) व्यवसितं; (२) निकृतिं; विकृतिं; दो समुपस्थितः (४) तानक्षान्प्रत्यपद्यत;.

(०२) (२) राजन्ते; शोभने; शोभनैर् (for शोभन्ते ); ये विभूषिताः; यैर्विभू; वै० विभूं; ये सभू; यैश्च भू; येनुभू (for येन भू ); (३) च निष्कांश्च; धनं निष्काः;(ष्कं); विसृष्टानि (for च निष्काश्च ); (४) चैवाङ्गभूषणं; राजविभू; चाङ्गदभूं; ( अङ्ग-) चे(वे) ;दं विभू;(for चाङ्गविभू ); सर्वश(त)श्चाङ्गभूषणाः राजुंस्तेन दीव्याम्यहं त्वया ।* ।९ ह्यस्याः । ऽङ्के .

(०३) (५) एतद्राजन् (ज) धनं मह्; एतद्राजन्मम धनं; दीव्यामहं;दिव्याम्यहं;.

(०४)(२) महाद्युतिः; बलः (for भुजः ); (३)क- अर्भक एवैकः । ग्रह; पण (for ग्लह ); एको वै; एवैकः (for एको मे ); नकुलो ग्रहणे चैक; (४) विद्यते; सङ्गतं; मद्गतं; तद्गतं (for स्वगतं ); विच्येतन्मम; (त) तद्धनं;यच्चास्यां(यस्य चां ); तर्गतं धन; एतद्वै मद्गतं धनं;.

(०५)(३) क- अकस्माद्धनतां प्राप्तो भूयस्त्वं येन। अकस्माद्; स कस्माद् ;(for अस्माकं ); निधनां; वशतां; धनदां; (for धनतां );

(४) केनेह; त्वं येन; त्वं तेन (for त्वं केन); दीव्यसे; दिव्यसि; मन्यसे (for दीव्यसि );.

जितमित्येव शकुनिर्युधिष्ठिरमभाषत ।। १५ ।।[०१]

युधिष्ठिरः

अयं धर्मान्सहदेवोऽनुशास्ति
लोके ह्यस्मिन्पण्डिताख्यां गतश्च ।
अनर्हता राजपुत्रेण तेन
दीव्याम्यहं चाप्रियवत्प्रियेण ।। १६ ।।[०२]

शकुनिः

माद्रीपुत्रौ प्रियौ राजंस्तवेमौ विजितौ मया।
गरीयांसौ तु तौ मन्ये भीमसेनधनञ्जयौ ।। १७ ।।[०३]

युधिष्ठिरः

अधर्मं चरसे वै त्वं यत् ते नावेक्षिताः वयम्।
यो नः सुमनसां मूढ विभेद यितुमिच्छसि ।। १८ ।।[०४]

शकुनिः

---

(०१)(१/२) एतद् (for एवम् );(अ) थ; च; ( अ )पि; स (for सु); तानक्षाञ्शकुनिः तद्राजशशकुनिः प्रत्यदीव्यत (तः); ०पातयत् (for पद्यत ); (३) च पुनर् (for शकुनिर्; (जितमित्येव); महाभारते द्यतपर्व.

(०२) (१) (ऽ) नवश्मस्ति; (२) (ऽ)स्मिन्त्रैः; अस्मिन् (for ह्यस्मिन्);

(३)क- सोबल । सौबल (for तेन);

(४) दीव्याम्यहं च (च; ०महे त्वां); दीव्याम्यहं हि (for त्वया दीव्यामि); प्रियवत् (for (अ) प्रियत्); च; प्रियेण;.

(०३) (२) तनेमौ (for तवेमौ); विजितम्; विदितौ (for विजितौ); त्वया; वयं (for मया);

(३) तौ; तं (for ते); सम्यग (for मन्ये);.

(०४) (१) क- यत्नेना क-यत्ते तापेक्षिता यथा?। अधर्म्यं;०र्मान् (for अधर्म); मन्यसे, वद; (for चर ); मूढ; पापो; न रवं; नस्त्वं; पाप; वै त्वं; (for नूनं);

(२) न वे (वै)क्षसि; नावेक्ष्यसि; संसदि; नो भयं; सौहृदं (नो वयः); (for वै नयम्); नावेक्षसि च साहृदं; यर्ते (येन; यत्ते)नावे(पे)क्षिता वयं;

(३) सो (for यो) सुमनसो; सुमनसा; (४) अर्हसि (for इच्छ); भेदं कर्तुमिहे-च्छसि; विभेदयितुमिच्छसि; भेदं (for विभेदं );.

गर्ते मत्तः प्रपतते प्रमत्तः स्थाणुमृच्छति।
ज्येष्ठो राजन्वरिष्ठोऽसि नमस्ते भरतर्षभ ॥ १९ ॥(०१)

स्वप्ने तानि न पश्यन्ति जाग्रतो वा युधिष्ठिर ।
कितवा यानि दीव्यन्तः प्रलपन्त्युत्कटा इव ॥ २० ॥(०२)

युधिष्ठिरः

यो नः सङ्ख्ये नौरिव पारनेता
जेता रिपूणां राजपुत्रस्तरस्वी।
अनर्हता लोकवीरेण तेन
दीव्याम्यहं शकुने फाल्गुनेन ॥ २१ ॥(०३)

वैशम्पायनः

एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः।
जितमित्येव शकुनिर्युधिष्ठिरमभाषत ॥ २२ ॥(०४)

शकुनिः

अयं मया पाण्डवानां धनुर्धरः

---

(०१) (१) क- मत्तः प्रपतितः प्रमत्तः स्थाणुम-च्छति । क- मत्तः प्रपतति प्रमत्तश्चानुमूर्च्छसि । मन्दः (for मत्तः); प्रपतते; प्रत(०ति) पति; (२) मत्तश्च (for प्रमत्त ); स्थाणु (चानु) मूर्छति; स्थाणुमिच्छति; स्थाणुमर्छति; बहु भाषते;(से); स्थाणुमर्चति; स्थातुमि; (०मृ) च्छति; स्थाणुं ऋच्छति (आर्छति);

(३) श्रेष्ठो; ज्येष्ठो (ष्टभ्गं); राजा; राज; भ्राता (for राजन् ); गरिष्ठो (for वरिष्ठो);

(४) पुरुष (for भरतं);.

(०२) (१) तानि न;(ऽ)पि (for न ); नश्यन्ति; स्वप्नवत्तानि; पश्यन्ति; जायते (for जाग्रतो); विवशा (for कितवा ); यदि; (अ) द्यापि; चापि (for यानि); दीव्यन्ते; दिव्यन्तः; दीव्यति; (for दीव्यन्तः );

(४) प्रपश्यन्ति (for प्रलपन्ति ); ( उ) त्कटानि च; एवमुक्ता स शकुनिर्;.

(०३) (१) सङ्घे; सङ्ख्ये (for सङ्ख्ये); पारगाणां (नां); पारं नेता; पादभेत्ता; यो नः सङ्ख्ये नौरिवापारनेता; रिपून्; (अ) रीणां (for रिपूणां ); राजपुत्रासू; ०पुत्रान्; पाडुपुत्रसू (for राजुत्रस्);

(३) राजपुत्रेण (for लोकं); (४) दीव्यामहं, महे, दिव्याम्यहं फाल्गुनेन (फल्गुणेन;); चार्जुनेन;.

(०४) शकुनिः; (१) व्यवसितं; (२) निःकृतिं; निहति (ह ); समुपस्थितः; ०पशिः; (४) तानक्षान्प्रत्यपद्यत;.

पराजितः पाण्डवः सव्यसाची ।
भीमेन राजन्दयितेन दीव्य
यत्कैतवं पाण्डव तेऽवशिष्टम् ।। २३ ।।(०१)

युधिष्ठिरः

सेनां नो संयुगार्थः प्रणेता यथा वज्री दानवशत्रुरेकः।
तिर्यक्प्रेक्षी सङ्गतभ्रूर्महात्मा सिंहस्कन्धो यश्च सदात्यमर्षी ।। २४ ।।(०२)

वलेन तुल्यो यस्य पुमान्न विद्यते
गदाभृतामान्य इहारिमर्दनुः ।
अनर्हेता राजपुत्रेण तेन
दीव्याम्यहं भीमसेनेन राजन् ।। २५ ।।* (०३)

वैशम्पायनः

---

(०१) (१) क- राजा । पराजितः; युधि; सर्वधनुर्धराणां; निर्जितः पाण्डवानां (for पाण्ड० धनु० );

(२) पारिजातः; वरोजितः; धनुर्धरः; (for पराजितः ); फाल्गुनः; (for पाण्डवः );

(३) भीमसेन; भीमसेनेन; भीमो (for भीमेन ); मम तेन; दयितस्तेन (for दयितेन ); दिव्य; दीव्यतां (for दीव्य);

(४)क-यज्जेतव्यं पाण्डव ते विशिष्टम् । यत् (तत्)कैतवं; यज्जेतव्यं; यन्नेतव्यं; अजेतव्यं; यत्ते द्रव्यं; विरिष्टं; वरिष्टं; ते विशिष्टं;.

(०२) (१) क-स लो लेतासंयुगान्तप्रणेता । स नो; सेना-; सयानो; सेनां (for यो नो ); जेता (for नेता ); आयुधानां; युयुधानः; यो युधि नः; युधि नः सं-; संयुगान्त; संयुगानां;संयुगार्थं; संयुगान्तं (for यो युधां नः );

(२) तथा (for यथा ); जयी (for वज्री; दावानां शत्रुर्; दानवः; शत्रुर् (for दानवशत्रुर);एवं (for एकः) दानवशत्रुमध्ये; दानवान्देवशत्रन्; (for दानवान्शत्रुहतादानवशत्रुरेकः)

(३) तिर्यक्प्रेक्षिः (क्षि); संहरन्भ्रूर्; संहित; संनतभ्रर्; सङ्गतभ्रर् (for सहतभ्रद् ); तिर्यप्रेक्ष-णीयं हतभ्रू; (४) सिंहग्रीवो (for स्कन्धो ); च (for यश्च ); स (स);त्यमर्षी; (अ) प्य-मर्षी; ह्यामर्षी; (अ) त्यदृष्टिः; त्वमर्षी (for (अ) त्यं );.

(०३) (१) बले (for बलेन ); तुल्ये; (ऽ)पि; (ऽ) स्य (for यस्य); प्रमा (for पुमान् ); न विद्यते पुमान् ; (२)क- भृताम्र्य । क- भााता । अग्रिर्; अग्र; आद्य;मान्य (for अग्र्य); इव (इह); ०मर्दी (for मर्दनः ); (३) अगर्हता; लोकवीरेण (for राज; ); (४) दीव्यामहे,दिव्याम्यह;.

**एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः।**
**जितमित्येव शकुनितानक्षान् प्रत्यपद्य ।। २६ ।।**(०१)

शकुनिः

**बहु वित्तं पराजैषीर्भ्रातृंश्च सहयद्विपान्।**
**आचक्ष्व वित्तं कौन्तेय यदि तेऽस्त्यपराजितम् ।। २७ ।।**(०२)

युधिष्ठिरः

**अहं विशिष्टः सर्वेषां भ्रातृणां दयितस्तथा।**
**कुर्याम ते पणं द्यूते स्वयमात्मन्युपग्रहे ।। २८ ।।**(०३)

वैशम्पायनः

**एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः।**
**जितमित्येव शकुनिर्युधिष्ठिरमभाषत ।। २९ ।।**(०४)

शकुनिः

**एतत्पापिष्ठमकरोर्यदात्मानं पराजिनः।**
**शिष्टे सति धने राजन्पाप आत्मपराजयः ।। ३० ।।**(०५)

---

(०१) (१) व्यवसितं; (२) निष्कृतिं; निष्कृतिं; समुपस्थितः; (४) क-र्युधष्टिरमभाषत । क- निकृतिं समुपाक्षितः । तानक्षान्प्रत्य(; (०ति )पद्यत;.

(०२) (१) इह (for बहु ); दत्तं (for वित्तं ); पराजैषं; इहाजैषं; (२) सहयान्द्विपान्; सहजप्रियान्; पूः, सह बान्धवैः;सहयद्विषान् (for द्विपान्); भ्रातृभ्यः सहयद्विपान्; भ्रातृंश्चैव; हयद्विपान्; (४) वा; चे (for ते );.

(०३) (१/२) सर्वेषां भ्रातृणां; भ्रातुंश्च (for भ्रातृणां ); तदा; सदा (for तथा);

(३) क-कुर्यामस्ते जिता : कर्म स्वयमात्मन्युपग्लहे । क- कुर्यामस्ते जितां कर्म स्वयमात्मन्युपप्लुवे । क- कुर्याम ते जिताः कर्म स्वयमात्मन्युपप्लवौ । कुर्यां वै; कुर्यामहं; कुर्या (र्या) त्वया; कुर्यामेतेः कुर्यान्मते; कुर्या तु ते; कुर्याम ते; जितः कर्म;जितं कर्म; पणं द्यूते (for जिताः कर्म ); कुर्यां जितस्त्वया कर्म; (४) अस्मिन् (for आत्मनि ); (उ)पप्लुतः; (उ)सम्प्लवं; (उ) पप्लवे; प्लुते;०प्लवौ; ग्लहे (for ०प्लवे ); स्वयमात्मामां म (य) म ग्लहः;.

(०४) (१) व्यवसितं; (२) निःकृतिं; समुपस्थितः; (४) तानक्षान्प्रत्यपद्यत;.

(०५) (१) अकरोद् (for अकरोद् ); (२)कः पारजितम् । यमात्मानं; आत्मानं यत्; पराजयेः; ०जयः;

वैशम्पायनः

एवंजित्वा मताक्षस्तान्ग्लहे सर्वानवस्थितान्।
पराजयं लोकवीरा अवैक्षत पृथक्पृथक् ।। ३१ ।।(०१)

शकुनिः

अस्ति ते वै प्रिया देवी ग्लह एकोऽपराजितः।
पणस्व कृष्णां पाञ्चालीं तयाऽऽत्मानं पुनर्जय ।। ३२ ।।(०२)

युधिष्ठिरः

नैव ह्रस्वा न महती नै कृष्णा नरोहिणी।
सारागरक्तवसना च तया दीव्याम्यहं त्वया ।। ३३।।(०३)

शारदोत्पलपत्राक्ष्या शारदोत्पलगन्धया।
शारदोत्पलसेविन्या रूपेण श्रीसमानया ।। ३४ ।।(०४)

तथैव स्यादानृशंस्यात्तथा स्याद्रूपसम्पदा।

---

अजीजयः; पराजितं (for जितः ); यदात्मानमहारयः; (थ); आत्मनं यदहावयः (३) शिनष्टे (? शिष्टे० नष्टे) यतिधने राजन् , (४) आत्मापराजयः; (यं); पापात्मानं पराजयः; ० ग्लह एको पराजित; पापो ह्याप्मपराजय;.

(०१) (१) तु तानक्षान्; महाक्षस्तान्; मतानक्षान् (for मताक्षस्तान् ); तद् (for तान् ); (२) गृहे; स हि (for ग्लहे ); व्यवस्थितान्; उपास्थि (for अवस्थि ); ग्रह एकोपरोहिणि; (३) पराजयं; यंल्); पराजयन्तो; अ (आ )वाजयल; (यं); अवानयल्; पराजयन्; अपाजयल् (for परा); (४) क- पराजितम् । उत्त्वा राजन्; तरक्षेपेण; क्षणेनैतान्- अथा (अद्या )क्षैस्तान्; उत्त्वा राज्ञां; ताक्षैः स;अक्षानुध्वा; अक्षान्क्षि३वा; अथाक्षिप्तान्; अवै (वे) क्षत (for आक्षेपेण);.

(०२) (१) ते वै; ते हि; त्वेकाः (इ) त्येका; परा;प्रियो (for प्रिया ); राजन्; भार्या (for देवी; (२) ग्लहा एवापराजिताः; ग्लह एकोपराजयः; (३) पणश्च; ग्लहस्व; प्रणस्व (for पणस्व ); (४) तथा (for तया ); पुरं (for पुनद्);.

(०३) (१) नाति (for नैव); नातिदीर्घा नातिह्रस्वा; (२)क- नातिकृष्णा . नैव ( नास्ति) कृष्णा; न रोगिणि; न कृशा (०ष्णा); नाति (०पि )रोहि (०गि )णी; नातिरोहिणी (नातिरक्ता );

(३) (इ)व; (ए)व (for च ); सारङ्गरक्तनेत्रा च; सा रागरक्तनेत्रे च; सा रागरक्तवस्त्रेणः नीलकुञ्चितकेशी; ( शा) च; या सा रागाक्त(त्त )वसना; साराग (सराग; सरागा) रक्तवसना; सरागरक्तवसनया; दिव्यां, देव्यां;.

(०४) (३) ०वासिन्या (for सेविन्या );.

तथा स्याच्छीलसम्पत्त्या यामिच्छेत्पुरुषः स्त्रियम्   ।। ३५ ।।[०१]

सर्वैर्गुणैर्हि सम्पन्नामनुकूलां प्रियंवदाम्।
यादृशीं धर्मकामार्थसिद्धिमिच्छेन्नरः स्त्रियम्।।  ।।[०२]

चरमं संविशन्ती या प्रथमं प्रतिबुध्यते।
आ गोपालाविपालेभ्यः सर्वं वेद कृताकृतम्   ।। ३६ ।।[०३]

आभाति पद्मवद्वक्त्रं सस्वेदं मल्लिकेव च ।
वेदीमध्या दीर्घकेशी ताम्रास्या नादीलोमशा   ।। ३७ ।।[०४]

वैशम्पायनः

धिगित्येव वृद्धानां सभ्यानां निःसृता गिरः ।*
भीष्मद्रोणकृपादीनां स्वेदश्च समजायत ।*
गृहीत्वा विदुरो गतसत्त्व इवाभवत् ।*
आस्ते ध्यायन्नधोवक्त्रो निः श्वसन्पन्नगो यथा ।*
धृतराष्ट्रस्तु संहृष्टः पर्यपृच्छत्पुनः पुनः ।
जितं किं जितमिति ह्याकारं नाभ्यरक्षत । ।

---

(०१) (१) दद्यैव स्याद्; तथैवास्या (for तथैव स्याद् ); आनृशंस्या; तथैवास्यानृशंस्यात् तथैवस्थामानृशंस्यात्; (२) तथास्या; (for तथा स्याद् ); स्वार्थसम्पदा; रूपसम्पदा- (३) तथास्या (स्याः); यथा स्याल; शीला (रूप) सम्पन्नाः; बिलसम्पत्त्या; पु (त )त्रसपत्त्या (०न्ना) ०; लीलं; (४) यथेच्छेत्; य इच्छेत्; यनिच्छेत्;यामिच्छे; पुरुषं; ष श्रियं; प्रियं; श्रियः ना(या )स्ति योषित्समा क्वचित्;.

(०२) (वदं (०क्य वदाम् ); धर्मकामार्थे; सर्वकामानां; धर्मकामार्थां (for कामार्थ- );.

(०३) (१) क- सञ्चरन्ती । क- संविशन्ती । संविष्टे (for चरमं); संविशत या; संविश(०श) ती (०ति) या; संविशति; (२) प्रविबुध्यते; प्रतिपद्यते; या प्रबुध्यते; च प्रबुध्यति; (०से; ०ते); त्वप्रबुध्यति; प्रतिबुध्यति; (३) आ गोपालाधिपा; आ गोपालविपा; (४) जानाति (for वेद); सर्वलोककृतां;.

(०४) (१) यस्याः; पद्मनिभं वक्त्रं; आभाति पद्मवक्त्तंर च (स ); (२)क- समिमिता। क- सौरभ्यात् । क-नस्मिता । अखेदं; सखेदाः संस्वेदो; सस्वदा; सुस्मिता; सौरभ्यान्; सस्मिता; (गौडपाठे); संमोदो (for सस्वेदं ); मल्लिकेन च; (३) वेदिमध्या; (४) ताम्रास्याः ताम्रो (०म्रौ)ष्ठी (for ताम्राक्षी); न रोमशा; नातिलोमशा; सा निरोमशा;.

तयैवंविधया राजन्पाञ्चाल्याहं सुमध्यया।
ग्लहं दीव्यामि चार्वङ्ग्या द्रौपद्या हन्त सौबल ।। ३८ ।।[०१]

वैशम्पायनः

एवमुक्ते तु वचने धर्मराजेन धीमता।
धिग्धिगित्येव वृद्धानां सभ्यानां निःसृता गिरः ।। ३९ ।।[०२]

चुक्षुभे सा सभा राजन्राज्ञां शोको महानभू ः।
भीष्मद्रोणकृपादीनां स्वेदश्च समजायत ।। ४० ।।[०३]

शिरो गृहीत्वा विदुरो गतसत्त्व इवाभवत्।
आस्ते ध्यायन्नधोवक्त्रो निश्वसन्नुरगो यथाः ।। ४१ ।।[०४]

बाह्लीकः सोमदत्तश्च प्रातिपीयस्सः सञ्जयः।
द्रौणिभूरिश्रवाश्चैव ययुत्सुर्धृतराष्ट्रजः।
हस्तौ पिंषन्नधोवक्त्रा निःश्वसन्त इवोरगाः ।। ४२ ।।*[०५]

जहर्ष कर्णोऽतिभृशं सह दुःशासनादिभिः ।*
इतरेषां तु सभ्यानां नेत्रेभ्यः प्रापतञ्जलम् ।
सौबलस्त्वविचार्यैव जितकाशी मदोत्कटः ।*
जितमित्येव तानक्षान्पुनरेवान्वपद्यत ।

---

(०१) (१) वितथा (for विधया ); (२) पाञ्चाल्या च; ल्यालं; ०ख्यातं; ऽन्यैव (for ०ल्याह); सुसन्धया; (३) दास्यामि (for दीव्या०); (४) (अ)हं तु; (अ)हं च;० हत (for हन्त);.

(०२) (१) इत्येवमुक्ते वचने; (२) धीमता (for भारत); (३/४) दिग्दिग् (for धिग्धिग्); वृद्धां; सभ्या; निर्गता; निसृ (स्त्रु)ता; (for निःसृता );.

(०३) (२) कथा; शुचः (for कथाः );राज्ञां शोको महानभूत्; (४) ०पद्यत (for ०जायत);.

(०४)(२) हतं (for गतं ); इवार्त्तवत् (for इवाभवत्); (४) निश्वसन् ,; इव पन्नगः; उरगो यथा (for पन्नगो यथा );.

(०५) (प्रातिवीर्यः; पेयः (for ०पीयः ); आस्तौ वीक्षन् (for हस्तौ पिङ्क्षन्);).

धृतराष्ट्रस्तु सं हृष्टः पर्यपृच्छत्पुनः पुनः।
किं जितं किं जितमिति ह्याकारं नाभ्यरक्षत ।। ४३ ।।(०१)

जहर्ष कर्णोऽतिभृशं सह दुःशासनादिभिः।
इतरेषां तु सभ्यानां नेत्रेभ्यः प्रापतज्जलम् ।। ४४ ।।(०२)

सौबलस्त्वभिधायैवं जितकाशी मदोत्कटः।
जितमित्येव तानक्षान्पुनरेवान्वपद्यत ।। ४५ ।।(०३)

**अस्मिन् पर्वणि ५९अध्याये ४५ श्लोकाः सन्ति**

**द्यूतपर्वणि(११)एकादशोऽध्यायः ।**

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि द्यूतपर्वणि द्रौपदीपराजये एकोनषष्टितमोऽध्यायः।। ५९।।**

# ६०.षष्टितमोऽध्यायः

श्रीमन्महाभारततात्पर्यनिर्णये एकविंशाध्याये
तस्मिन् जितेऽथ सहदेवमथार्जुनं च
भीमं च सोमकसुतां स्वमपि क्रमेण ।
राजा निधाय विजितोऽथ सुयोधनः स्वं
सूतं दिदेश पृषतात्मजपुत्रिकायाः ।।३१२।।
सूतो गत्वा तदन्तं समकथयदिमां द्यूतमध्ये जिताऽसि

(०१) (१) सुसंहृष्टः; तु तं हृष्टः; सुतं हृष्टः; (४)क-भूत्वारत्नान्यगण्यत । क- व्याहरन् । आकारं; नाकारं; (ए) वाकारान् ,; व्याहरन्; व्याकारं) (for ह्याकारं); आकारं; नाम्य-रक्षित; सोभ्यरक्षत (ति); नभ्यगूहत; ०गृह्यत (for ०रक्षत); ह्माकारां ताभ्य-गृह्णतः; भूत्वा रत्नान्यगूहत;.
(०२) (१) जहास (for जहर्षर); (३)स्व; च (for तु); योद्धानां (for सभया); प्रपतज्ज्लं.
(०३) (१) (अ) विचा (०वा)यैवं; (अ) भि-धायैव; (अ) भिधायैवं; (अ) वधत्यै (यै) वः (अ) विचार्येव; विचार्यः;(र्ये)व; सौबलसवद्धिचार्येव; (२) जितभाषी; कासी; ०काम- (for काशी); महोत्कटं; (३) जितमेवेति (for ०मित्येव); शकुनिर् (for तानक्षान्); (४) अभ्य० (for अन्व०); युधिष्ठिरमभाषत;.

क्षिप्रं चाऽयाहि राज्ञां समितिमुरुतरामित्यथो साऽप्यवादीत् ।
नाहं यास्ये गुरूणां समितिमिति ययौ सोऽप्यमुं भीमभीतं
ज्ञात्वा दुःशासनं सोऽप्यदिशदथ नृपो धार्तराष्ट्रोऽनुजं स्वम् ।।३१३।।
स पापपूरुषोत्तमः प्रगृह्य केशपक्षके ।
पुरः स्वमातुरानयत् सभामयुग्मवाससीम् ।।३१४।।
समाहृता रजस्वला जगाद भीष्मपूर्वकान् ।
अधर्म एष वार्यते न धर्मिभिर्भवद्विधैः ।।३१५।।
कथं छलात्मके द्यूते जिते धर्मजयो भवेत् ।
न हि द्यूतं धर्म्यमाहुर्विशेषेण तु भूभुजाम् ।।३१६।।
येऽधर्मं न वदन्तीह न ते वृद्धा इतीरिताः ।
अवृद्धमण्डितां नैव सभेत्याहुर्मनीषिणः ।।३१७।।
कथं द्यूते जिता चाहमजिते स्वपतौ स्थिते ।
समानधर्मिणीमाहुर्भार्यां यस्माद् विपश्चितः ।।३१८।।
सहैव कर्म कर्तव्यं पतौ दासे हि भार्यया ।
दासीत्वं न पृथङ् मे स्याज्जितेऽपि हि पतौ ततः।।३१९।।
इत्युक्ता अपि भीष्माद्याः कल्यावेशेन मोहिताः ।
पृच्छ धर्मजमित्युक्त्वा तूष्णीमेव बभूविरे ।।३२०।।
दुर्योधनप्रतीपं हि न कश्चिदशकत् तदा ।
उवाच विदुरस्तत्र न धर्मोऽयमिति स्फुटम् ।।३२१।।
न तस्य वाचं जग्राह धृतराष्ट्रः सहात्मजः ।
ऊर्ध्वबाहुः स चुक्रोश देवानां ख्यापयंस्तदा ।।३२२।।
स्वाशक्तिं द्रौपदीं चाऽह जिता नैवासि धर्मतः ।
अधर्मो हि महानेतां सभामाक्रम्य तिष्ठति ।।३२३।।
एवं तु विदुरेणोक्ते विकर्णः पापकोऽपि सन् ।
आह डम्भार्थमेवात्र धर्मवित्त्वं प्रकाशयन् ।

अधर्म एवायमिति कर्णोऽथैनमभर्त्सयत् ।।३२४।।

# 02- 06- 60

विदुरकर्तृकं दुर्योधनभर्त्सनम् । द्रौपदीपराजय; पाण्डवपराजयः; ।।

दुर्योधनः

एहि क्षत्तर्द्रौपदीमानयस्व
प्रियां भार्यां सम्मतां पाण्डवानाम्।
सम्मार्जतां वेश्म परैतु शीघ्रं
आनन्दो नस्सह दासीभिरनु ।। १ ।।(०१)

विदुरः

दुर्विभाव्यं भवनि त्वादृशेन
न मन्द सम्बुध्यसि पाशबद्धः।
प्रपाते त्वं लम्बमानो न वेत्सि
व्याघ्रान्मृगः कोपय ते हि बाल्यात् ।। २ ।।(०२)

लक्षालङ्कारः-दुर्विभाव्यम् इत्यत्र देवमिति शेषः ।।

---

(०१) (१) जिता (for एहि); (२) सततं; संमता; पाण्डवस्य; (३) सन्मार्जा(जर्य)तां; सं( स )मार्यतां; यौधिष्ठिरं; संमार्जता; साम्राज्यतां; संमार्जितां; संमार्ज्यतां; पुरैतु ; परे तु; परैस्तु; पुरे तु; वरे तु; परैत;

(४) सामान्य (न्या )मस्याः (for आनन्दो नः);अद्य (for अस्तु); तत्रास्तु दासीभिरपुण्यशीला ( आनन्द तत्रास्तु);.

(०२) (१) क- न दुर्विभाव्या भवति त्वादृशेन न मन्दबुद्ध्या सितपाशबद्धः ।
क- न दुर्वीभाष्या भवति त्वादृशेन । दुर्वि न; दुर्विभाषं; भाष्यं; भवति हि; भाषितं; भविता (for भवति); त्वादृशे तु (for शेन);

(२) ननु (for न); न कन्दरं (for न मन्द); सम्बुध्यसे; पापबुद्धिः; पापबन्धं; पाशिबद्धः; पाशबद्धं (बन्धं; हस्तं);

(३) प्रपात; प्रपातं; पापते; प्रापाते; प्रवाते; तं (for त्वं); लङ्घमानो; लम्बमाने; (ऽ)पि (for न);

(४) व्याघ्रं; कोपयामीव बाल्यात्; कोपयसे(यस्य)तिवेलं; कोपयसीह (सीव; सि ह) बाल्यात्;

आशीविषानेत्रविषान् पूर्णकोपान् महाविषान् ।
मा कोपिष्ठाः सुमन्दात्मन्मा गमस्त्वं यमक्षयम् ।। ३ ।।[०१]

लक्षालङ्कारः-आशीविषान् इत्यत्र अशीविषान् सर्पान्, नेत्रविषान् नेत्रयोः कोपाख्यविषं येषां तान् शूरपुरुषांश्च न कोपयेत् ।

न हि दासीत्वमापन्ना कृष्णा भवितिति धर्मतः।
अनीशेन हि राज्ञैषा पणे न्यस्तेति मे मतिः ।। ४ ।।[०२]

अयं धत्ते वेणुरिवात्मघातं
फलं राजा धृतराष्ट्रस्य पुत्रः।
द्यूतं हि वैराय महाभयाय
पक्वं न बुध्यत्ययमन्तकाले(लम्) ।। ५ ।।[०३]

नारुन्तुदः स्यान्न नृशंसवादी
न चानि भीतः परमाददीत।
ययास्य वाचा पर उद्विजेत
न तां वदेदुषतीं पापलोक्याम् ।। ६ ।।[०४]

लक्षालङ्कारः-नारुन्तुदः स्यात् इत्यत्र 'अरुन्तुदं तु मर्मस्पृक्' इत्यभिधानात् अरुन्तुदो मर्मस्पर्शी

---

कोपयते हि (तीह; तेति)बाल्यात;व्यग्रो नागः कोपयतीव (ते हि) बाल्यात्;.

(०१) (१) शि(श )रसि ते; अशीविषां चिरस्थितां (तान्); विषाभिर सितान् ; विषाञ्छिरसि युतान्; विषान् शिरस्थितान्; विषाच्छि( न श)रसि तान् ,; (२) पूर्णकोपा; कोषा; भोगा; कामा; पूर्ण(महा)कोपान्महाविषान् (कोपा षान् ); (३) मा; मो (for मा);कोपयिष्टा;स (for सु); सुमन्दधीः; मन्दमते (बुद्धिर्); तु मन्दात्मन् ,; मा कोपयिषुर्मन्दात्मन् ,; (४) तान्मा गास्त्वं; आगमस्त्वं; मा गमंस्त्वं;.

(०२) (१) दासत्वम्; दासि; आपन्नां; (२) योग्या (for कृष्णा);धर्मतः (for भारत);कृष्णा भवितुमर्हति; (३) अनाशेन; आनी; राज्ञेषा; राज्ञेह; (४) पण्ये; पण; पण्य; दाये मतः;.

(०३) (१) क-आयं धत्ते वेणुरिवात्मधाती फलं राजा धृतराष्ट्रस्सपुत्रः । मत्तो (for धत्ते); रिवाघाती; रिवात्मघाति; रिवार्थघाती; रिवात्मनाशकः; रिवात्मघातं (तिं); वदात्मघोरं; (२) राज्ञा; राष्ट्रः सुपुत्रः; राष्ट्रः सपुत्रः; (३) द्यूतो; महाभवाय; तु हृच्छयाय (for महाभ); (४) पक्वौ; सन्तो; मत्तो (मन्दो); पक्वं; पक्षं (for पक्वो); पक्वोथ (for पक्वो न); बुध्येदयम्; जानात्ययम्; अन्तकालं ; कालः;.

(०४) (१) नारन्तुदः; नरुन्तुदः;अरुन्तुदः; नामं तदस्यां न कृशंसवादि; (२)क- न हीनतः परमपूवदित?।

।

समुच्चरन्त्यतिवादाश्च वक्त्राद्
यैराहतः शोचति रात्र्यहानि।
परस्य चेन्मर्मसु ते पतन्ति
तान्पण्डितो नावसृजेत्परेषु ।। ७ ।।(०१)

अजो हि शस्त्रमखनत्, किलैकः,
शास्त्रे विपन्ने पद्भिर्पास्य भूमिम्।
निकृन्तनं स्वस्य कण्ठस्य घोरं
तद्वद्वैरं मा कृथाः पाण्डुपुत्रैः ।। ८ ।।(०२)

लक्षालङ्कारः-अजो हि शस्त्रम् इत्यत्र अजः परमात्मा ।

न किञ्चिदीड्यं प्रवदन्ति पार्था

---

क- न हीनतः परमभ्याददीत । परमभ्यादधीत; मभ्याददातं; मप्याददीत; मंह्यावदती; (३) यस्यास्य; यथास्य; ययान्य; यया स; पर उद्विजेते; परमुद्विजेत; पर उद्विग्नजेते; परमद्विजे; (४) परे (for वदेद्);रुषतीं; उष( श ) तीं; ऋशतिं; रुशतिं; रुहतीं; दृशतीं; त्रुमतिं (for रुशतीं); पापलौक्यां; वालौक्यां ;.

(०१) (१) तिवादान्हि; भिवादा हि; तिवादाश्च; तीवादा हि; तिवादास्तु; तिवादाभि; समुच्चरन्ते (ऽ) तिवादांशुवक्राद्; च्चरन्त्यतिवक्राद्यशब्दैसू; च्चरत्यतिवादान्न वक्रा; चरन्तीह्यतिवक्राद्यैर्; (वाक्सायकैर्वदनान्निःसरन्त); च्चरन्तित्यवादा हि वक्राद् ; (२) तैराहतः; रात्रिहानि;

(३) क- नो मर्मसु । क- ना मर्मसु । परस्परं मर्मसु; परस्यधा मर्मणि; परस्यानां मर्मसु; वामर्मसु; नोमर्मसु; नाशर्मँ वै मर्मसु तान्मर्मसु; चेन्मर्मसु; नामर्मणि (for नामर्मसु); ये (for ते);

(४) तावद्धितो; तान्पण्डिता; प्रावसृजेत् (for नां ); परेभ्यः; कदाचित् (for परेषु );.

(०२) (१) प्रजो; अज्ञो; अयो; अजा; अजः(परमात्मा); शस्त्रेण खने; शस्त्रमगिलत् (लं); किलैकं; (२) शस्त्रैर्; अस्त्रे; शस्त्रं; शस्त्रो; विपन्नै;विपन्ने(न्न)द्भिर( रु )पास्य; विपन्नो पद्भिरपा; विपन्निवद्भिरिवा; विपन्नेवद्भिरवा; विपन्नेभिरपा; शिरसास्य भूमौ (मीं) (for पद्भिरपास्य भूमिम्);तदच्छिनत्तस्य कण्ठं विरुद्धः (द्धेः);अजः छागः । छेदाय प्रपातिते खड्गे भग्ने सति पद्भिः अपास्य अपकीर्य भूमिं शस्त्रमन्यदखनत् ;

(३) किङ्कर्तनं; निष्कर्त; निकर्त; कायस्य; कर्ण; कण्ठ ;

(४) तच्च वैरं; तद्वै वैरं; तद्वैरं; तदद्वैरं; तद्वैनं; मा खनेः;मद्विषनी; मा (त्वं मा) कृथाः; माखनिः; मावनि; मा खिदः; मा विखनीः; तद्वत्त्वमपि पाण्डवैः सह वैरं मा खनीः ।.

वनेचरं वा गृहमेधिनं वा।
तपस्विनं सम्परिपूर्णविद्यं
भषन्ति ये वै श्वनराः सदैव ।। ९ ।।(०१)

लक्षालङ्कारः-भषन्ति ये वै श्वनराः सदैव इत्यत्र ये पापं ईदृशं सदैव भषन्ति, ते श्वनराः श्वानश्च ते नराश्चेति नराकाराः श्वान इत्यर्थः।

द्वारं सुघोरं नरकस्य जिह्मं
न बुध्यते धृतराष्ट्रस्य पुत्रः ।
तामभ्येत्येतारो बहवः कुरूणां
द्यूतोदये सह दुःशासनेन ।। १० ।।(०२)

लक्षालङ्कारः-तमत्येतार इत्यत्र तं द्वारसमूहं अत्येतारः अतिक्रम्य गन्तारः बहवः कुरवः सन्ति ।

मज्जन्त्यलाबूनि शिलाः प्लवन्ते
मुह्यन्ति नावोऽम्भसि शश्वदेव ।
मूढो राजा धृतराष्ट्रस्य पुत्रो

---

(०१) (१) कश्चिदीढ्यं; किश्चिदीव्यं; कश्चिद्दीव्यं; किश्चिदन्यत् (दन्यं);दित्थं; कश्चिदन्यं; किश्चिदेवं; दिव्यं; ईड्यं; पार्थाः; पाप;

(२) च (वा);वनेचरा (रे) वा गृहमेधिनो वा; (३) तपस्विनां; स्विनं वा परिपूर्णविद्यं (द्या); स्विनः सम्परिपूर्णविद्या; स्विनं सम्परिपृच्छन्तुविश्वं; स्विनं सुपरिपूर्णविद्यां; स्विनं परिसम्पूर्णविद्यं; (४)क- भक्ष्यन्ति । क-द्विषन्ति । भवन्ति; निन्दं; भजं; जलं; हर्षं; वक्ष्यं; द्विषं; भषन्ति; वै है; चैवं; हीनं; नैवं; नैन; ह्येवं; चैवं; ये वै; हैवं; स्वपराः; नराः; सुनराः; हि जनाः; हि नराः; श्वानराः; नवनाः; नवराः; श्व (श्च) नरा (रा आ,)पत्सुधीरान् (for श्वनराः सदैव);सुवीराः; सुधीराः; धीराः; सुधीरं; सुवीरं; सधीराः; सदैव; चिन्वन्ति नैवं मानवा ये च धीराः; निन्दन्ति हीदं मां नरा ये च धीराः;.

(०२) (१) सु; चिह्नं; जिह्म; जिह्मां (for जिह्मं);
(२) बुध्यते; युध्यते;बुध्यसे;धृतराष्ट्रस्य पुत्रः; राष्ट्रपुत्र;
(३)क-तमन्वेतारो । तम्; ताम्; त्वम्; कम् (for त्वाम्);अन्वितारो; अन्ने; अत्येतारो; कुनृणां;.

न मे वाचंः पथ्यरूपांः शृणोति ।। ११ ।।(०१)

तेषां नूनं भविताय़ं कुरूणां

सुदारुणः सर्वहरो विनाशः ।

वाचः पुव्यांः सुहृदां पथ्यरूपा

न श्रूयन्ते वर्धते लोभ एव ।। १२ ।।(०२)

लक्षालङ्कारः-तेषां कुरूणां सर्वहरः सर्वान् हरतीति सर्वहरः । सुदारुणः विनाशः । अनेन दुर्योधनेन सम्पादित इति योग्यक्रियया सम्बन्धः।

वैशम्पायनः

धिगस्तु क्षत्तारमिति ब्रुवाणो

दर्पेण मत्तो धृतराष्ट्रस्य पुत्रः।

अवैक्षत प्रातिकामीं सभायाम्

उवाच चैनं परमार्यमध्ये ।। १३ ।।(०३)

दुर्योधनः

प्रातिकामिन्द्रौपदीमानयस्व

न ते भयं विद्यते पाण्डवेभ्यः।

क्षत्ता ह्ययं विवदत्येव भीरुः

---

(०१) (१) निमज्जन्ति;(अ)लम्बूनि; शिला; प्लवन्ति; मज्जन्ति लाबूनि शिलां ह्यवन्ते;

(२) उह्यन्ति मज्जन्ति (for मुह्यन्ति);वानोभसि; नावम्भसि; शश्वदेवं; (३) अहो (for मूढो);वाचा (for राजा); धृतराष्ट्रः स (सु) पुत्रो; (४) नाद्य; नामे; नमो; वाचं; पथ्यन्तमाः; पथ्यरूपां (पं);.

(०२) (१) अतो; अहो; ततो; तेषां (for अन्तो);भवता;भविता वो; (२) स दारुणः; धूतोदये; सर्वंहरो;वाचं; पुण्याः (पुण्यां)(for काव्याः);पश्यरूपा; पथ्यरूपां; (४) लोभभावः.

(०३) (१) धिगस्ति; अति; अधि (for इति); धिगस्तु क्षत्तानरमित्रबुवाणो;(२) दर्पो न; मर्तो; मन्तो; धृतराष्ट्रपुत्रः;(३) अवैक्षित (तः);अवैक्षतः; अवेक्षत; अन्वै; प्रातिवरामि; प्रातिकामिं (म्यं; मि); प्राति (प्ति )कामिनं; प्राप्तिकामीं; (४) परमाचार्यमध्ये; सूतमार्यस्य मध्ये; परमार्यस्य मध्ये; परमावायुमध्ये; प्रवरस्य चार्यमध्ये; उवाच एनं परमार्यं सभायां मध्ये;.

न चास्माकं वृद्धिकामः सदैव ।। १४ ।।(०१)

वैशम्पायनः

एवमुक्तः प्रातिकामी स सूतः

प्रायाच्छीघ्रं राजवचो निशम्य।

प्रविश्य च श्वेव हि सिंहगोष्ठं

समासदन्महिषीं पाण्डवानाम् ।। १५ ।।(०२)

लक्षालङ्कारः-प्रातिकामी प्रातिकामीति दुर्योधनसूतस्य नाम ।

प्रातिकामी

युधिष्ठिरे द्यूतमदेन मत्ते दुर्योधनो द्रौपदि त्वामजैषीत्।

समागच्छ त्वं प्रपद्यस्व धृतराष्ट्रस्य वेश्म

नयामि त्वां कर्मणे याज्ञसेनि ।। १६ ।।(०३)

द्रौपदी

कथं त्वेवं वदसि प्रातिकामिन्

को हि दीव्येद्भार्यया राजपुत्रः।

मूढो राजा द्यूतमदेन मत्ता

---

(०१) (१) त्वं प्राप्तिकामिन्; प्राती; प्रातिकामी; गामिन्; कामिं;(२) पाण्डवस्य;(३) विवदतीव; दत्येष;भीतो; भीरु; विवदति नित्यभीतो (मो); विवदत्यभीरुर्;(४) वृद्धिकामाः (मा); कामी;.

(०२) (१) स एवम् (for एवम्); प्रतीकामी; प्रातिगामी; (२) शीघ्रो; क्षिप्रं (for शीघ्रं); राजवाचो; (३) च व; वा (for च); हि; च (for स );सिंहस्य गोष्ठं (for स सिंह); सिंहगोष्ठीं; गोष्ठे; मध्ये; सिंहगोष्ठं; प्रविश्य चाश्वेव च सिंह; (४) समाददन्; गमन् ,.

(०३) प्रतिकामी; प्रतिकाम्यु; कर्णः; प्रातिगा(०का )मिः;

(१) मत्तो (for मत्ते);युधिष्ठिरो द्यूत० मत्तो; (३)क- सा गच्छ । सा; प्रपद्यस्व (for द्य त्वं);सा त्वं (तं सा) प्रपद्यस्व (स्व); सा ( आ-; समा-; स्वा) गच्छ त्वं (for सा प्रपद्य त्वं), धृतराष्ट्रवेश्म;

(४) नयाति; त्वा; त्वं; कर्मणा; कर्मणि; कर्मगेया; कर्मणो;.

अहो नान्यत् कैतवमस्य किंश्चित् ।। १७ ।।[०१]

लक्षालङ्कारः-मूढो राजा इत्यत्र कैतवं कितवस्य दुर्योधनस्य योग्यं कैतवं अन्यत् किञ्चिद्वस्तु न स्यात्किं, अहो ।

प्रातिकामी

यदा नासान् त्कैतवमन्यदस्य
तदादेवीत्पाण्डवोऽजातशत्रुः।
न्यस्ताः पूर्वं भ्रातरस्तेन राज्ञा
स्वयं चात्मा त्वमथो राजपुत्रि ।। १८ ।।[०२]

द्रौपदी

गच्छ त्वं कितवं गत्वा सभायां पृच्छ सूतज ।
किं नु पूर्वं पराजैषीरात्मानमथवा अपि माम्।
एतज्ज्ञात्वा समागच्छ ततो मां नय सूतज ।। १९ ।।[०३]
ज्ञात्वा चिकीर्षितमहं राज्ञो यास्यामि दुःखिता।। *

वैशम्पायनः

---

(०१) (१) त्वं वै; त्वमेवं (०व); त्विदं; त्वेदं; चैवं; त्वं मा (for त्वेवं);वदसे; (२) हि दी (दि )व्येद्; दिव्यते, दीव्यते; विदीव्यते; वै दिव्येद्; राजपुत्र; (३) व्यूढो (for मू );
(४) ग्लहे; अहो; ह्यभून्; अभून्; ह्यहो ; आसीन् (for आहो );अत्र; अद्य; स्यां न; अस्ति (for अस्य);.

(०२) (१) क- यद्वा नाभूत् । यथा नान्यत्; यदाभूत्; यदा मा भूत; यदा (द्वा) नासीत; कैतवमन्यतस्य; मस्य किञ्चित् (for मन्यदस्य); (२) तदा देवी; तदादीव्यत्; तदा देवीं; तदेदवित्त्वां; तदादेवीत्त्वा; (३) न्यस्तापू(त्पू) र्वं; न्यस्ताः सर्वं; न्यस्ताः सर्वे; ते च (for तेन);राज्ञः; (४) पूर्वं (for स्वयं);आत्मा; त्वामथो; तामथो; राजपुत्री;.

(०३) (१) कैतवं; मत्वा (for गत्वा); (२) ब्रूहि (for पृच्छ); (३)क- किं नु पूर्वं पराजैषीरात्मानं किं नु भारत । कं च; कं तु; किं तु; किं त्वं; किं च; पराजैषीद्; अवाजैषीर्; (४) मां च; मां तु; मा सु-; अथ; मा तु; मा नु; आत्मानमथ वा नु ( वापि) मां; आत्मानमवधापि मां; (५)क- पुनर्ज्ञात्वा त्वमागच्छ । श्रुत्वा (for ज्ञात्वा);समागच्छ; मागच्छ; तमा०; त्वमागच्छेसू ; (६) मा (for मां); सूतजे;.

सभां गत्वा स चोवाच द्रौपद्यास्तद्वचस्तदा ।। २० ।।

प्रतिकामी-

कस्यस्विन्नः पराजैषीरिति त्वामाह द्रौपदी ।
किं त्वं पूर्वं पराजैषीरात्मानमथ वापि माम् ।। २१ ।।(०१)

लक्षालङ्कारः-कस्यस्वित् इत्यत्र कस्यस्वित् कस्य कार्यस्य अर्थे ।

युधिष्ठिरं नरेन्द्राणां मध्ये स्थितमिदं वचः। *(०२)
इत्यब्रवीन्महाराज राजपुत्री विशां पते ।*

वैशम्पायनः

युधिष्ठिरस्तु तच्छ्रुत्वा गतसत्त्व इवाभवत्।
न तं सूतं प्रत्युवाच वचनं साध्वसाधु वा ।। २२ ।।(०३)

दुर्योधनः

इहैत्य कृष्णा पाञ्चाली प्रश्नं समनुपृच्छताम्।
इहैव सर्वे शृण्वन्तु तस्याअस्य च यद्वचः ।। २३ ।।(०४)

वैशम्पायनः

---

(०१) (१) होवाच; प्रत्युवाच; त्वथोवाच; वचोवाचं; (२) तथा (for तदा);.

(०२) (मध्यस्थितम्; स हि (for वचः);) प्रातिकाम्युवाच;(३) कस्येशो न; कस्येशानः;कस्य राजन् (for कस्येशो नः);कस्य स्विद् (for कस्येशो); पराजैष्ठा; जिष्ठा (for जैधीर्);न कस्यशोछर्यजैषीर्; अहारयः कथं त्वं मां;(४) माम् (for त्वाम्); प्राह (for आह);कृष्णा त्वामिदमब्रवीत; (५) किं तु; कं नु; किं त्वं; किं त्वा; किं च (for किं नु); अहारयः किं च पूर्वं; अहोरयं कथं पूर्वं; (६) मा (for माम्);आत्मानं मां नु भारत; आत्मान*थ वापि मां; नमवधापि मां; नमधि चापि मां;.

(०३) (१) च (for तु);निश्वे( श्रि )ता; तच्छ्रुत्वा (for निश्चेष्ट); ष्ठिरस्ततः श्रुत्वा;(२) हत (for गत); (३) स (for न); च (for तं);.

(०४) (१) इहेत्य; इत्येव; (आ)गत्य (for कृष्णा); इत्यैत्य कृष्णां पाञ्चालीं; इहैवागत्य पाञ्चाली; (२) प्रश्नमेनं; मेवं; प्रभाषतु; प्रश्नं समनुपृच्छतां; (४) अस्यापि; चास्य च चैतस्य; ह्यस्य च; (अ) प्यस्य च; तद्वचः; यद्वयं;.

स गत्वा राजभवनं दुर्योधनवशानुगः।
उवाच द्रौपदीं सूतः प्रातिकामी व्यथान्निवः ।। २४ ।।(०१)

प्रातिकामी

सभ्यास्त्वमिह राजपुत्र्याह्वयन्ति
मन्ये प्रात्पंः सङ्क्ष्यंः कौरवाणाम्।
न वै समृद्धि पालयते लघीयान्
यस्त्वां सभां नेष्यति राजपुत्रि ।। २५ ।।(०२)

द्रौपदी

एवं द्यूते व्यदधात्संविधाता
स्पर्शावुभौ (अजौ) स्पृशतो धीरबालौ ।
धर्मं त्वेकं परमं प्राप्य लोके
स नः शमं दास्यति गोप्यमानः ।। २६ ।।(०३)

लक्षालङ्कारः-एवं द्यूत इत्यत्र उभौ धीरबालावपि स्पर्शौ स्पृश्येते इति स्पर्शौ अजौ(?) स्पृशतः ।

*५३१ (अधिकपाठः - कपाठे)

सोऽयं धर्मो मात्यगात्कौरवान्वै

---

(०१) (१/२) राजसदनं; वचनं; (३) दूतः (for सूतः); (४) प्रतिकामी; प्रातिगामी; व्यथान्वितः (for व्यथन्निव );.

(०२) प्रातिकाम्युवाच; (१) सभ्यास्त्वामी; स्त्वमी त्वां; स्त्वामिह; सवां वै; सत्वा यद्; स्तु त्वां (for सत्वमी); न्याह्वयन्ते; (२) मग्रयप्राप्यः; मन्ये प्राप्तं; संशयः; सङ्क्ष्यं ; (३) नैव; न मे; (४) यत्त्वां; यस्त्वां; सभामेष्यति; सभां नेष्यति; समानेष्यति; राजपुत्री;.

(०३) (१) एव; एतद्; ये तद् (for एवं); न्यूनं; द्यूतं; द्यूते; नूनं; विदधत; व्यदधत्; ह्यदधात् व्यवधात्; व्यथया विदधात्- त्वं (for सं); (२) स्पृशावुभौ; पक्षा; नरा; नवां; स्पर्शादुभौ; स्पर्शा उभौ; वजौ; उभौ अजौ; स्पर्शौ; स्पृशतौ; स्पृशते; स्पृशतैर्; स्पर्शनैर; स्पर्शतो; वीर; वृद्धं; धीरं; स्पर्शावुभौ वेदयते रणाय; (३) त्वमेकं; लोके; चैकं; चकं (for त्वेकं); एकं; प्राह लोकः; प्राहु लोके; प्राहुरेकं(के); प्राप्य लोके; (४) मनः; स ना (for स नः); सः समं; श्रेयो; शमं; यास्यति; पास्यति; धाम्यति; दास्यति; ध्यास्यति; शर्म स नो दास्यति गोप्य;.

सभ्यान्गत्वा पृच्छ धर्म्यं वचो मे।
ते मां ब्रूयुर्निश्चितं तत्करिष्ये
धर्मात्मानो नीतिमन्तो वरिष्ठाः।
श्रुत्वा सूतस्तद्वचो याज्ञसेन्याः
सभां गत्वा प्राह वाक्यं तदानीम्।
अधोमुखास्ते न च किञ्चिदूचुर्निर्बन्धं
तं धार्तराष्ट्रस्य बुद्ध्वा।।

वैशम्पायनः

युधिष्ठिरस्तु तच्छ्रुत्वा दुर्योधनचिकीर्षितम्।
द्रौपद्याः सम्मतं दूतं प्राहिणोद्भरतर्षभ ।। २७ ।।(०१)

एकवस्त्रा त्वधोनीवी रोदमाना रजस्वला।
सभामागम्य पाञ्चाली श्वशुरस्याग्रतो अभवन् ।। २८ ।।(०२)

(अथ त्वामागतां दृष्ट्वा राजपुत्रीं सभां तदा।
सभ्याः सर्वे विनिन्दीरन्मनोभिर्धृतराष्ट्रजम्।।)*(०३)

स गत्वा त्वरितं दूतः कृष्णाया भवनं नृप।
न्यवेदयन्मतं धीमान्धर्मराजस्य निश्चितम्।।*
पाण्डवाश्च महात्मानो दीना दुःखसमन्विताः।

---

(०१) (१) युधिष्ठिरस्य; तज्ज्ञात्वा;(२) दुर्योधनविचिकीर्षितं; नचिकीर्षुतां;(३) स मतं; संमितं; द्यूतं; दूते; सूतं (for दूतं); (४) र्षभः;.

(०२) (१) कथावस्त्रा; वेणी; त्वधोनीवी; ह्यधो; ह्मथो०; (अ) स्यथो०; (अ) प्यथो० (for अधो); नीवी; (२) वेपमाना; रुदती वै; (३) सभामागत्य; मायम्य; पाञ्चालि; (४) ग्रतो भव; ग्रतो भवेत्;.

(०३) (वेशं उ; त्वाम् (for ताम् );शुभां (for सभां);राजपुत्रि सभां गतां; विनिन्दिरे; विनिन्देरन्; विनन्दीरन्; व्यनिन्दत;).

सत्येनातिपरीताङ्गा नोदीक्षन्ते स्म किञ्चन।।*(०१)

ततस्त्वेषां मुखमालोक्य राजा
दुर्योधनः सूतमुवाच हृष्टः।
इहैवैतामानय प्रातिकामिन्
प्रत्यक्षमस्याः कुरवो ब्रुवन्तु ।। २९ ।।(०२)

ततः सूतस्तस्य वशानुगामी
भीतश्च कोपाद्द्रुपदात्मजायाः।
विहाय मानं पुनरेव सभ्यान्
उवाच कृष्णां किमहं ब्रवीमि ।। ३० ।।(०३)

दुर्योधनः

दुःशासनैषां मम सूतपुत्रो
वृकोदरादुद्विजतेऽल्पचेताः।
स्वयं प्रगृह्यानय याज्ञसेनीं
किं ते करिष्यन्त्यवशाः सपत्नाः ।। ३१ ।।(०४)

वैशम्पायनः

ततः समुत्थाय स राजपुत्रः

---

(०१) ( दारादुःखसम०; दुःखशोकसम; सत्येनातिप; नोदीक्षन्ति;).

(०२)वैशं० उ; (१) ततस्त्वेषां; दुःखम (for मुखम्);राज्ञां (for राजा);(२) धृष्टः; दृष्टः; धृष्टं (for हृष्टः); (३) इहैव ताम्; इहैवैनाम्म्; प्रातिकामि; गामिन्; (४) प्रत्यक्षेस्याः; क्षमस्यां अस्यो (for कुरवो);विबुवन्तु; वदन्तु; हि बुवन्तु (ति); (ऽ)पि ब्रुवन्तु; बुवातु ;.

(०३) (१) वशानुगामि; ततः स सूतस्तद्वशगोनुगामी; (२) भीमश्च; भितश्च; भीतस्य; भामश्च; (३)क-विगाहमानः । क-विगर्हमाणः । क-विगह्ममानां । विगच्छमानः; विचेष्टमानः; विगर्हमाणः (णां); विगाह (ह्य)मानः; विहाय मानं; सभ्याम्;(४) करोमि (for ब्रवीमि);.

(०४) (१) दुःशासनायं; सनैषो; सनैषां; (२) चेतिः; तेजाः (for चेताः); (४) ते किं; नो (for ते); करिष्यन्नवशाः- समेताः.

श्रुत्वा भ्रातुः शासनं रक्तदृष्टिः।
प्रविश्य तद्वेश्म महारथानाम्
इत्यब्रवीद्द्रौपदीं राजपुत्रीम् ।। ३२ ।।[०१]

दुश्शासनः

एह्येहि पाञ्चालि जितासि कृष्णे
दुर्योधनं पश्य विमुक्तलज्जा।
कुरून्भजस्वायतपत्रनेत्रे
धर्मेण लब्धासि सभां परैहि ।। ३३ ।।[०२]

वैशम्पायनः

ततः समुत्थाय सुदुर्मनाः सा
विवर्णमामृज्य मुखं करेण ।
आर्ता प्रदुद्राव यतः स्त्रियस्ता
वृद्धस्य राज्ञः कुरुपुङ्गवस्य ।। ३४ ।।[०३]

ततो जवेनाभिससार रोषाद्
दुश्शासनस्तामभिगर्जमानः।
दीर्घेषु नीलेष्वथ चोर्मिमत्सु
जग्राह केशेषु नरेन्द्रपत्नीम् ।। ३५ ।।[०४]

---

(०१) (१) स उत्थाय (for समु); स राज समुत्थाय;राजपुत्र; (२)क- ःकोपविरक्तद्दष्टिः । क्रोधविरक्तदृष्टेः (ष्टिः); क्रोधा (कोप )संरक्तदृष्टिः; क्रोधसंरक्ततेजः; शासनं रक्तं; कोपविषक्त; विवृत्त; (३) प्रवेश्य ; (४) द्रुपद; द्रौपदिं (for द्रौपदीं);राजपुत्रि; पुत्रः;.

(०२) दुःशासनः; (१) गृह्येहि; जिता हि; (२) विमुक्तलज्जां; विहाय लज्जां; विमुच्य लज्जां; वितत्य लज्जां; (३) पत्रं (for पद्म); कुरु सन्नतस्वमायतपत्रनेत्रे; (४) लब्धा हि; पारिहि; परेहि; परैर्हि;.

(०३)समुत्थाय ; वैशं० उ; (१) सुदुर्मना; सुदुर्मनाः; च दुर्मनाः;सः; स्वं (for सा); (२) क- ह्यत्य । क-मृज्य । मासज्य; माच्छाद्य; मामृज; मामृश्य; मावृत्य;(३) आर्द्रा; स्त्रियस्य; पुरस्ता; स्त्रियश्च; स्त्रियास्ता;.

(०४) (१) तेषां० (for रोषाद्); ततो जवेनाभि समानरोषाद्; ततो जवेनानि (ति)ससार रों; ततो

ये राजसूयावभृथे जलेन
महाक्रतौ मन्त्रपूतेन सिक्ताः।
ते पाण्डवानां परिभूय वीर्यं
बलात्प्रमृष्टा धृतराष्ट्रजेन ।। ३६ ।।(०१)

स तां परामृष्य सभासमीपम्
अनीय कृष्णामतिदीर्घकेशीम्।
दुःशासनो नाथवतीमनाथवच्
चकर्ष वायुः कदलीमिवार्ताम् ।। ३७ ।।(०२)

सा कृष्यमाणा नमिताङ्गयष्टिः
शनैरुवाचाथ रजस्वलास्मि।
एकं च वासो मम मन्दबुद्धे सभां
नेतुं नार्हसि मामनार्य ।। ३८ ।।(०३)

ततोऽब्रवीत्तां प्रसभं प्रगृह्य
केशेषु कृष्णेषु तदा स कृष्णाम्।
जिष्णुं च कृष्णं च हरिं नरं च
त्राणाय विक्रोशति याज्ञसेनी ।। ३९ ।।(०४)

---

ससारातिजवेन रो; (२) मतिगर्ज०; मतितर्ज०; मभितर्ज; (३) नीलेष्वपि; लीलेष्वथ; नीलेषु स; चोर्मिवत्सु; चोर्जमत्सु ; ऊर्मिमत्सु ; (४) जग्राह केशेषु;.

(०१) (२) मन्त्रजलेन;सिक्तः; (४) प्रविष्टा; प्रमृष्टा; धृतराष्ट्रात्मजेन.

(०२) (१) सभां (for स तां);परामृष्य; कृष्य; सभाः समीपम्; स तां परासन्सिनासमीपम्; (२) आनीय्य; इति; अथ; अभि- (for अति); मतिकृष्णकेशां; मपकृष्टकेशां; मतिदीर्घकेशीं (शां); मपकृष्य केशान् ; (४) ददर्श (for चकर्ष);.

(०३) (१) सा क्षिप्यमाणा; आकृष्य; त्वमिता; नयिता; (अ)नुमिता (for नमिता); (२) चाथ; चास्मि (for चाद्य);स्वलाद्य; (३) तु (for च); (४) नेतुं सभां; नार्हसे; मामनार्थं; नार्यः; नार्यां; मन्दबुद्धे; मामनर्य;.

(०४) (१) वैशं० उं; क- प्रहसन् (for प्रसभं);प्रगृह्य; संनिगृह्य; विगह्य; (२) कृष्णेषु केशेषु; रोषादसकृत्

गोविन्द द्वारकावास कृष्ण गोपीजनप्रिय ।*
कुरुभिः परिभूतां मां किं न जानासि केशव ।*
महिषी पाण्डुपुत्राणामजमीढकुले वधूः ।
साहं केशग्रहं प्राप्ता त्वयि जीवति केशव ।*(०१)

दुःशासनः

रजस्वला वा भव याज्ञसेनि
एकाम्बरा वाप्यथवा विवस्त्रा।
द्यूते जिता चासि कृतासि दासी
दासीषु कामं च यथोपजोषम् ।। ४० ।।(०२)

वैशम्पायनः

प्रकीर्णकेशी पतितार्दवस्त्रा
दुःशासनेन व्यवधूयमाना।
ह्रीमत्यमर्षेण च दह्यमाना
शनैरिदं वाक्यमुवाच कृष्णा ।। ४१ ।।(०३)

द्रौपदी

---

(कृच्च; ०कृत्सु-); कृष्णेषु सदा स; द्रौपद्युवाच; (३) कृष्णं जिष्णुं; कृष्णं च कृष्णं च (च); कृष्णं च विष्णुं च (च);जिष्णुं च विष्णुं च०; भीमं च जिष्णुं च; कृष्णं हरिं वासुदेवं्।* कृष्णं नरं अर्जुनं्।* कृष्णं च कृष्णं च ; (४) चुक्रोश; ह (for हि); त्वा (for त्वाम्);त्राणाय विक्रोशति याज्ञसेनी (निं); त्राणाय विक्रोशय याज्ञसेनी (नि); त्राणाय विक्रोशय नानयामि हि त्वा;.

(०१)( गोप्तासि; गोप्ता च (for गोविन्द); माजमीढ; त्वयि केशव जीवति;).

(०२) (१) दुःशासन उं ( दुःशासनः); या (for वा);याज्ञसेनी; (२) च (for वा); वाप्यवस्त्रा; (३) जिता असि; जिता वा (या)सि; जितासीति; चाभि (for चासि); कृता च; दासीषु; वासी (for दासी); (४) सा कामयास्मांश्च; कुरुष्वकामश्च; दासीषु वासश्च; षु कामं (म्यं)च; यथोपजोषात्; योषं; ०जुष्टं;.

(०३) (१) वैशं उ (उ); क- र्ध। प्रकीर्णकेशा;पतिता विवस्त्र; तार्द्रवस्त्र; (२) व्यवदूय; दुःशासनेनाप्यवधू; (३) श्रीमत्य;त्यमार्गेण; (४) शनैरिमां ; वाचम् (for वाक्यम्);.

इमे सभायामुपदिष्टशास्त्राः
क्रियावन्तः सर्व एवेन्द्रकल्पाः।
गुरुस्थाना गुरवश्चैव सर्वे
तेषामग्रे नोत्सहे स्थातुमेवम् ।। ४२ ।।(०१)

नृशंसकर्मंस्त्वमनार्यवृत्त
मा मा विवस्त्रां इति मा विकर्षीः।
न मर्षयेयुस्तव राजपुत्राः
सेन्द्रा देवा यदि ते वै सहायाम्ः ।। ४३ ।।(०२)

धर्मे स्थितो धर्मसुतो महात्मा
धर्मश्च सूक्ष्मो निपुणोपलक्ष्यः ।
वाचापि भर्तुः परमाणुमात्रम्
इच्छामि दोषं न गुणान्विसृज्य ।। ४४ ।।(०३)

लक्षालङ्कारः-निपुणोपलक्ष्य इत्यत्र निपुणैरुपलक्ष्यः निपुणोपलक्ष्यः ।

इदं त्वकार्यं कुरुवीरमध्ये
रजस्वलां यत्परिकर्षसे माम्।

---

(०१) (१) द्रौपद्युवाच ( द्रौ); एते (for इमे); उपविष्टं; उपनीत; (२) इवेन्द्र; (३) गुरुस्थानेः स्थानानु; गुरव एव; (४) क- विवक्षीः । अग्रे एवं; तेषामेव; तेषां मध्ये०; नो गृहे ;स्थातुमेव; स्थातुमग्रे; स्थातुमद्य;.

(०२) (१) नृशंसकर्मं; कर्मा; कर्मस्; र्यवृत्तो; (२) मा मा (for मा मां); विवस्त्रां कुरु; विवस्त्रामि (कृ-; वि) ति; मा विकर्ष; मूढचेतः( ता ); मा ( मा) विकर्षीः; सुष्टवे; विपक्षीः; चापि कर्षीः (२) नो; म- (for न); नामर्षययुस्तव राजपुत्र्या; (४) सेन्द्रा च; सेन्द्रा हि; सेन्द्रादि; सेन्द्रा देवा यदि वै ते ( ते वै) सहायाः ( सभायां );.

(०३) (१) धर्मस्थितो; धर्मपुत्रो महात्मा; सुतो महात्मा; पुत्रश्च राजा; (२) धर्मस्य; धर्मः सु-; धर्मो हि (for धर्मश्च);निपुण्योपलभ्यः; णोपलक्ष्यः; निपुणैश्व (णैः स)लक्ष्यः;धर्म सूक्ष्मो निपुणेनोपलभ्यः; (३) न चापि (for वाचापि);परमाणुमात्रान्; णुना तु; णुमात्राम्; परिमाणमात्रं; (४) इच्छामि (for नेच्छामि); दोषान् ; च; सु; न; स- (for स्व-);परिकीर्त्यमानं (for स्वगुणान्विसृज्य ); विमृज्य; विमृष्य;.

न चापि कश्चित्कुरुतेऽस्म पूजां
ध्रुवं तवेदं मतमभ्युपेतः ॥ ४५ ॥[०१]

लक्षालङ्कारः- कुरुते स्म पूजां इत्यत्र पूजां धर्मस्य पूजाम् ।

धिगस्तु नष्टः खलु भारतानां
धर्मस्तथा क्षत्रविदां च वृत्तम्।
यत्र ह्यतीतां कुरुधर्मवेलां
प्रेक्षन्तिं सर्वे कुरवः सभायाम् ॥ ४६ ॥[०२]

द्रोणस्य भीष्मस्य च नास्ति सत्त्वं
क्षत्तुस्तथैवाद्य महात्मनोऽपि।
राज्ञस्तथा हीममधर्ममुग्रं
न लक्षयन्ते कुरुवृद्धमुख्याः ॥ ४७ ॥[०३]

इमं प्रश्नमिमे ब्रूते सर्व एव सभासदः।
जितां वाप्यजितां वा मां मन्यध्वे सर्वभूमिपाः ॥ ४८ ॥

वैशम्पायनः

---

(०१) (१) त्व (त्वं) कार्यं; तु कार्यं (for त्वनार्यं); कुरुराजमध्ये; कुरुवीरवीर; (२) यां (for यत्); परिमर्षसे; ह; त्वं; (ऽ)द्य (for माम्); (३) न चैव; स चापि पुरुषे (for कुरुते); च; स्म; स्व-; हि; सु-(स्व-)(for ऽत्र); लज्जां; कुत्सां ; पूजां ; (४) बलं (for ध्रुवं);तदेवं; त्वदीयं; च वीय; तदीयं; ब्रुवन्तं देवं (for ध्रुवं तवेदं); तमन्वपद्येत्; मतमन्वपद्य (पद्यत; पद्यः); मभ्युपेताः; मभ्युपेतु; मभ्युपेतः; च समन्ववेक्ष्य (द्य); परमन्ववेक्ष्य ( वेद्यं; पद्य); च ममान्ववद्य; परमं त्ववेक्ष्य; अन्वपत्यं (प्राप्तवत्यस्म अन्वपद्यं);.

(०२) (१) वंशस्तु; धिकस्तु; सत्त्वं; वंशः (for नष्टः); (२) धर्मस्थितिं; धर्मस्तदा; धर्म्यस्तथा; क्षत्रविदं; विन्दो; धर्म एवां; धर्मविदां; वृत्ति ;(३) यत्राभ्यतीनां; यत्र ह्मतीतां;० यत्रात्य; यत्राप्य; यत्र त्वं; यत्राभ्यतीताः; यदाभ्यतीतां; यत्राह्यधीनां; यत्रा (अत्र) ह्यतीतां; (४) प्रेक्ष्यन्ति; प्रेक्षन्त०; प्रेक्षं च; प्रेक्ष्य; प्रेक्षन्तु;.

(०३) (१) द्रोण भीष्म; न वापि; न चास्ति (for च नास्ति);सत्यं; सत्वरं; सत्त्वं; (२) क्षत्तुस्; अक्षसू; क्षन्तुस्; श्रुतं (for ध्रुवं); तच्चैवास्य; तथैवाद्य; त्मनोसि; (३) राज्ञस्तदा;ह्येवम्; भूतम्; भीमम्; सत्यम् (for हीमम्);अधर्मवेलां; मग्र्यां; मद्य राज्ञस्त हीनधर्ममुग्रं; (४) ये (for न); लक्षयेयुः; लक्षन्ते;.

तथा ब्रुवन्ती करुणं सुमध्यमा
भर्तॄन् कटाक्षैः कुपितानपश्यत् ।
सा पाण्डवान्कोपपरीतदेहान्
सन्दीपयामास कटाक्षपत्रैः ।। ४९ ।।(०१)

लक्षालङ्कारः-कटाक्षपत्रैः इत्यत्र कटाक्षाख्यसन्देशपत्रैरित्यर्थः ।

हृतेन राज्येन तथा धनेन
रत्नैश्च मुख्यैर्न तथा बभूनव।
यथा अर्तिमत्कोपसमीरितेन
कृष्णाकटाक्षेण बभूव दुःखम् ।। ५० ।।(०२)

दुःशासनश्चापि समीक्ष्य कृष्णाम्
अवेक्षमाणां कृपणान्पतींस्तान्।
आधूय वेगेन विसञ्ज्ञकल्पाम्
उवाच दासीति हसन्सवोग्रम् ।। ५१ ।।(०३)

कर्णस्तु तद्वाक्यमतीव हृष्टः
सम्पूजयामास हसन्सशब्दम्।

---

(०१) (१) ब्रुवन्तीं; ब्रुवन्ति; ब्रुवाणा; सुमध्यमां; सुमध्या (for सुमध्यमा); (२) कात्स्नर्येन; कटाक्षेण; कृच्छ्रेण; काङ्क्षेण; भर्तृन्कटाक्षैः (क्षेण); पतीन्कटाक्षैः; मर्दन्कटाक्षैः (for काक्षेण भर्तृन्); कुपिता ह्यपश्यत्; अपि तान; कुपिताद्य पश्यत्; परितान; कुपितान्व; (३) स; तान् (for सा); कोपपरीतदेहा (हात्); विपदि परीतदेहान् ; (४) स दीप;.

(०२) (१) क- धनेन, द्यूतेन; हते० (for हृते);तथाविधेन; (२) महार्घैर्; च मुख्ये (for च मुख्यैर्);च (for न); बभूबुः; (३) यथा तथा; यथार्तायाः; र्तयाः; यथा तथा; यथा त्रपा-; यथार्तिमत्; यथाथ वा; कोपपरीतकेन; क्रोधसमीक्षितेन; समीक्ष्य ; (४) तथा (for कृष्णा-);.

(०३) (१) समीक्षमाणाम्; समक्षकृष्णां; समीक्ष्यमाणाम्; (२) अवेक्ष्यमाण्णं; तथा वदीति; तथा रुदन्तीं; अथो रुदन्तीं; तथा पतन्ती; तथा वदन्तीं; अवेक्ष्यमाणान्; क्ष्यमाणा; क्षमाणां; क्ष्यमाणं; क्षमाणः; कृपणां; णा; णं; (३) विधूय; आकृष्य; आहूय ; (४) आदौ च (for उवाच); सशब्दं ; इवोग्रं ( ग्रो ) इवेदं;.

गान्धारराजः सुबलस्य पुत्रस्
तथैव दुःशासनमभ्यनन्दत् ।। ५२ ।।(०१)

सभ्यास्तु ये तत्र बभूवुरन्ये
ताभ्यामृते धार्तराष्ट्रेण चैव।
तेषामभूद्दुःखमतीव कृष्णां
दृष्ट्वा सभायां परिकृष्यमाणाम् ।। ५३ ।।(०२)

दिष्टं विजानन्निःसङ्गः सर्वशास्त्रविशारदः ।
उवाच द्रौपदीं भीष्मस्तन्मतज्ञो महामतिः ।

भीष्मः

न धर्मसौक्ष्म्यात्सुभगे विवेक्तुं
शक्नोमि ते प्रश्नमिमं यथावत्।
अस्वोऽप्यशक्तः पणितुं परस्वं
स्त्रियाश्च भर्तुर्वशतां समीक्ष्य ।। ५४ ।।(०३)

लक्षालङ्कारः-अस्वोऽप्यशक्त इत्यत्र अस्वः द्रव्यरहितो दरिद्रः गतसकलद्रव्यो वा ।

दिष्टं विजानन् निस्सङ्गस् सर्वशास्त्रविशारतः ।
उवाच द्रौपदीं भीष्मस् तन्मतज्ञो महामतिः ।।(०४)

---

(०१) (१) कर्णश्च; तद्वाचम्; (२) हरन्; सशब्दः; ब्दां; तथेति; (३) सुबलः सुपुत्रः; (४) भ्यनन्दन्;.

(०२) (१) सभ्याश्च; (२) वाभ्यामृते; चाभ्या; धृत (for धार्त); धार्तराष्ट्रं तथैव; (४) द्रष्टुः (for दृष्ट्वा ); कृष्यमाणं; कृष्टमाणां;.

(०३) (१)ह्य (स्वाम्य)०

(०४)अधर्म*क्ष्म्यात्; न धर्मसौक्ष्मान्; धर्मसूक्ष्म्यात्; नैवार्थसूक्ष्म्यत; न धर्मसूक्ष्मान्;विवेक्तुं; विवर्तुं; विपत्तुं; विवेकं; (२) वै (for ते);प्रश्नमिदं; (३) असौ ह्यशक्तः।अयं ह्य; अन्यो शुनी (प्यनी ; ह्मना) शः; अश्वो ह्यसाक्तः; अश्वाम्यश०; अस्वाम्यशक्तः (ब्दः); अन्योन्यशक्तः; अस्वोप्य०; अतोप्य; परितुं; परश्व; परः स्वं; पुनस्त्वां ; (४)क- ध्रुवंतवेदं मतमत्वपद्य । क- परमन्ववेक्ष्य । स्त्रियाश्च;.

त्यजेत्सर्वां पृथिवीं समृद्धां
युधिष्ठिरो सत्यमथो न जह्यात्।
उक्तं जितोऽस्मीति च पाण्डवेन
तस्मान्न शक्नोमि विवेक्तुमेतत् ।। ५५ ।।(०१)

स धर्मः सौक्ष्म्यात्सुभगे विवेक्तुम्
शक्तो जितोऽसीति च पाण्डवेन*(०२)

द्यूतेऽद्वितीयः शकुनिर्नरेषु
कुन्तीसुतस्तेन निसृष्टकामः।
न मन्यते तां निकृतिं महात्मा
स्तस्मान्न ते प्रश्नमिमं ब्रवीमि ।। ५६ ।।(०३)

द्रौपदी

आहूय राजा कुशलैरनायां दुष्टात्मभिर्नैकृतिकैः सभायाम् ।
द्यूतप्रियैर्नातिकृतप्रयत्नं कस्मादयं नाम निकृष्टकामः ।। ५७ ।।(०४)

लक्षालङ्कारः-आहूय राजा इत्यत्र नातिकृतप्रयत्नं धर्मराजमाहूय, कुशलैः कपटद्यूतकुशलैः, एतैः सह कस्मात् निकृष्टकामः एतादृशनीचकार्ये कृतमनाः । कस्मादासीदिति सम्बन्धः ।

---

(०१) (१) त्यजेद्धि; जेच्च; जेत्तु; त्यजेत् (for त्यजेत); त्यजेत्समग्रां (for त्यजेत सर्वां); पृथिवीमपीमां; (२) धर्मपथं; धर्ममतो; धर्ममथो; सत्यधर्मौ (for सत्यमथो); नु; नि- (for न); ष्ठिरो न ह्यधर्मेण जह्यात; (३) यथा (for जितो );.

(०२) (४) विवक्तुम; विविक्त; एव; एवं (for एतत्);.

(०३) (१) क- उछलात्मा चलात्मा; छलात्मा (for नरेषु); (२) कुतिसुतस्; विसृष्ट; निकृष्ट; निकष्टकामं; (३) तान्; मां (for ता); निकृतिर्; युधिष्ठिरः (for महात्मा); (४) न तो यथा (for तस्मान्न ते); प्रश्नमिदं; वदामि (for ब्रवि);न्न ते प्रश्नमिहात्र युक्तं;.

(०४) (१/२) राज्ञां (for राजा); कुशलीः; शकुनैः (ने); कुशले; सभायां अनार्यैः नैकृतकैर; अशौर्यैः (for अना); (३) द्यूतप्रियो; नातिहृतः प्रयत्नः; नातिकृतैः प्र०; नातिकृतप्रयत्नैः; द्यूतः प्रियेनातिकृत

(४)क- ह्यात्म । क-नात्म, तस्माद्; नातिविसृष्टं; कामनिसृष्ट०; चापि निसृष्टं; ममभिसृष्ट०; नाम विसृष्टं; ह्यात्मनिसृष्ट०; नातिनिसृष्टं; नात्मनिसृष्ट; निसृष्टकामः; निकृष्ट;.

स शुद्धकामोर्निकृतिप्रवृत्तिं
अरबुध्यमानः कुरुपाण्डवाग्र्यः।
सम्भूय सर्वैश्च जितोऽपि यस्मात्
पश्चाच्च यत् कैतवमभ्युपेतः ।।५८ ।।(०१)

लक्षालङ्कारः-स शुद्धकाम इत्यत्र सः धर्मराजः पश्चात्तत्कैतवं अभ्युपेतः ज्ञातवान् ।

तिष्ठन्ति चेमे कुरवः सभायामीशाः
सुतानां च तथा स्नुषाणाम्।
समीक्ष्य सर्वे मम चापि वाक्यं
विब्रूत मे प्रश्नमिमं यथावत् ।। ५९ ।।(०२)

न सा सभा यत्र न सन्ति वृद्धा
न ते वृद्धा ये न वदन्ति धर्मम्०।
नासौ धर्मो यत्र न सत्यमस्ति
न तत्सत्यं यच्छलेनानुविद्धम् ।। ६० ।। *(०३)

लक्षालङ्कारः- यच्छलेनानुविद्धम् इत्यत्र च्छलेन अन्तःकपटेन ।

वैशम्पायनः

तथा ब्रुवन्तीं करुणं रुदन्तम्

(०१) (१) क- प्रुत्तेरबूध्यसानः, संशुद्धभानिर्; संशुद्ध (द्धि) भावो; शु (न शु; समृ)द्धकामो; निकृतिप्रवृत्तः; तिं प्रवृत्तिम्; तिप्रयत्नः; तौ च वृत्तिम्; तिप्रबुद्धिम् ; अशुद्धभावैर्निकृतिप्रवृत्तैर; (२) सम्बोध्यमानः; अबुद्धिमानं; स बुध्यमानः; अयुध्यं; कुरुपुङ्गवाग्र्यः अबुध्यमानाः कुरुपाण्डवाग्राः; (३) विजितो; स जितो; (ऽ)द्य; हि (for ऽपि); महात्मा; पियस्यात् (for ऽपि यस्मात् );(४) पश्चादयं (यां); पश्चाचायं (यत्) (for पश्चाच्च यत् ); कैतव्यम्; अभ्युपैति;.
(०२) (१) येमे; वमे०; तेमे (for चे);गुरवः (for कुं); (२) स्नुषाणां (for सुतानां);यथा (for तथा); (२) सर्वं; वाक्यमेतद (for चापि वाक्यं);वाद्यं (for वाक्यं);क्ष्थ सर्वेपि ममापि वाक्यं; (४) ब्रुवन्तु प्रबूत (त्तं);प्रश्नमिदं;विबूतेमे प्रश्नमथापि यावत्;.
(०३)(नो (for न);).

अवेक्षमाणां असकृत् पतीस्तान्।
दुःशासनः परुषाण्यप्रियाणि
वाक्यान्युवाचामधुराणि मन्दः ।। ६१ ।।(०१)

तां क्लिश्यमानां च रजस्वलां च
स्रस्तोत्तरीयामतदर्हमाणाम्।
वृकोदरः प्रेक्ष्य युधिष्ठिरं च
चकार रोषं परमार्तरूपम् ।। ६२ ।। (०२)

अस्मिन् पर्वणि ६०अध्याये ६२श्लोकाः सन्ति

**द्यूतपर्वणि(१२) द्वादशोऽध्यायः**

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि द्यूतपर्वणि द्रौपदीप्रश्ने षष्टितमोऽध्यायः।।६०।।**

# ६१. एकषष्टितमोऽध्यायः

श्रीमन्महाभारततात्पर्यनिर्णये एकविंशाध्याये

दृष्ट्वा भीमः क्लिश्यमानां तु कृष्णां

---

(०१) (१) ब्रुवन्ति; ब्रुवन्ती; ब्रुवाणां; रुदन्ति; रुदन्तीं; ब्रुवाणां; सुदन्तीं; वदन्तीं;तथा ब्रुवाणां रुदन्तीं च कृष्णा; (२) समीक्ष्यमाणां; अवेक्ष्य; कृपणान्; निभृतान् (for असकृत); (३) क- तां परुषाक्षराणि. दुःशासनस्त्व परुषाण्र्; सनस्तां परुषाप्रियाणि (षाक्षराणि); (४) वाक्याणि; वाक्यान्; उवाच वाक्यान्यहितानि चैव;.

(०२) (१) क्लिश्यमानां (णं); क्षिप्यमाणं (for कृष्य); (२) अनिरुह्यमानां; अतदर्हणां च (णांश्च); अतदर्हमानां ; अथ गर्हमाणां; (३) युधिष्ठिरे च; युधिष्ठिरस्य; (४) रुपं; रोषं (for कोपं); र्त्तिरूपः; र्तरुपं; र्थरुपं;.

धर्मात्ययं धर्मराजे च दृष्ट्वा ।
राजा शास्य युवराजेन धर्मात्
चलन् यस्माद् वाक्यमिदं बभाषे ।।३२५।।
इमां न्यस्तवतो द्यूते धक्षणीयौ हि ते भुजौ ।
नैवमित्यर्जुनोऽवादीत् तमाहाथ वृकोदरः ।
वक्तव्यं न तु कर्तव्यं तस्मान्न हि मया कृतम् ।।३२६।।
उत्तमे वचसा शिक्षा मध्यमेऽर्थापहारणम् ।
अधमे देहदण्डश्च तस्माद् वाच्यो युधिष्ठिरः ।।३२७।।
अथ कर्णोऽब्रवीत् कृष्णामपतिर्ह्यसि शोभने ।
धार्तराष्ट्रगृहं याहीत्यथ दुर्योधनोऽवदत् ।
परस्परविरोधार्थं पाण्डवानामिदं वचः ।।३२८।।
युधिष्ठिरो दुःखहेतुस्तवैको यद्येनमन्ये न गुरुर्न एषः ।
इति ब्रूयुरथवा भीमपार्थावेकोऽपि वा भीम इहोत्सृजे त्वाम् ।।३२९।।
इत्युक्त ऊचे पवमानसूनुः
पूज्योऽस्माकं धर्मजोऽसंशयेन ।
गुरुश्चाहं वोऽखिलानां
यतो हि बलज्येष्ठं क्षत्रमाहुर्महान्तः ।।३३०।।
बलज्यैष्ठ्ये यदि वः संशयः
स्यादुत्तिष्ठध्वं सर्व एवाद्य वीराः ।
मृत्नामि वः पादतलेन सर्वान्
सहानुबन्धान् यश्च मां योद्धुकामः ।।३३१।।
इति ब्रुवन् समुत्थितो नदन् वृकोदरो यदा ।
विघूर्णिता सभाऽखिला भयान्न चाऽह किञ्चन ।।३३२।।
भीष्मो द्रोणो विदुराद्याः क्षमस्व
सर्वं त्वयोक्तं सत्यमित्येव हस्तौ ।

गृहीत्वैनं स्थापयामासुरस्मिन्
स्थिते शान्तिं चाऽपिरे धार्तराष्ट्राः ।।३३३।।
निवारितो धर्मजेन गुरुभिश्चापरैस्तदा ।
माननार्थं गुरूणां तु न भीमस्तान् जघान ह ।।३३४।।
नैवातिवर्तते ज्येष्ठं धर्मात्मानं युधिष्ठिरम् ।
तेषां पापाभिवृद्ध्यर्थं ज्येष्ठवृत्तिं च दर्शयन् ।।३३५।।
अथ दुर्योधनः पापो भीमसेनस्य पश्यतः ।
ऊरुं सन्दर्शयामास कृष्णायै भीम आह तम् ।।३३६।।
तवोरुमेनं गदयोरुवेगया बिभेत्स्य इत्येव पुनः सुयोधनः ।
ऊचे नान्यद् भवतामस्ति वित्तं द्यूते कृष्णं स्थापयध्वं पणाय ।।३३७।।
अथाब्रवीद् वृकोदरः कृतेऽवमानने हरेः ।
निपात्य भूतले हि ते शिरो मृदिष्य इत्यलम् ।।३३८।।
स वध्य एव मे सदा परोक्षतोऽपि यो हरिम् ।
विनिन्दयेदिति ध्रुवं प्रतिश्रुतं हि मारुतेः ।।३३९।।
पुनश्च पापवृद्धये तदैव नो जघान तम् ।
विकर्तनात्मजः पुनर्जगाद सोमकात्मजाम् ।।३४०।।
प्रयाहि भूभृतो हि नो गृहं न सन्ति पाण्डवाः ।
इतीरिते समुत्थितौ वृकोदरोऽनु चार्जुनः ।।३४१।।
उभौ च तौ युधिष्ठिरो न्यवारयत् तथाऽपरे ।
ततो निषण्णयोस्तयोः सुयोधनो वचोऽब्रवीत् ।।३४२।।
दुःशासनैषां वासांसि दासानां नो व्यपाकुरु ।
इत्युक्तोऽभ्यगमत् पार्थान् स्ववासांस्यथ ते ददुः ।।३४३।।
ते चर्मवसना भूत्वा तानशिष्टान् प्रकाश्य च ।
निषेदुश्च क्षमायान्ते क्षमामालम्ब्य विस्तृताम् ।।३४४।।
पुनर्दुर्योधनेनोक्तः पार्थानामथ पश्यताम् ।

चकर्ष वासो द्रौपद्यास्तदाऽवादीद् वृकोदरः ।।३४५।।
पापेषु पूर्वस्य तथाऽधमस्य
वंशे कुरूणामुरुधर्मशीलिनाम् ।
दुःशासनस्यास्य विदार्य वक्षः
पिबामि रक्तं जगतः समक्षम् ।।३४६।।
विकृष्यमाणे वसने तु कृष्णा
सस्मार कृष्णं सुविशेषतोऽपि ।
तदाऽन्यदासीद् वसनं च तस्या
दिव्यं सुसूक्ष्मं कनकावदातम् ।।३४७।।
पुनःपुनश्चैव विकर्षमाणे
दुःशासनेऽन्यानि च तादृशानि ।
बभूवुरन्तं न जगाम पापः
श्रान्तो न्यषीदत् स्विन्नगात्रः सभायाम् ।।३४८।।
वस्त्रोच्चये शैलनिभे प्रजाते दुर्योधनः प्राह सञ्जातकोपः ।
प्रवेशयेमां गृहमेव शीघ्रं किं नश्चिरेणेति सुमन्दबुद्धिः।।३४९।।
तच्छ्रुत्वा वचनं कृष्णा प्रतिज्ञामकरोत् तदा ।
भीमो दुर्योधनं हन्ता कर्णं हन्ता धनञ्जयः ।
शकुनिं त्वक्षकितवं सहदेवो वधिष्यति ।।३५०।।
इत्युक्ते तत् तथेत्याह भीमसेनः सभातले ।
प्रतिज्ञामाददे पार्थस्तां माद्रीनन्दनस्तथा ।
नकुलः प्रतिजज्ञेऽथ शाकुनेयवधं प्रति ।।३५१।।

# 02- 06- 61

भीमवचनम् ।। १ ।। विकर्णवचनम् ।। २ ।। दुश्शासनेन द्रौपदीवस्त्रापहारः ।। ३।।श्रीकृष्णप्रसादात् द्रौपद्याः वस्त्रराशिप्रादुर्भावः ।। ४ ।। विदुरवचनम् ।। ५ ।।

भीमसेनकोपस्यार्जुनेन प्रशमनम् । विकर्णस्य धर्म्यवचनस्य कर्णकर्तृको विरोधः दौपद्याश्चीरापहरणं भगवता तदीयलज्जारक्षणं विदुरकर्तृकं प्रह्लादनिदर्शनपुरःसरम् अन्यायविरोधार्थे सभासदां प्रेरणम् ॥

भीमः

भवन्ति वेश्या वर्धक्यः कितवानां युधिष्ठिर।**
न ताभिरपि दीव्यन्ति दया नैवास्ति तास्वपि ॥ १ ॥(०१)

लक्षालङ्कारः-भवन्ति वेश्या वर्धक्य इत्यत्र स्वगृह एव निवेशनयोग्या दास्यो वेश्याः । बहूनां पुरुषाणां स्वयोनिं विक्रीय स्वप्रभोर्धनं वर्धयन्त्यो वाराङ्गना वर्धक्यः ।

काश्यो यद्बलिमाहार्षीद्द्रव्यं यच्चान्यदुत्तमम्।
तथान्ये पृथिवीपाला यानि रत्नान्युपानमन् ॥ २ ॥(०२)

वाहनानि धनं चैव कवचान्यायुधानि च ।
राज्यमात्मा वयं चैव कैतवेन हृताः परैः ॥ ३ ॥(०३)

न च मे तत्र कोपोऽभूत्सर्वस्येशो हि नो भवान्।
इमं त्वतिक्रमं मन्ये द्रौपदी यत्र पण्यते ॥ ४ ॥(०४)

एषा ह्यनर्हती बाला पाण्डवान्प्राप्य कौरवैः।
त्वत्कृते क्लिश्यते क्षुद्रैर्नृशंसैर्निकृतिप्रियैः ॥ ५ ॥(०५)

---

(०१) भीमसेन उं (for भीम उं); (१) क- वार्धक्यः, गेह; वेशं; वेशे; वे( प)श्या (for देशे); बन्धुक्य; बंर्धक्य; बन्धक्यं बंर्धक्या; वार्धक्य; (३) ते (for न); ताभिरपि; ताभिरुप; न ताभिरुद दीप्यति; (४) यदा (for दया); वैवास्ति; नैवास्ति; यै( वै)चास्ति; नेहास्ति; नव्यास्ति; ते विभो ( भोः) (for तास्वपि);.
(०२) (१) कोशो ( श्यो); कोश्या; कामो (for काश्यो); बलम्; धनम् (for बलिम्); आहार्षी; आहार्षीर्; अहार्षी; (२) न्यदद्भुतं; (३) तथान्यं; वीपालान्; नाना (for यानि); (उ)दाहरन् ( त्); ( उ)पानयन् ( त्); हरत्; दधन्;.
(०३)(४) कितवेन; हतं; हृताः; (आ)हृताः; परं; नरैः; कितवैर्निहृताः परैः;.
(०४) (१) ते (for मे); (२) भीमस्येशो हि; सर्वस्पर्शो हि; सर्वधेशोभि; न हि; (३) इमं (for इदं); त्वतिक्रमं; त्वपकृतं; त्वपहृतं; त्वया कृतं; अतिकृतं; राजन् (for मन्ये); (४) दृश्यते; पश्यत (for पण्यते);.
(०५) (१) त्वनर्हती; ह्यनर्हति; ह्यनर्हाति; बालान्; बाल्यात्; एषामनर्हती बाला; (२) भौरवैः; (३) निकृते;

अस्याः कृते मन्युरयं त्वयि राजन्निपात्यते।
बाहू ते सम्प्रधक्ष्यामि सहदेवाग्निमानय ।। ६ ।।[०१]

अर्जुनः

पुरा न भीमसेन त्वमीदृशं वदसे गिरः।
परैस्ते नाशितं नूनं नृशंसैर्धर्मगौरवम् ।। ७ ।।[०२]

न सकामाः परे कार्या धर्ममेवाचरोत्तमम्।
भ्रातरं धार्मिकं ज्येष्ठं कोऽतिवर्तितुमर्हति ।। ८ ।।[०३]

लक्षालङ्कारः-न सकामा इत्यत्र समानकामाः सकामाः। धर्मराजं पराभावयितुं शत्रवः कामयन्ते, त्वमपि तद्वन्न कामयेति भावः ।

आहूतो ऽपि परै राजा क्षात्रं व्रतमनुस्मरन्।
दीव्यते परकामेन तन्नः कीर्तिकरं महत् ।। ९ ।।[०४]

भीमसेनः

एवमस्मिन्कृते विद्यां यधाह स्म धनञ्जय।
दीप्तेऽग्नौ सहितौ बाहू प्रक्षिपेयं बलादिव ।। १० ।।[०५]

लक्षालङ्कारः-एवमस्मिन् कृत इत्यत्र एवं दृश्यमानप्रकारेण कृते धर्मराजेन कृते सति अस्मिन्

---

कृष्यते (for क्लिश्यते); (४) नृशसैरकृ( जि)तात्मभिः; सैरकृतिप्रियैः; सैः सन्निकृति प्रिये; सैर्निकृतप्रियैः;.
(०१)(३) बाहून्; बहु; मे (for ते); सम्प्रधा; सम्प्रव; सम्प्रद्द; सम्प्रय; इमौ बाहू प्रध;.
(०२) (१) न पुनर्; पुरा न; पुरा न भाषसे न त्वम्; न पुरा भीमसेनार्य; (२) गदिता; उक्तबान्; वदसे (for वदिता); ईदृशं ( शी; शीं; शां) वदसे गिरं ( रिं); (३) नृशंसैर्; परैस्तैर्; परैस्तन्; नाशितं सर्वं; नाशनकृतं; नाशितस्तेन; (४) नृशंसं; नृशंसेर्; नृशंसैरात्म गौरवं; धर्मराजस्य गौरवं; नृशंस्थैर्धर्मगौरवः;.
(०३) (१) असकाम्राः; स न कामाः; परैः; परै; नसकामो परे कार्यं; न सकामा परै कार्यो; (२) रोत्तम (for मम्); धर्ममेवावलोकय; मेव नँत्तमं; मेव व( च)रोत्तमं; मेवापरोत्तमं; (३) धार्मिक; श्रेष्ठं (for ज्येष्ठं); (४) कोतिक्रामितुम्; को ति( को वि; को नि)वर्तितुम् (for नातिक्रमितुम्); अर्हसि;.
(०४) (१) आहूतोपि (for तो हि); परे; (२) क्षात्रं व्रतम्; क्षत्रधर्मम्; क्षत्रवृत्तम्; क्षात्रं वृत्तम्; (३) दि॰ यते; दीप्यते; दीव्यन्ते; (४) तन्न; ततः; तत्र; त्वन्नः; कीर्तिपरं; तन्नः कीर्तिर्भविष्यति; तन्नः कीर्तितरं भवेत्;.
(०५) (१) भीम उ; क- एवमस्य कृते विद्यामर्हस्याहं क- यद्यस्याहं। लक्षालङ्कारटीकायाम्- यद्याह स्म, विन्द्यां

धर्मराजे विद्यां धर्मबुद्धिं यदि भवानाह स्म, तर्हि तव च तस्य च सहितौ बाहू अग्नौ प्रक्षिपेयमिति सम्बन्धः ।

वैशम्पायनः

तथा तान्दुःखितान्दृष्ट्वा पाण्डवान्धृतराष्ट्रजः।
क्लिश्यमानां च पाञ्चालीं विकर्ण इदमब्रवीत् ।। ११ ।।(०१)

विकर्णः

याज्ञसेन्या यदुक्तं तद्वाक्यं विब्रूत पार्थिवाः।
अविवेकेन वाक्यस्य नरकः सद्य एव नः ।। १२ ।।(०२)

भीष्मश्च धृतराष्ट्रश्च कुरुवृद्धतमावुभौ।
समेत्य नाहतुः किञ्चिद्विदुरश्च महामतिः ।। १३ ।।(०३)

भारद्वाजोऽपि सर्वेषामाचार्यः कृप एव च ।
कथ एतावपि प्रश्नं नाहतुर्द्विजसत्तमौ ।। १४ ।।(०४)

ये त्वन्ये पृथिवीपालाः समेताः सर्वतो दिशः।
कामक्रोधौ समुत्सृज्य ते ब्रुवन्तु यथामति ।। १५ ।।(०५)

---

(for वि); एवमस्मिन्कृतं वि( विं)द्यां; मस्मिकृतां विद्यां; मस्य ( मस्या) कृते विद्या; ए( नै)वमस्मिन्कृते विद्यां;

(२) यदि नाहं; अर्हस्याहं; यस्यस्याहं; यद्याह ( भवान्); (३) सहिते; बाहु; बाहु; (४) निगूहेहं; निक्षिपेयं; प्रक्षिपेयं ( दं);.

(०१) (१) तथार्ता ( था तां) दुःखितां ( तं) दृष्ट्वा; (३) क्लेश्यमानां; कृष्यमाणां;.

(०२) विकर्ण उं; (१) याज्ञसेन्यां; ते; वै (for तद्); (२) पाण्डवाः (for पार्थिवाः); (३) धर्मस्य; वाक्येन; अनिवेदयतां वाक्यं; .

(०३) (२) कुरुवृद्धौ हि ताबुभौ; वृद्धतमा उभौ; वृद्धाविमाबुभौ; (३) समेतौ; नार्हतः;.

(०४) (१) भारद्वाजो हि; द्वाजश्च; भरद्वाजश्च; (३) कथम्; कुत; अथ (for अत); प्राज्ञौ; प्रश्नाव् (for प्रश्नं); अत एतान्प्रतिप्रश्नं; (४) नोचतुर्; आहतुर्; दशसत्तमौ;.

(०५) (१) यत्त्वन्ये; अन्ये च; ये चान्ये; (२) दिशं; (३) पक्षधर्म (for कामक्रोधौ); (४) ते वदन्तु; विब्रुवन्तु; तद्ब्रुवन्तु; यथा अपि; तथामति; यथाविधि;.

यदिदं द्रौपदीवाक्यमुक्तवत्यसकृच्छुभम्।
विमृश्य कस्य कः पक्षः पार्थिवा वदतोत्तरम् ।। १६ ।।[०१]

वैशम्पायनः

एवं स बहुशः सर्वानुक्तवांस्तान्सभासदः।
न च ते पृथिवीपालास्तमूचुः साध्वसाधु वा ।। १७ ।।[०२]

उक्त्वाऽ सकृत्तथा सर्वान्विकर्णः पृथिवीपतीन्।
पाणौ पाणिं विनिष्पिष्य निःश्वसन्निदमब्रवीत् ।। १८ ।।[०३]

विकर्णः

विब्रूत पृथिवीपाला वाक्यं मा वा कथञ्चन।
मन्ये न्याय्यं यदत्राहं तद्धि वक्ष्यामि कौरवाः ।। १९ ।।[०४]

चत्वार्याहुर्नरश्रेष्ठा व्यसनानि महीक्षिताम्।
मृगयां पानमक्षांश्च स्त्रीषु चैवातिसक्तताम् ।। २० ।।[०५]

एतेषु च नरः सक्तो धर्ममुत्सृज्य वर्तते।
नथाऽयुक्तेन च कृतां क्रियां लोको न पश्यति ।। २१ ।।[०६]

---

(०१) (१) यदि तद्; यदेतद्; (२) शुभा; भां; भः; भं; (३) विमृष्य; विसृज्य; व्रमृश्य; तस्याः; तस्य (for कस्य); कार्यस्य (for कः पक्षः); (४) भवितोत्तमः (त्तरं); बुवतोत्तरं; वदतोत्तरः; पार्थिवाधवदोत्तरं;.

(०२) वैशं उ; (१) सु तु (for स); (२) स; तत् (for तान्); (३) न चैते; नत्त्वे च; न च मे; (४) तामूचुः; साधु साधु; साध्वि साधु;.

(०३) (१) तथाविधान्; (अ) सकृत्तथा (for तथासकृत्); (२) पृथिवीपतिः; (३) पाणिं; पाणौ; (४) निश्वसन्;.

(०४) (१) विकर्ण उ; विब्रुवन्ति महीपाला; (२) वः (for वा); (३) मन्ये न्या ( ना)यं; मन्यवाहं; सत्यं न्याय्यं; मन्योन्याहं; मन्येन्योन्यं; मन्येहं च; यदेवाहं; यदत्राह; (४) तद्वि (for तद्धि);.

(०५) (१) नृपश्रेष्ठा; नृपश्रेष्ठ; जनश्रेष्टा; नतं; मुनिं; जनाः श्रे; चत्वार्याहं मनिश्रेष्ठ; (२) महीभृतां; क्षतां; (३) मृगया; विषयापानमक्षाश्च; मृगया पानमक्षा( मत्ता; मुक्षा)श्व; (४) ग्रामे; स्त्रीषु; तिसक्तता; तिसङ्गमं; तिरक्ततां; तिशक्ततां; तिशक्तिता; भिषक्ततां; तिशिक्तता; तिसक्तिता; तिसत्तमाः;.

(०६) (१) च; (ए)व; तु (for हि); रतः (for नरः); (३) यथायुक्तेन; च; कृती; कृता; कृताः;

तथेयं पाण्डुपुत्रेण व्यसने वर्तता भृशम्।
समाहूतेन कितवैरास्थिता द्रौपदीपणम्: ।। २२ ।।(०१)

साधारणी च सर्वेषां पाण्डवानामनिन्दिता।
जितेन पूर्वं चानेन पाण्डवेन पणे कृना: ।। २३ ।।(०२)

इयं च कीर्तिता कृष्णा सौबलेन पणार्थिना।
एतत्सर्वं विचार्याहं मन्ये न विजितामिमाम् ।। २४ ।।(०३)

वैशम्पायनः

एतच्छ्रुत्वा महान्नादः सभ्यानामुदतिष्ठत।
विकर्णं शंसमानानां सौबलं चापि वि निन्दताम् ।। २५ ।।(०४)

तस्मिन्नुपरते शब्दे राधेयः क्रोधमूर्च्छितः।
प्रगृह्य रुचिरं बाहुमिदं वचनमब्रवीत् ।। २६ ।।(०५)

कर्णः

दृश्यन्ते वै विकर्णेह वैकृतानि बहून्यपि।

---

यथा नियुक्तेन कृतां; (४) क्रिया; लोपो (for लोको); पश्यति (for मन्यते); क्रियां लोकोनुमन्यते; क्रियां लोकोनुवर्तते; नृलोकोयं न मन्यते; क्रियां लोके न पश्यति;.

(०१) (१) तदियं; यदिदं; यदयं; तथेयं ( थैवं); (२) तिष्ठता (for वरतता); भृतां (for भृशम्); व्यसने परिवर्तता( तां); व्यसने तिष्ठटआ ध्रुवं; (३)क- समानीतेन कितवैसाहिता द्रोपदी पणम्। समानि( मनि)तेन; कैतवैर्; (४) आस्थितौ; अस्थिता ( नीता; हिता) द्रौपदी पणं ( णे);.

(०२) (१) साधारणा; रणा; रणे; (३) निन्दितां; (३) चान्येन; (४) कृता( कृतो) पणः; ततः पणः; कृता पणं; पणीकृता;.

(०३) (१) जयं (for इयं); स (for च); (३) विचार्यैव; र्याह; (४) विजिनमिति; महं; मिह; अन्यायेन जितामिमां;.

(०४) वैशं उ; (१) महानादः; (२) मध्यनाम्; उपतिष्ठत; उदतिष्ठति; उपतिष्ठति; (३) र्णं शंसतां चैव; र्णं संशतां चैव; र्णं स्तूयमानानां; (४) ल चापि निन्दा( नदि)तां; लं चैव निन्दतां; लं च विनिन्दितां ( त);.

(०५) (१) वैशं उं; वाक्ये (for शब्दे); (२) विकर्णः (for राधेयः);(३) वि (for प्र); विपुलं; सुचिरं;ऽ

तज्जातस्तद्विनाशाय यथाग्निररणिप्रजः ।। २७ ।।[०१]

लक्षालङ्कारः-अरणीप्रज इत्यत्र प्रकर्षेण जातः प्रजः ।

व्याधिर्बलं नाशयते शरीरस्थोपि सम्भृतः।*
तृणानि पशवो घ्नन्ति स्वपक्षं चैव कौरवः ।। २८ ।।*

लक्षालङ्कारः-तृणानि पशव इत्यत्र तृणानि स्वास्तरणतृणानि ।

द्रोणो भीष्मः कृपो द्रौणिर्विदुरश्च महामतिः।
धृतराष्ट्रश्च गान्धारी भवतः प्राज्ञवत्तराः ।। २९ ।।[०२]

एते न किञ्चिदप्याहुश्चोद्यमानाश्च कृष्णया।
धर्मेण विजिताकृष्णां मन्यन्ते द्रुपदात्मजाम् ।। ३० ।।[०३]

त्वं तु केवलबाल्येन धार्तराष्ट्र वदिष्यसि।
यद्ब्रवीषि सभामध्ये बालः स्थविरभाषितम्।[०४]
न च धर्मं यथावत्त्वं वेत्सि दुर्योधनावर ।। ३१ ।।

यद्ब्रवीषि जितां कृष्णां न जितेति सुमन्दधीः।[०५]

---

(०१) (१) दृश्यते; र्णेह; र्णे तु; र्णोस्मि; र्णेन; दृश्यन्ते हि विकर्णे वै; (२) विकृतानि; वै कातानि; बहूनि च; (३) तज्ज्ञा तस्य; तज्जास्तस्य; तज्जातस्तद्; त्तजयास्य; तज्जन्यस्य; तैर्जातस्तद्; तर्जस्तस्य; स्वजनस्य; तज्जस्य; तज्ज; (४) अरणीप्रज; अरणीग्रजः; अरणीव्रजं;.

(०२)( नाशयति; सम्भृतं; संसृतः; वशिपो (for पशवो); कौरवाः; द्रौणी; द्रोणिर्; भारताः (for भवतः);).

(०३)(२) चोद्यमाना हि; चोदिता अपि; चोद्यमानोपि; चोदिता ह्यपि; चोद्यमानाश्च ( नास्तु; नस्य); (३) कृष्णेनं (for धर्मेण); विजिता; जीवितां (for विजितां); एतां; कृष्णां (for मन्ये); (४) मन्यते; मन्यन्ते च नृपात्मजां ( जः; जा); निर्जितां कथं;.

(०४) (१) किं (for त्वं); केवलबालेन; (२) धार्तराष्ट्रं; राष्ट्रान्; विदीर्यते; विहन्यसे; विदार्यसे; वदि ( पति; वधि; प्यति)ष्यसि; धार्तराष्ट्रो वदीर्मसे; (३) यं (for यद्); सभां मध्ये; (४) बालः स्थाविर; बाल स्थविरं; बाला स्थविरं; बाल्य; बालं मन्ये नृपात्मज;.

(०५) (१) तथा तत्वं; यथावत्वं; तथा वक्तुं(वे त्सि); (२) धर्म (for वेत्सि); धनानुज; धनावरः; (३) जितं; एतां (for कृष्णाम्); (४) न जितेति; जितेति च; प्रमत्तधीः; स मन्दधी; न मन्दधीः;.

कथं ह्यविजितां कृष्णां मन्यसे धृतराष्ट्रज ।। ३२ ।।

यदा सभायां सर्वस्वं न्यस्तवान्पाण्डवाग्रजः।(०१)
अभ्यन्तरांश्च सर्वस्वान् द्रौपदी नरतर्षभ ।। ३३ ।।(०२)
एवं धर्मजितां कृष्णां मन्यसे न जितां कथम् ।। ३४ ।।(०३)

कीर्तिता द्रौपदी वाचा अनुज्ञाता च पाण्डवैः।
भवत्यविजिता केन हेतुनैषा मता तव ।। ३५ ।।(०४)

अहं मन्ये सभामेतामानीतामेकवाससम्।
अधर्मेणेति तत्रापि शृणु मे वाक्यमुत्तमम् ।। ३६ ।।(०५)

एको भर्ता स्त्रियो देवैर्विहितः कुरुनन्दन।
इयं त्वनेकवशगा बन्धकीति विनिश्चिता।(०६)
अस्याः सभामानयनं न चित्रमिति मे मतिः ।। ३७ ।।(०७)

एकाम्बरधरत्वं वाप्यथ वापि विवस्त्रता ।। ३८ ।।(०८)

यच्चैषां द्रविणं किञ्चिद्या चैषा ये च पाण्डवाः।

---

(०१) (१) ह्यवर्जितां; त्वविजितां; (२) धार्तराष्ट्रज; (३) यथा (for यदा); सर्वस्य; (४) पाण्डुनन्दनः;.

(०२) (१) सर्वस्वं; सर्वस्य; सर्वासु; सर्वे स्वे; अभ्यन्तरांश्च ( रां च; राश्च) सर्वस्वां; रांश्च सर्वस्वं; अभ्यन्तरा; (२) द्रौपदीं च नरर्षभः ( भ);.

(०३) (१) धर्मार्जितां; (२) त्वजितां; निर्जितां; न जिता;.

(०४) (१/२) वाचा त्वनु; वाचा सानु; वाचानु; वाचाप्यनु; वाचा ह्यनुं; (४) हेतुनेष्टा; मते; कृता (for मता); मम (for तव);.

(०५) (१) मन्यसेथ; न मन्यसे; मन्यसे यत्; अहं मन्ये; सभामध्यम्; (२) एकवाससाः; ससां; ससा; ससीं; (३) णणि; ण हि; णति (for णेति); ता चापि (for तत्रापि); (४) मुत्तमं;.

(०६) (१) स्त्रियो; स्त्रियां; दैवीर्; वेदैर्; (२) नन्दनं; न; (३) अयं; त्वनेकपुरुषा; वसना; पतिका( कां; गा); (४) बन्धुकीति ( र्ति); वर्धकीति;.

(०७) (१) अस्याः सभायां नयनं; अस्या सभायामाना( ना)यनं; अस्यां सभायामानार्यां; .

(०८) (३/४) एकवस्त्रधरत्वं; एकाम्बरधरं त्वं; वा अथ; चप्यथ; वा प्राप्य (for वाप्यथ); विवज्रतां;.

सौबलेनेह तत्सर्वं धर्मेण विजितं वसु ।। ३९ ।।[०१]

दुःशासन सुबालोऽयं विकर्णः प्राज्ञवादिकः।
पाण्डवानां च वासांसि द्रौपद्याश्चाप्युपाह ।। ४० ।।[०२]

वैशम्पायनः

तच्छुत्वा पाण्डवाः सर्वे स्वानि वासांसि भारत।
अवकीर्योत्तरीयाणि सभायां समुपाविशन् ।। ४१ ।।[०३]

ततो दुःशासनो राजन्द्रौपद्या वसनं बलात्।
सभामध्ये समाक्षिप्य व्यपाक्रष्टुं प्रचक्रमे।
आकृष्यमाणे वसने द्रौपद्या चिन्तितो हरिः ।। ४२ ।।[०४]

(५)क-(अधिकः पाठः)

सा तत्कालेतु गोविन्दे विनिवेशितमानसा।
त्राहि मां कृष्ण कृष्णेति दुःखादेतदुदाहृता ।।

ज्ञातं मया वसिष्ठेन पुरा गीतं महात्मना ।
महत्यापदि सम्प्राप्ते स्मर्तव्यो भगवगहरिः ।। ४३ ।।

कुरुभिः परिभूतां मां किं न जानासि केशव ।
महिषीं पाण्डुपुत्राणामाजमीढकुले वधूम् ।
साहं केशग्रहं प्राप्ता त्वयि जीवति केशव ।। ।।

---

(०१) (१) तथैषां; यथास्या; यधैतद्; यच्च तद्; यच्चैव; द्रविडं; द्रौविणं; (२) वैषा (for चैषा); एष (for ये च); (३) लेन च; लेन हि; लेन ह; सौबलेन हतः सवं; (४) मम (for वसु);.

(०२) (१) सुबलो; दुःशासनस्तु बालोयं; (२) विकीर्णः; प्राज्ञसंमतः; प्रज्ञयाधिकः; प्राज्ञतात्त्विकः; तागिरः; वातिकः; वाचिकः; (४) श्चाप्यपाहर; श्चाभ्युपाहर; हरत्;.

(०३) (१) श्रुत्वैवं (for तच्छुत्वा); (२) स्वस्य (for स्वानि); (४) समुपाविशत्;.

(०४) (१) राजा (for राजन्); (३) सहा क्षिप्य; समाकृष्य; (४) विचक्रष्टुं० व्यव; व्यप( पा; व)हर्तुं; व्यपाक्रष्टं; (अ)प्यपक्रष्टुं; क्रष्टुमुपचक्रमे;.

वैशपायनः

गोविन्द द्वारकावासिन्कृष्ण गोपीजनप्रिय ।*
कौरवैः परिभूतां मां किं न जानासि केशव ।*
हे नाथ हे रमानाथ व्रजनाथार्तिनाशन ।*
कौरवार्णवमग्नां मामुद्धर जनार्दन ।*
कृष्ण कृष्ण महायोगिन्विश्वात्मन्विश्वभावन ।*
प्रपन्नां पाहि गोविन्द कुरुमध्येवसीदतीम् ।*
इत्यनुस्मृत्य कृष्णं सा हरिं त्रिभुवनेश्वरम् ।*
प्रारुदद्दुःखिता राजन्मुखमाच्छाद्य भामिनी ।*
याज्ञसेन्या वचः श्रुत्वा कृष्णो गह्वरितोभवत् ।
त्यक्त्वा शय्यासनं पद्भ्यां कृपालुः कृपयाभ्यगात् ।(०१)
कृष्णं च विष्णुं च हरिं नरं च त्राणाय विक्रोशति याज्ञसेनी ।
ततस्तु धर्मोत्रतरितो महात्मा समावृणोत्तां विविधैर्वस्त्रपूगैः ।(०२)
सा तत्काले तु गोविन्दे विनिवेशितमानसा ।
त्राहि मां कृष्ण कृष्णेति दुःखादेतदुदाहृतम् ।
त्वया सिंहेन नाथेन रक्षमाणामनाथवत् ।
चकर्ष वसनं पापः कुरूणां संनिधौ मम ।
अपकृष्यमाणे वसने विललाप सुदुःखिता ।*

गोविन्देति समाभाष्य कृष्णेति च पुनः पुनः ।*
मनसा चिन्तयामास देवं नारायणं प्रभुम् ।। ४४ ।।

---

(०१)( सद्म; पद्मं; सद्य (for पभ्द्यां);).

(०२) ( वैशं उ; कृष्णं, विष्णुं; कृष्णं; जिष्णुं (for विष्णुं ); चुक्रोश च (for विक्रोशति); ततश्च; ततोथ; तां; वै (for तां); धैश्च वस्त्रैः; धै सुवस्त्रैः; धैर्वस्त्रयुग्मैः; धैर्वस्त्रपुण्यैः;).

आपत्स्वभयदं कृष्णं लोकानां प्रपितामहम् ।। ४५ ।।

द्रौपदी-

शङ्खचक्रगदापाणे द्वारकानिलयाच्युत ।
गोविन्द पुण्डरीकाक्ष रक्ष मां शरणागताम् ।। ४६ ।।[०१]

हा कृष्ण द्वारकावासिन्कासि यादवनन्दन ।
इमामवस्थां सम्प्राप्तामनाथां किमुपेक्षसे औ ।। ५७ ।।

आकृष्यमाणे वसने द्रौपद्यास्तु विशाम्पते।[०२]

तस्य प्रसादाद्द्रौपद्याः कृष्यमाणेम्बरे तथा ।
तद्रूपमपरं वस्त्रं प्रादुरासीदनेकशः ।। ४९।।[०३]

अष्टोत्तरशतं यावद्वसनं प्रचकर्ष ह ।[०४]

नानानाविरागाणि वसनान्यथ वै प्रभो ।
प्रादुर्भवन्ति शतशो धर्मस्य परिपालनात् ।। ५०।।[०५]

ततो हलहलाशब्दस्तत्रासीद्घोरदर्शनः।
तदद्भुततमं लोके वीक्ष्य सर्वे सभासदः।[०६]
धिग्धिगित्यशिवां वाचमुत्सृरुन्दौरवं प्रति ।। ५१ ।।[०७]

शशसुर्द्रौपदीं तत्र कुत्सन्तो धृतराष्ट्रजम् नही है ।। ५२ ।।[०८]

---

(०१)( विकृष्यमाणे; अ(आ)कृ; अपक्ष्यमाणे;).
(०२) (१) विकृष्यमाणे; अप( व)कृष्यमाणे; (२) च; तद् (for तु);.
(०३)( यस्य (for तस्य); तदा (for तथा);) (४) दनेकधा; न्न केशवः;.
(०४) ( एकोत्तरं (for अष्टोत्तरं);).
(०५) ( नानारागविचित्राणि; रगविरागाणि; प्रादुर्बभूवुः; प्रति (for परि);).
(०६)(२) तत्राभूद्; घोर निःस्वनः; दर्शनः; (३) तदद्भुततत्तां; तमभ्दुततमं; (४)क-महीक्ष्तः. प्रेक्ष्य; सर्वे महीक्षितः ( ताः); सर्वे महीभृतः; सर्वे( र्वं) महीक्षितां; सर्वे सभासदः;.
(०७) ( त्यनिशं; अब्रुवन्; उत्सृजुः;).
(०८)( कुत्सयन्; हासितं;).

शशाप तत्र भीमस्तु राजमध्ये महास्वनः।
क्रोधाद्विस्फुरमाणौष्ठो विनिष्पिष्य करे करम् ।। ५३।।(०१)

भीमः

इदं मे वाक्यमादध्वं क्षत्रिया लोकवासिनः।
नोक्तपूर्वं नरैरन्यैर्न चान्यो यद्वदिष्यति ।। ५४ ।।(०२)

यद्येतदेवमुक्त्वातु न कुर्यां पृथिवीश्वराः।
पितामहानां पूर्वेषां नाहं गतिमवाप्नुयाम् ।। ५५ ।।(०३)

अस्य पापस्य दुजोतेर्भारतापसदस्य च ।
न पिबेयं बलाद्वक्षो भित्त्वा चेद्रुधिरं युधि ।। ५६ ।।(०४)

वैशम्पायनः

तस्य ते तद्वचनं श्रुत्वा सर्व लोकप्रहर्षणम्।
प्रचक्रुर्बहुलां पूजां कुत्सन्तो धृतराष्ट्रजम् ।। ५७ ।।(०५)

यदा तु वाससां राशिः सभामध्ये समाचितः।

---

(०१) (१) शशाप भीमसेनस्तु; (२) सभामध्ये; राजमध्य; बृहत्स्वनः( नं); महत्स्वनः; वृकोदरः; महास्वरं ( रः); (३) क्रोधाद्विस्फुरमाणौष्ठो ( ष्ठौ); क्रोधा ( क्रौष्ठा) त्प्रस्फुरमाणौष्ठो ( णोष्टो; णौष्ठौ); क्रोधवि णोष्ठो; (४) ष्य कलेवरं;.

(०२) (१) भीमसेन उं; भीम उं; मादत्स्व; मारब्धं; मादत्वं; (२) पार्थिवा (for क्षत्रिया); (३) नरैर्धन्यो; (४) चाग्र्यो; यपिष्यति; वदी; वधि; विवक्ष्यति; न कृतं हि कृतं यथा;.

(०३) (१) यदेतदेवम्; यदेवमेवम्; अद्यैतदेवम्; यद्येवमेतद्; उक्ता; च; (अ)हं; नु (for तु); (२) कुप्यन्ति (for न कुर्यां); पृथिवी वराः; न कुर्यात्पृथिवीश्वरः; (३) पूर्वेषां; (४) प्नुयात्;.

(०४) (१) दुर्ज्ञातेर्; दुर्बुद्धेर्; (२) भरताप; परितापं; भारतापश; ह (for च); (४) यद्; (अ)थ (for चेद्); यदि; रणे (for युधि);.

(०५)वैशं उं; (१) तद् (for ते); तद्वचः (for वचनं); (२) सर्वे रोमग्रहर्षणं; सर्वलोमप्र; सर्वे लोकप्र; रौद्रं रोमप्र; सर्वलोकप्रकम्पनं; सर्वे लोमप्रहर्षणं; रौद्रं लोमप्रं; (३) दुर्बलां; विपुलां (for बहुलां); (४) प्रकुस्य; कुत्सयन्; कुत्स तं; कुत्सितं;.

ततो दुःशासनः श्रान्तो व्रीडितः समुपाविशत्।[०१]

धिग्धिकशव्दस्ततस्तत्र समभूद्रोमहर्षणः।
सभ्यानां नरदेवानां दृष्ट्वा कुन्तीसुतांस्तदा ।। ५८ ।।[०२]

न हिब्रुवन्ति हि कौरव्याः प्रश्नमेतमिति स्म ह ।
स ज्जनः क्रोशति स्मात्र धृतराष्ट्रं विगर्हयन् ।। ५९ ।।[०३]

ततो बाहू समुध्दृत्य निवार्य च सभासदः।
विदुरः सर्वधर्मज्ञ इदं वचनमब्रवीत् ।। ६० ।।[०४]

विदुरः

द्रौपदी प्रश्नमुक्त्वैवं रोरवीति ह्यनाथवत्।
न च विब्रूत तं प्रश्नं सभ्या धर्मोऽत्र पीड्यते ।। ६१ ।।[०५]

सभां प्रपद्यते प्रश्नः प्रज्वलन्निव हव्यवाट्।
तं वै सत्येन धर्मेण सभ्याः प्रशमयन्त्युत ।। ६२ ।।[०६]

धर्मप्रश्नमतो ब्रूयादार्यः सभ्येषु मानवः।

---

(०१) (१) राशि; (२) समाविशत्; समाचिताः; समन्वितः; समापितः; हितं; (३) तदा (for ततो); शान्तो; (४) व्रीलितः;.

(०२) (१) क- धिक्कारस्सुमहांस्तत्र, धिग्धिकशब्दस्; धिक्शब्दश्च; धिग्धिक्चजस्; तत्र तत्र; धिक्कारः ( धिक्शब्दः) सुमहांस्तत्र; धिकब्दस्तत्र तुत्रासन्; (२) भूल्लोक; भूद्रोमं; (४) पाण्डु (for कुन्ती); तथा (for तदा);.

(०३) (१) हि ब्रुवन्ति; ब्रुवन्ति हि (for विब्रु); (२) प्रश्नमेतद्; मेतान् (for मेतम्); प्रश्नमेतत् मिति स्मरन्; (३) सज्जनः; सुजनः; राजानं; स ज( सज्ज )नः क्रोशते त( स्मा)त्र; स जातक्रोधितस्तत्र; स जातः क्रोधिता स्मात्र; (४) धार्तराष्ट्रान्;.

(०४) (१) बाहुं ( हु); समुत्सृज्य; त्क्षिप्य; त्स्मृत्य; द्धृत्य; (२) निर्वार्य; (४) श्लक्ष्णं (for इदं);.

(०५) (१) त्त्यैव; त्केयं; त्त्वैषा; त्क्तोवं; त्कैव; त्क्तौवं; (२) रौर; त्वनाथ; (३) विकृतकं (for विब्रूत तं); धर्मं (for प्रश्नं); (४) हीयते; पीडते; विद्यते; पीड्यते; सभ्यधर्मो हि पीड्यते; सत्या धर्मोपहीयते;.

(०६) (१) प्रतपते; स्मार्तः; प्रश्नः ( श्नं) (for ह्यार्तः); सभां मध्ये प्रतेपद्य; (३) सर्वेण; समेत्य (for सत्येन); (४) सभा (for सभ्याः); प्रश्नमं;.

तेनब्रूयुस्तत्र  प्रश्नं कामक्रोध वशानुगाः ।। ६३ ।।(०१)

विकर्णेन यथाप्रज्ञमुक्तः प्रश्नो नराधिपाः।
भवन्तोऽपि हि तं प्रश्नं विब्रुवन्तु यथामति ।। ६४ ।।(०२)

यो हि प्रश्नं न विब्रूयाद्धर्मदर्शी सभां गतः।
अनृते या फलावाप्तिस्तस्याः सोऽर्धं समश्नुते ।। ६५ ।।(०३)

यः पुनर्वितथं ब्रूयाद्धर्मदर्शी सभां गतः।
अनृतस्य फलं कृत्स्नं सम्प्राप्नोतीति निश्चयः ।। ६६ ।।(०४)

अत्राप्युदाहरन्तिमम् तिहासं पुरातनम्।
प्रह्लादस्य च संवादं मुनेराङ्गिरसस्य च ।। ६७ ।।(०५)

प्रह्लादो नाम दैत्येन्द्रस्तस्य पुत्रो विरोचनः।
कन्याहेतोराङ्गिरसं सुधन्वानं उपाद्रवत् ।। ६८ ।।(०६)

अहं ज्यायानहं ज्यायानिति कन्येप्सया तदा।

---

(०१) (१) धर्मं; धर्म्मं (for धर्म); मतो (for मथो); ब्रूयुर् (for ब्रूयाद्);(२) आर्ता( आत्तः)सभ्येषु; आर्यः सत्येन; आर्तः सत्येन; आर्तः ( र्यः) सत्येषु; एतत्सत्येन; आप्तः सभ्येषु; मानवाः; येन वः; धर्मदर्शी सभासदः; (३) तस्य (for तत्र); तं (for ते); प्रस्थं; ते न ब्रूयु( त) स्ततः प्रश्नं; ते न ब्रूत कथं प्रश्नं; न ब्रूयुश्च ततः प्रश्नं; (४) वशानुगाः; बलातिगाः; विवर्जिताः;.

(०२) (१) विकर्णो न; विकीर्णेत; यथैवायम्; यथाप्रश्नम्; प्रश्नः; प्राज्ञम्; (२) उक्ताः प्रश्नो; एतत्प्रश्नो; पूर्वमुक्तो; उक्तमुक्तं; उक्तप्रश्नो नराधिपः; (३) विदितो (for भवन्तो); पीह; पि ह; सहि; धर्मं (for प्रश्नं);(४) विकुर्वतु; विबुवन्ति; अबुवतु; नराधिपाः; यथामति;.

(०३) (१) विदुरः; ये भि (for यो हि); नु न (for न वि); (२) सभागतः; सतां गतः; समागतः; (३) अमृते; अनृतो; यो (for या); फलप्राप्तिसू; अनृते यातनाप्राप्तिसू; (४) तस्य; तस्यार्धं स स( र्थं सम)मश्नुते; तस्या अर्धं सम;.

(०४) (२) सभा( मा)गतः; (३) अमृतस्य; सर्वं (for कृत्स्नं); (४) समाप्नो; स प्राप्नो; यत्प्राप्नो; निश्चितः ( यः); स प्राप्नोति न संशयः; प्राप्नोती( स प्राप्नो; सम्प्राप्नो)ति विनिश्चयः;.

(०५) (३) प्रह्रादस्य च; प्राह्लादेश्चैव; संवादो; (४) मुनेराङ्गीं; आङ्गिरसस्य;.

(०६) (१) प्रह्रादो; (२) पुत्रस्तस्य विरो; (३) कन्याहेतोरङ्गिरसं; सङ्गीरसं; कन्या हेमवती नाम;.

तयोर्देवनमत्रासीत्प्राणयोरिति नः श्रुतम् ।। ६९ ।।(०१)

तयोः प्रश्नविवादोऽभूत्प्रह्लादं तावपृच्छताम्।
ज्यायान्क आवयोरेकः प्रश्नं प्रब्रूहि मा मृषा ।। ७० ।।(०२)

स वै विवदनाद्भीतः सुधन्वानं विलोकयन्।
तं सुधन्वाब्रवीत्क्रुद्धो ब्रह्मदण्ड इव ज्वलन् ।। ७१ ।।(०३)

लक्षालङ्कारः-स वै विवदनात् इत्यत्र विवदनात् विरुद्धस्य कथनात् ।

सुधन्वा

यदि वै वक्ष्यसि मृषा प्रह्लादाथ न वक्ष्यसि।
शतधा ते शिरो वज्री वज्रेण प्रहरिष्यति ।। ७२ ।।(०४)

लक्षालङ्कारः-यदि वै वक्ष्यसि इत्यत्र न वक्ष्यसि सत्यं न वक्ष्यसि ।

**विदुरः**

सुधन्वना तथोक्तः सन्व्यथितोऽश्वत्थपर्णवत्।
जगाम कश्यपं दैत्यः धृतराष्ट्र महौजसम् ।। ७३ ।।(०५)

प्रह्लादः

त्वं वै धर्मस्य विज्ञाता दैवस्येहासुरस्य च ।

---

(०१)(२) ष्मयादितः; (३) ततो; तावद् (for तयोर्);.

(०२) (२) प्रह्वादं; प्रह्लादस्तत्र पृच्छतां; (३) ज्यायान्न; अथा (for क आ); रेकं; (४) विब्रूहि; विब्रूत; मारिषा; मां नृप (for मा मृषा);.

(०३) (१) विदुर उं; स मृषावचनाद्भीतः; स वै वि( हि)वचनाद्भीतः( द्भूय); (२) विलोकयन्; विलोकयत्; व्यलोकयन्; अलोकयत; (३) तत् (for तं); सुधन्वा न ब्रवीरक्रुद्धो; (४) इवोज्वलन्;.

(०४) (१) यदि वा; वक्षसि; वक्ष्यसे; (२) प्रह्लाद वां; प्रह्वादाथ; वक्षसि; प्रह्लादो न भविष्यसि; प्रह्लादाय विनक्ष्यसि; (४) वज्रेण निहनिष्यति; वज्रेणापहरिष्यति;.

(०५) (१) स; तु (for सन्); (२) पथितो; व्यथते; पत्रं (for पर्ण); (३) जगाद; काश्यपं; जग्मतु काश्यपान्दैत्यौ; (४) परिद्रष्टुं; धृतराष्ट्र ( ष्ट्रं); जनाधिपं (for महौ);.

ब्राह्मणस्य महाप्राज्ञ धर्मकृच्छ्रमिदं शृणु ।। ७४।।[०१]

यो हि प्रश्नं न विब्रूयाद्वितथं वा विनिर्दिशेत्।
के च तस्य परे लोकास्तन्ममाचक्ष्व पृच्छतः ।। ७५ ।।[०२]

कश्यपः

प्रश्नान् यो हि न विब्रूयान् कामात्क्रोधाद्भयात्तथा।
सहस्रं वारुणान्पाशानात्मनि प्रतिमुञ्चति ।। ७६ ।।[०३]

साक्षी च विभुवन्साक्ष्यं गोकर्णशिथिलश्चरन् ।[०४]
सहस्रं वारुणान्पाशानात्मनि प्रतिमुञ्चति ।। ७७ ।।[०५]

लक्षालङ्कारः-साक्षी च विब्रुवन् इत्यत्र साक्ष्यं साक्षिसम्बन्धिवचनं विब्रुवन् विपरीततया वदन् । गोकर्णशिथिलं चरन् इत्यत्र गोकर्णशिथिलं गौः आर्तानां प्रश्नवाक् कर्णात् श्रोत्रात् शिथिला विस्रंसिता यथा भवति तथा चरन् आचरन्, औद्धत्यात्तत्प्रश्नवाक्यमेवाशृण्वन्नित्यर्थः । यद्वा गोकर्णशिथिलं गोः प्रष्टुर्वचनस्य कर्णः कर्णनमाकर्णनं तस्मिन् जातेऽपि शिथिलः प्रत्युत्तराच्छिथिलो भ्रंशितो यथा भवति तथा चरन् आचरन्, प्रष्टुः प्रत्युत्तरमवदन्नित्यर्थः ।

'यो हि प्रश्नं न विब्रूयाद्वितथं वाऽपि निर्दिशत्' इति प्रागपि अवचनविपरीतवचनयोरुक्तत्वा दत्राप्ययमेवार्थः ।

---

(०१) (१) प्रह्राद उ; प्रह्लादौ; त्वा (for त्वं); हि (for वै); विज्ञात; सर्वज्ञ; (२) देवस्येहासु( हाम; ह सु)रस्य च; दैवस्यैवासु( स्येह सु)रस्य च; (३) ब्राह्मस्य च; ब्राह्मणः स; णः सन् (for णस्य); महाबुद्धे; भाग; प्राज्ञो; (४) कृत्स्नम्; इमं (for इदं);.

(०२) (१) हि (for वै); प्राप्तं (for प्रश्नं); तु (for न); (२) चापि; चैव; वा वि (for वापि); हितं चापि न ( नैव वि; चैव वि; चैव) निर्दिशेत्; (३) किं तु; किं नु; के च; केचित् (for के वै); लोके (for लोकास्); (४) तं ममा; सत्यमा; तान्ममां;.

(०३) (१) प्रश्नान्; जाननप्यब्रवीत्प्रश्नान्; जानन्प्रश्नं च न ब्रूयात्; जानन्नपि ब्रुवन्प्रश्नं; जानन्न विबुयात्प्रश्नं ( श्नान्); प्रश्नान्यो हि ( प्रश्नं यो) न विमूयात्; जानन् अविब्रु; विब्रुवन्; (२) कामक्रोधात्; कामाक्रोधो; कामतोथ; तथा ( तदा); भयात्; (३) सहस्रान्; (४) प्रविमुञ्चति;.

(०४) ( च वि; चापि (for वा वि); वाक्यं; साक्ष्या (for साक्ष्यं); गोकर्ण( र्णे) शिथिलं; चिरं; चरेत्;).

(०५) ( सहस्रान्; प्रविमुचति;).

तस्य संवत्सरे पूर्णे पाश एकः प्रमुच्यते।
तस्मात्सत्यं हि वक्तव्यं जानता सत्यमञ्जसा ।। ७८ ।।[०१]

विद्धो धर्मो प्यधर्मेण सभां यत्रोपपद्यते।
न चास्य शल्यं कृन्तन्ति विद्धास्तर्वे सभासदः ।। ७९ ।।[०२]

लक्षालङ्कारः-न चास्य शल्यम् इत्यत्र अस्य धर्मस्य । विद्धाः पापविद्धाः।

*५५८ (अधिकपाठः - कपाठे)
पादो गच्छति कर्तारं पादः साक्षिणमर्छति ।
पादः सभासदः सर्वान्पादो राजानमर्छति ।

अर्धं भजति वै श्रेष्ठः पादो भवति कर्तृषु।
पादश्चैव सभासत्सु ये न निन्दन्ति निन्दितम् ।। ८० ।।[०३]

अनेना भवति श्रेष्ठो मुच्यन्ते च सभासदः।
एनो गच्छति कर्तारं निन्दार्हो यत्र निन्द्यते ।। ८१ ।।[०४]

लक्षालङ्कारः-एनो गच्छति इत्यत्र कर्तारं निन्दार्हप्राचीनपापकर्तारं निन्द्यं एनः निन्दकानां श्रेष्ठादीनां एनः पापम् ।

वितथं तु वदेयुर्ये धर्मं प्रह्लाद पृच्छते।

---

(०१) (१) वर्षां( र्षे)शते (for संवत्सरे); (२) विमुच्यते; पाशमेकं प्रमुञ्चति; (३) अस्मात; हि; वि; च (for तु); तस्मात्सर्वं प्रवक्तव्यं;.

(०२) (१) धर्मोप्यधर्मेण; (२) सभां ( भा) यत्रो पपद्यते; सभां धत्ते सभासदः; (३) वा( या)स्य; चल्यं; शल्या; कृन्तन्ती; कृन्दन्ति; (४) विद्धांस्तत्र; विद्धवा तत्र; विद्धांस्तत्र; वि( वृ)द्धाः सर्वे;.

(०३) (१) भवति; भजति (for हरति); श्रेष्ठं; श्रेयः( ष्ट); ष्ठा; अर्धं हरन्ति वै श्रेष्ठाः; (२) वादो; भजति; (३) पादश्चैकः; पादश्चैक; पादैश्चैव; सभावत्सु; पादः सदसदः सर्वान्; (४) विन्दन्ति; निन्दितुं; पादो राजानमृच्छति; ये निन्दन्त्येप्यनिन्दते; यत्र निन्दति निन्दितं;.

(०४) (१) अनेन; अर्धेन भरतश्रेष्ठ; (२) मुह्यन्ति; मुच्यन्ति; हि (for च); प्रमुच्यन्ते सभां; (३) मनो; एता (for एनो); एते गच्छन्ति कर्तारं;(४) निन्द्यार्हो; निन्दार्हे; निन्दावो; निन्दते; निन्दति; निन्द्यो यत्र न निन्दति;.

इष्टापूर्तं च ते घ्नन्ति सप्त चैव परावरान् ।। ८२ ।।(०१)

हृतस्वस्य च यद्दुःखं हतपुत्रस्य चैव यत्।
ऋणिनः प्रति यच्चैव स्वार्थाद्भ्रष्टस्य चैव यत् ।। ८३ ।।(०२)

लक्षालङ्कारः-स्वार्थाद्भ्रष्टस्य इत्यत्र स्वार्थात् स्वारब्धप्रयोजनात् ।

स्त्रियाः पत्या विहीनायाः साध्यद्भ्रष्टसस्य चैव यत्।

अध्यूढाश्च यद्दुःखं साक्षिभिर्विहतस्य च ।। ८४ ।।(०३)

लक्षालङ्कारः-अध्यूढाः अधिकया सपत्न्या सह ऊढाः ।

अपुत्राया यतुःस्त्रं व्याघ्राघ्रातस्य चैव यत् ।(०४)
एतानि वै समान्याहुर्दुःखानि त्रिदिशेश्वराः ।। ८५ ।।(०५)

तानि दुःखानि सर्वाणि प्राप्नोति वितथं ब्रुवन् ।। ८६ ।।(०६)

समक्षं दर्शनात्साक्षी श्रवणाच्चेति धारणात्।

(०१) (१) वितथे; च (for तु); (२) धर्म; प्रह्लाद; दमृच्छते; द पृच्छति; (३) इष्टं पूर्तं; (४) सप्त सप्त; सप्तत्वे च; सत्यं चैव; परापरान्;.

(०२) (१) च (for हि); अग्रतस्वस्य च दुःखं; (२) हृत; मृतं (for हतं); चैव यत्; चासकृत; (३) दारणं; दारिघ्रं; ऋणिनः; ऋणिनां; दरिद्राणां च यच्चापि ( चैव); ऋणिनामपि यच्चैव; वैरिणा प्रतिपन्नस्य; (४) राजा (for राज्ञा); सार्थभ्रष्टस्य; सार्थाद्भ्रष्ट; स्वार्थभ्रष्ट; स्वार्थाद्भ्रष्ट; साक्षाद्भ्रष्ट; राज्ञा प्रास्तस्य (for राज्ञा ग्रस्तस्य); चैव यत्; चैव ह; चायः; चासि च;.

(०३) (१) स्त्रयं; स्त्रियां; पति ( पत्य; भर्तृ)विहीं; (२) राज्ञा ग्रस्तस्य; स्वार्था( साक्षा) द्भ्रष्टस्य; सार्धहृष्टस्य; चापि यत्; चैव ह; सोर्थो हृष्टस्य चाभवत्;.

(०४)(३) अब्यु(च्चू)ढा; अनूढा; अध्यूढायां च; (४) साधुभिर् (for साक्षिभिर्); विवृतस्य; निह; विहिं;.

(०५) (१) एतत्तानि (for एतानि वै); (२) त्रिदिवेश्वराः ( रः); त्रिदशेश्चर;.

(०६) (१) नाति (for तानि); सर्वाणि; दुःस्वानि; तानि सर्वा ण्यचाप्नोति;
(२) सभायां (for प्राप्नोति); वितथा; वदन्; कृतं;.

तस्मात्सत्यं ब्रुवन्साक्षी धर्मार्थाभ्यां न हीयते।(०१)

लक्षालङ्कारः-समक्षं दर्शनात् इत्यत्र इति समक्षं दर्शनं यथा, तथा श्रवणात्, धारणात् पत्रशिलादिषु शासनरूपेण धारणात् ।

विदुरः-

कश्यपस्य वचः श्रुत्वा प्रह्लादः पुत्रमब्रवीत् ।। ८७ ।।

प्रह्लादः-

श्रेयान्सुधन्वा त्वत्तो वै मत्तः श्रेयांस्तथाङ्गिराः।(०२)
माता सुधन्वनश्चैव श्रेयसी मातृतः तव ।। ८८ ।।(०३)

विरोचन सुधन्वायं प्राणानामीश्वरस्तव ।। ८९ ।।(०४)

सुधन्वा

पुत्रस्नेहं परित्यज्य यस्त्वं धर्मे प्रतिष्ठितः।
अनुजानामि ते पुत्रं जीवत्वेष शतं समाः ।। ९० ।।(०५)

विदुरः

एवं वै परमं धर्मं श्रुत्वा सर्वे सभासदः।
यथाप्रश्नं तु कृष्णाया मन्यध्वं तत्र किं परम् ।। ९१ ।।(०६)

लक्षालङ्कारः-मन्यध्वं तत्र इत्यत्र तत्र कृष्णायाः प्रश्ने ।

---

(०१) (१) क-सार्धं,समक्ष्य; समस्त; समक्षं; समर्थ; साक्षां; साक्षी; सार्धं; (२) वेति (for चेति); धारणा; श्रवणाद्धावधारणात्; श्रवणाद्धैतधौरणात; धारणं; (३) शक्यं (for सत्यं); वदन् (for बुवन्); बाक्यं; साक्ष्यं;.

(०२) (३) सुधर्मा; सुधर्मान्; त्वत्तोपि; वृत्तो वै; (४) मतः; मत्त; तथा( था)गिरः;.

(०३) (१) चैव (for चापि); (२) श्रेयसी; मातृतः; महतस् (for मातृतस्); तथा (for तव);.

(०४) (१) न्वा तु; (४) तत (for तव);.

(०५) (१) त्यज्य; पुत्रस्तेहं; (२) यस्तं; यस्त्व; यत्त्वं; स त्वं; सत्ये (for धर्मे); व्य( ह्य)वस्थितः; व्यवस्तीतः; प्रतिष्ठतः; (३) अनुं; जीव; अनुजानीहि; पुत्र; पुत्रो; (४) जीवत्येष;.

(०६) (१/२) एवं; सर्वे; एतं वै; एतद्वै; एवं ते; धर्म; श्रुत्वा; सर्व; धर्मे;(३)क- यथाप्रज्ञं. तथा प्रश्नं;

वैशम्पायनः

विदुरस्य वचः श्रुत्वा नोचुः किञ्चन पार्थिवाः।
कर्णो दुःशासनं त्वाह कृष्णां दासीं गृहान्नय ।। ९२ ।।(०१)

तां वेपमानां सव्रीडां लोकयान्ती च पाण्डवान्।
दुःशासनः सभामध्ये विचकर्ष तपस्विनीम् ।। ९३ ।।(०२)

अस्मिन् पर्वणि ६१अध्याये ९३श्लोकाः सन्ति

**द्यूतपर्वणि(१३) त्रयोदशोऽध्यायः**

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि द्यूतपर्वणि द्रौपद्याकर्षणेऽष्टषष्टितमोऽध्यायः।। ६१।।**

# ६२. द्विषष्टितमोऽध्यायः

## 02- 06- 62

द्रौपदी

तावत् प्रतीक्ष दुष्प्रज्ञ दुश्शासन नराधम ।

पुरस्तात्करणीयं मे न कृतं कार्यमुत्तरम्।

---

यथाप्रज्ञं ( ज्ञा); प्राश्न; यथाप्रश्नस्य; यथाप्रश्नः स (for श्नं तु); च (for तु); याज्ञसेन्या (for तु कृष्णाया); कृष्णायां; (४) वदध्वं; यतध्वं; चात्र; यत्र; वै (for किं); चिरं; परां;.

(०१)(२) केचन; (३) प्राह; हत्वा; चाह (for त्वाह); (४) कृष्ण; कृष्णा; कृष्णं; दासी; परान्नय; त्वमानय; इहानय; गृहं ( ग्रहं) नय;.

(०२) (१) संव्रीडां; सव्रीडो; सव्रीलां; (२) प्रलपन्ति स्म; पन्तीं च; विलपन्तिं ( ती) स्म; लोकयन्तीं च; पाडवं; (३) दुशासन; (४) चिकीर्षत;.

विह्वलास्मि कृतानेन कर्षता बलिना बलात् ।। १ ।।(०१)

लक्षालङ्कारः-पुरस्तात्करणीयम् इत्यत्र कार्यं दुश्शासनहस्तच्छेदाख्यकार्यम् । विह्वला कृताऽस्मीति सम्बन्धः ।

अभिवादं करोम्येषां कुरूणां कुरुसंसदि।
न मे स्यादपराधोऽयं यदिदं न कृतं मया ।। २ ।।(०२)

वैशम्पायनः

सा तेन च समाध्दूता दुःखेन च तपस्विनी।
पतिता विललापैवं सभायामतथोचिता ।। ३ ।।(०३)

द्रौपदी

स्वयंवरे यास्मि नृपैर्दृष्टा रङ्गे समागतैः।
अ दृष्टपूर्वा चान्यत्र साहमद्य सभां गता ।। ४ ।।(०४)

यां न वायुर्न चादित्यो दृष्टवन्तौ पुरा गृहे।
साहमद्य सभामध्ये दृश्यास्मि जनसंसदि ।। ५ ।।(०५)

यां न मृष्यन्ति वातेन स्पृश्यमानां गृहे पुरा।
स्पृश्यमानां सहन्तेऽद्य पाण्डवास्तां दुरात्मना ।। ६ ।।(०६)

---

(०१)(२) कार्यमुत्तमं; (२) विंहला; ०ला सा (for ०लास्मि); (४) कर्षिता; ललिना; बलिनो;.

(०२) (१) अभिवादनं; अभिवाद्यं; म्येषा; (२) कुरूणां० (for गु); गुरु; चैव (for कुरु); (३) स्यात्रापराधोयं; स्यादपराधं च; (४) यदेनो न; यदिदं च; यदि तन्न; पुरा; मम (for मया);.

(०३) (१) तेन च; तु (for च); समाधू (हू; धृ)ता; समुद्धूता; द्धाता; (३)क- विह्वला चैव. विललापैवं; विहृला चैव; (४) थोचितं;.

(०४) (१) यामि; चास्मि; दृष्टा (for नृपैर्); (२) दृष्टरङ्गे; नृपै रङ्गे; दृष्टा गेहे; सभागतै; दृष्टगेहे समास्थिता; (३) न दृष्टपूर्वा; अ (for न); (४) साहमस्मि; सभागता; समाग;.

(०५) (१) या मां; यान्न; या न; यन्न; वादित्यो; चादितो; (२) दृष्टवन्तो; पुरो; पुरं; ग्रहे; (३) साहमस्मि; (४) क्लिश्यामि; दृष्टास्मि; कृष्यास्मि; कृतास्मि; कृष्यामि; दृशामि; दृश्यास्मि (सि); जन संसदि; कुरुभिःसमं; गुरुसनिधौ; गुरुसंसदि दृष्टा चानयसंसदि;.

(०६) द्रौपदी; (१) ये न; मां न; यां मां; न मां; मृष्यति; मृश्यन्ति; पातेन; वै तेन (for वातेन); (२)

मृष्यन्ते कुरवश्चेमे मन्ये कालस्य पर्ययम्।
स्नुषां दुहितरं चैव क्लिश्यमानामनर्हतीम् ॥ ७ ॥[०१]

किं न्वतः कृपणं भूयो यदिदं स्त्री सती शुभा।
सभामध्यं विगाहेऽद्य क्व नु धर्मो महीक्षिताम् ॥ ८ ॥[०२]

लक्षालङ्कारः-यत् यस्मात् इदं द्यूतम् ।

धर्म्यां स्त्रियः सभा पूर्वे न नयन्तीति नः श्रुतम्।
स नष्टः कौरवेयेषु पूर्वो धर्मः सनातनः ॥ ९ ॥[०३]

लक्षालङ्कारः-धर्मं स्त्रियः सभां पूर्णाम् इत्यत्र 'स्याद्धर्ममस्त्रियाम्' इत्यभिधानात् धर्ममिति नपुंसकम् । न नयन्तीति नञः सम्बन्धः ।

कथं हि भार्या पाण्डूनां पार्षतस्य स्वसा सती।
वासुदेवस्य च सखी पार्थिवानां समामिमाम् ॥ १० ॥[०४]

लक्षालङ्कारः-पार्थिवानां सभामिमाम् इत्यत्र कथं नीतेति योग्यक्रियया सम्बन्धः ।

मामिमां धर्मराजस्य भार्यां सदृशवर्णजाम्।

---

स्पृश (०शा) माना (नां); क्लिश्यमानाः; स्पृश्यमाणां; स्पृश्यमाना; गृहे पुरा; पुरा ग्रहे; पुरोगृहे; ०पश्यमानां महारथाः; (३) स्पृश; क्लिश्य; स्पृष्यमाणां; सहान्तेऽद्य; सहतेऽद्य; सभामध्ये; सहन्ते क्लिश्यमानानां; (४) वांस्ते; वास्ते; दुरात्मभिः; सदैः; सदाः; त्मनः; धर्मपाशनियन्त्रिताः;.

(०१) (१) मृष्यति (०त); मृश्यते; पश्यन्ति; मृश्यन्तः; गुरवश; सर्वे; चान्ये; चैव (for चेमे); (२) पर्ययात्; पर्ययः; मन्ये कालविपर्ययं; (३) चेमां (for चैव); (४) क्लिष्यमाणाम्; र्हतां; ०हती; र्हतिः;.

(०२) (१) किं त्वत्तः; किं न्वतः; किं तु वः; किं ततः (०मः) कृपणां भूयो; ०णं भूयाद्; णा भूता; ०णाहूता; (२) यदिदं (for यदहं); सयसतः (for स्त्रीं सती); शुभा सती; सभां गता; (३)क- सभामध्यंविशाम्यद्य, सभामध्ये; विवादेयं; विगर्हेद्य; विगाह्येद्य; विशाम्यद्य; (४) क्व च धर्मो; क्षत्रधर्मो (मं); महीभृतां;.

(०३) (१) धर्म्या; धर्माः; धर्म्या स्त्रियं; धर्मस्त्रियः; धर्मस्त्रियं; धर्मार्थास्त्री; धर्म स्त्रियः; स्त्रियं; सभा; पृर्वे (for पूर्वं); धर्म स्त्रियं सभामध्ये; धर्मे चैव स्त्रियं पूर्वं; न पतन्तीति; नानयन्तीति; नयन्तीति न; न; मे (for नः); शिं; (३) स दृ (द)ष्टः; स नष्टोयं कौरवेषु; (४) पूर्व-; सर्वो (for पूर्वो); धर्म-;.

(०४) (१) भार्या; पार्थानां (for पाण्डूनां); कथं भार्या पाण्डवानां; पाण्डूनां; (१) पार्षदस्य; स्वसां सतीं; (३) वसु सखीं; (४) पार्थिवस्य; ०मियात्; ०मियं; ०मिमां;.

ब्रूत दासीमदासीं वा किंत्करिष्यामि कौरवाः ।। ११ ।।(०१)

अयं हि मां सुदृढं क्षुद्रः कौरवाणां यशोहरः।
क्लिश्नाति नाहं तत्सोढुं चिरं शक्ष्यामि कौरवाः ।। १२ ।।(०२)

नृशंसानुमतो रोषादविज्ञायैव दुर्जनः ।
गुरूणां संमुखे चापि सतीव्रतपरायणाम् ।
क्लेशासहां सभामध्ये धृतराष्ट्रो नयन्नृपः
अनाचारप्रवृत्तो वै पश्यतां धर्मकोविदाः ।(०३)

जितां वाप्यजितां वापि मन्यध्वे वा यथा नृपाः।
तथा प्रत्युक्तमिच्छामि तत्करिष्यामि कौरवाः ।। १३ ।।(०४)

भीष्मः

उक्तवानस्मि कल्याणि धर्मस्य परां गतिम्।
लोके न शक्यते गनितुम् मपि विप्रैर्महात्मभिः ।। १४ ।।(०५)

बलवांस्तु यथा धर्मं लोके पश्यति पूरुषः।
स धर्मो धर्मवेलायां भवत्यभिहतः परैः ।। १५ ।।(०६)

---

(०१) (१) तां मां वै; मामिमां; ता मां हि; (२) सदृशवर्चसां; द्रुपदनन्दिनीं; सदृशवंशजां; वर्णजाः; अदृशवर्णजां; (३) मां (for वा); (४) किं (for तत्); करिष्यन्ति; कौरव;.

(०२) (१) ह्रीमां; मां हि; मां सु; मा सु; हि मा; ह्ढः; महा; क्षुद्रं; क्षुद्र;.

(०३)(३) क्लिश्नामि; क्लियाति; क्लित्रन्ति; क्लिश्याति; न हि; नार्हं; साहं; सोढुं वै; सा दुःखं (for तत्सोढुं); (४) शक्यामि; द्रक्ष्यामि; शिक्ष्यामि; किं करिष्यामि कौरवाः;.

(०४) (१) जिता ०जितं; वा ये (for वापि); (२) मन्यध्वे; मां (for वा); वाप्यथो; (३) प्रत्युक्तिम्; (४) वो वचः; तद्वचः; सत्तमाः (for कौरवाः);.

(०५) (१) उक्तवानसि; उक्तवत्यसि; (२) धर्मस्यास्य (for धर्मस्य तु); परमां (for तु परां); परा गतिः; परां गतिः; पराभवं; धर्मस्य (स्व-) परम गतिः; परां; (३) शक्ष्यते; वक्तुं; ज्ञातुं (for गन्तुम्); (४) इति; नापि (for अपि); विज्ञैर् (for विप्रैर्); दुरा० (for महा);.

(०६) (१) धावं; बलं; च; स; हि (for तु); महा- (for यथा); धर्मो; र्म; (२) लोक्यं; लोकं; पौरुषः; पौरुषं; पूर्वशः; पूरुषाः; लोके भवति नित्यदा; (३) स धर्माधर्मं; अधर्मो धर्मं; धर्मो ह्यधर्मं; ०वेलाया; (४)

न विवेक्तुं तु ते प्रश्नमिमं शक्नोमि निश्चयात्।
सूक्ष्मत्वाद्गहनत्वाच्च कार्यस्यास्य च गौरवात् ।। १६ ।।(०१)

लक्षालङ्कारः-कार्यस्यास्य च गौरवात् इत्यत्र अस्य भविष्यतः भूभारहरणाख्यस्य । अनुमोदनात्पाण्डवस्य सूक्ष्मत्वात्कार्यगौरवाय ।(०२)

नूनमन्तः कुलस्यायं भविता नचिरादिव ।
तथा हि कुरवः सर्वे लोभमोहपरायणाः ।। १७ ।।(०३)

कुले जाता तु कल्याणि व्यसनाभ्यागता भृशम् ।
धर्मान्मार्गान्न च्यवन्ते यथा नस्त्वं वधूः स्थिता ।। १८ ।।(०४)

लक्षालङ्कारः-कुले जाता इत्यत्र भृशं व्यसनाभ्यागता एते धर्मान्मार्गान्न च्यवन्ते । 'वधूर्जाया स्नुषा' इत्यभिधानात् त्वं नः अस्माकं सर्वेषां वधूः स्नुषा यथा तथा भवसीति योजना।

उपपन्नं च पाञ्चालि तवेदं वृत्तमीदृशम्।
यत्कृच्छ्रमपि सम्प्राप्ता धर्ममेवान्ववेक्षसे ।। १९ ।।(०५)

---

भिहतः; विहितः; परः; अभिहितः परैरिवतिपाठे तु धर्मवेलायामपि परैर्बलवद्भिरुक्त एव धर्मो भवति न दुर्वलोक्तः । इति अकारं
प्रश्लिष्य योज्यम् ।;.
(०१) (१) न विवेक्तुं; विवक्तुं; हि वक्तुं; भवेत्तं; हि; तु; न (for च); न हि शक्नोमि ते प्रश्नम्; (२) एवं; एनं; इमं (for एतं); शक्नोति; वक्तुं च (for शक्नोमि); निश्चात्;.
(०२) (४) क-धर्मस्य; कार्यं;.
(०३) (१) नूनं मत्तः; पुरस्यास्य; (२) भविष्यत्यचिरा; (३) यथा; स ते; (४) महा (for लोभ); लोभमोहवशानुगाः;.
(०४) (१) कूलेषु; जाता; जातः; कल्याणो; णी; णा; ण्यो; (२) वसना; व्यसनाभिहता; भ्यां हता; नैराहता; नाभ्याहता; नाभ्यासता; व्यधनाभ्याह; व्यसनाभ्यागतः; (३) धर्मान्मा; धर्ममा; वभर्यान्मा; प्रच्यवन्ते; न वध्यन्ते; न रोचन्तेल न च्यवन्ति; (४)क- यथातत्त्वव्यवस्थिताः। येषां (for यथा); न (for नस्); तथा (for स्थिता); यथातत्त्व (०तत्त्वं; ०सि त्वं)- व्यवस्थिताः;.
(०५) (१) पाञ्चाली; (२ तवेद; तदेवं; तदिदं-वृत्तिम्; उत्तमं (for ईदृशम्); तदेव मृत्युमीदृशं; (३) यत्कृत्समपि; या कृच्छ्रमापत्; यत्कष्टमपि; यलछ्रमभि-; यऋछ्रं भृश-; यत्कृच्छ्रमधि; (४) ०वानुपेक्षसे; ०वाम्बवेक्ष्यसे; ०वानुबेक्षसे; ०वान्वर्ड्क्षसे; ०व वलक्षये;.

एते द्रोणादयश्चैव वृद्धा धर्मविदो जनाः।
शून्यैः शरीरैस्तिष्ठन्ति गतासत्वा इवानताः ।। २० ।।(०१)

युधिष्ठिरस्तु प्रश्नेऽस्मिन्प्रमाणमिति मे मतिः।
अजितां वा जितां वेति स्वयं व्याहर्तुमर्हति ।। २१ ।।(०२)

अस्मिन् पर्वणि ६२अध्याये २१श्लोकाः सन्ति

**द्यूतपर्वणि(१४) चतुर्दशोऽध्यायः ।**

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि द्यूतपर्वणि द्रौपद्याकर्षणे द्विषष्टितमोऽध्यायः।। ६२।।**

# ६३.त्रिषष्टितमोऽध्यायः

## 02- 06- 63

भीमादिभिर्दुर्योधनादिहननाप्रतिज्ञा ।। १ ।। द्रौपद्या दुर्योधनादीनां शापदानसमये अन्तरिक्षात् पुष्पवृष्टिः ।। २ ।।

वैशम्पायनः

तथा तु तां सर्वगुणोपपन्नां
रोरूयमाणां कुररीमिवार्ताम्।
नोचुर्वचः साध्वथ वाप्यसाधु
महीक्षितो धार्तराष्ट्रस्य भीताः ।। १ ।।(०३)

---

(०१) (१) एतद् (for एते); सर्वे (for चैव); (२) विद्धा; ज्ञात्वा (for वृद्धा); गतसत्वा (for गतासव); इव स्थिताः; इवागताः; इवाननाः; इवान्विताः आनताः;.
(०२)(२) प्रधानम् (for प्रमाणम्); (३) वा त्वां (त्वा); वेति; वात्मा (for वापि); (४) अजितं वा जितं वापि; जितां वाप्यजितां वा त्वां; (४) आहर्तुम् (for व्या); इच्छति; अर्हसि; स्वयमेवान्ववेक्षति;.
(०३) (१) यथा; च (for तु); कृष्णां (for दृष्ट्वा); बहु तत्र देवीं (वं); बहु तत्तदेव; बहुधा तु देवीं; बभशस्तदेव० (०दैव; थैव); तथा तु तां सर्वगुयोपपन्नां; (२) कररि-मिवात्तां; (४) ०राष्ट्रप्रभीताः;.

दृष्ट्वा तु तान् पार्थिवपुत्रपौत्रांस्
तूष्णीं भूतान्धृतराष्ट्रस्य पुत्रः।
स्मयन्निवेदं वचनं बभाषे
पाञ्चालराजस्य सुतां तदानीम् ।। २ ।।(०१)

तिष्ठत्वयं प्रश्न उदारसत्त्वे
भीमेऽर्जुने सहदेवे तथैव।
पत्यौ च ते नकुले याज्ञसेनि
वदन्त्वेते वचनं त्वत्प्रसूतम् ।। ३ ।।(०२)

अनीश्वरं विब्रुवन्त्वार्यमध्ये
युधिष्ठिरं तव पाञ्चालि हेतोः।
कुर्वन्तु सर्वे चानृतं धर्मराजं
पाञ्चालि त्वं मोक्ष्यसे दासभावात् ।। ४ ।।(०३)

लक्षालङ्कारः-अनीश्वरम् इत्यत्र राज्यस्य ईश्वरो न भवतीत्यनीश्वरः तम् ।

धर्मे स्थितो धर्मराजो महात्मा
स्वयं चेदं कथयत्विन्द्रकल्पः।
ईशो वा ते ह्यनीशोऽथ वैष
वाक्यादस्य क्षिप्रमेकं भजस्व ।। ५ ।।(०४)

---

(०१) (१) दृष्ट्वाथ तान्; दृष्ट्वा तथा; दृष्ट्वा तु तां; (२) कृंष्णीभूतान्; सभूणीभूतां; तूष्णीम्भूतां; तूष्णीभूतान्; राष्ट्रस्य पुत्राः; राष्ट्रः सुपुत्रः; (३) हसन् (for स्मयन्); (४) सुदीनां (ना); दु दीनां (for तदानीम्);.

(०२) (१) दुर्योधन उ; तिष्ठत्ययं; तिष्ठ त्वं; उदारशीले; (२) भीमार्जुने; भीमो; तथैवं; मदन्ये (for तथैव); (३) तथैव पत्यौ ते; पत्यौ ते च; पतौ च ते; पत्या च ते; याज्ञसेनी; (४) वन्दतु ते; वदन्त्येते; वदं (वद) त्वेतद्; त्वत्पुरस्तात्; त्वत्प्रयुक्तं; सम्प्रयुक्तं; त्वं प्रसूतं; वदन्तु ते वचः साधु प्रसूतं;.

(०३) (१) अनीश्वरे; विवदन्त्वा०; विबुवं (०व) त्या; न बुवन्त्वा; (२) ०ष्ठिरसू; ०ष्ठिरे; (३) कुर्व च; कुर्वन्तु ते; वानृतं; ह्यनृतं; राजो; (४) त्वां; त्वा (for त्वं); मोक्षसे; दासिभावात्.

(०४) (१) धर्मसुतो; धर्मराजा; (२) वेदं (for चेदं); कथयन्न्त्विन्द्र०; यन्तिन्द्र; (३) ईशोहं ते; ईशोद्य ते;

सर्वे हीमे कौरवेयाः सभायां
दुःखान्तरे वर्तमानास्सदैवम्।
न विब्रुवन्त्यार्यवृता यथावत्
पतींश्च ते समवेक्ष्याल्पभाग्यान् ।। ६ ।।[०१]

वैशम्पायनः-

ततः सभ्याः कुरुराजस्य तत्र
वाक्यं सर्वे प्रशशंसुस्तथोच्चैः।
चे लावेधांश्चापि चक्रुर्नदन्तो
हाहेत्यासीदपि चैवात्रनादः।[०२]
सवे जारन्पार्थिवाः प्रीतिन्तः
कुरुश्रेष्ठं धामिकं पुजयन्तः ।। ७ ।।

श्रुत्वा तु तद्वाक्यमनोहरं तद्धर्षश्चासीत्कौरवाणां सभायाम्।[०३]
श्रुत्वा चेदं धार्तराष्ट्रस्य चोक्तं भवत्विदं धर्मयुक्तं सदैव ।

---

ईशो हितो; ते; ह्यनीशो (for यद्यनीशो); (ऽ)थ चैव; (ऽ)प्यथैष; (ऽ)प्यथैव; (ऽ)न्यथैष; (ऽ)थ वेषां; (४) वाक्यं तस्य; वाक्यादेष; क्षिप्रमेवं;.

(०१) (१) सर्वेपीमे; कौरवास्ते; कौरवायाः; (२) दुःखार्णवे; सदैव; तवेमे; तवेदं; तदैवं; त्वदीये; सदैवं; सदर्थे; तथैव; त (त्व) दर्थे (for तवैव); (३) न ब्रुवन्ति; न विबुवन्तु; न हि ब्रुवन्ति; इति ब्रुवन्तु; नाविब्रुवन्ति; (ए) व सत्या; (आ)र्यसभ्या; (आ)र्यवृत्ता (त्तं); न विब्रुवन्त्यार्यमत्वाद्यथामति; (४) पतीशॣ; पतीन्; चैतान्; स ते; चेमांस्ते (for च ते); समावेक्ष्य; प्रसमीक्ष्य; समवेता; भागान्; ०भागाः;.

(०२) वैशं० (१) ततस्तस्यां; तस्याः सभायाः; ततः सदस्याः (for ततः सभ्या;); तस्य; पुत्र; ज्ञा; पुत्रं; वाक्यं (for तत्र); (२) श्रुत्वा (for वाक्यं); श्रुत्वा (for सर्वे); तथोच्चैः; तथैव; तदानीं; तदुच्चैः; तदेव; तदैवं; तदैव; (३) वेलावेधाशॣ; चेलापधांशॣ; वेलावेधं; बलाधिपाशॣ; चेलावेधाशॣ; चेलवेधाशॣ; चेलावेलाशॣ; चेलाः (चेटाः प्रेष्याः) वेधान् (पर स्परेण चक्षुःसकेतम्), चेलावेधान् वस्त्रभ्रामणानीति प्राश्वः चैव (for चापि); कुर्वन्; (अ)कुर्वन्; चक्षुर्; चे (चै)लानि चैवादुधुबुर्नदन्तो; (४) अथ (for अपि); तत्रैव; चैवाति; चैवार्त; चात्रैव (for चैवात्र);.

(०३) (६) पार्थिवं (for धार्मिकं);.

युधिष्ठिरं च ते सर्वे समवैक्षन्त पार्थिवाः।
किं नु वक्ष्यति धर्मात्मा इति साचीकृताननाः ।। ८ ।।(०१)

लक्षालङ्कारः-साचीकृतानना इत्यत्र साचीकृताननाः तिर्यक्कृतवदनाः ।

किं नु वक्ष्यति बीभत्सुरजितो युधि पाण्डवः।
भीमसेनो यमौ चेति भृशं कौतूहलान्विताः ।। ९ ।।(०२)

तस्मिन्नुपरते शब्दे भीमसेनोऽब्रवीदिदम्।
प्रगृह्य विपुलं वृत्तं भुजं चन्दनरूषितम् ।। १० ।।(०३)

यद्येष गुरुरस्माकं धर्मराजो युधिष्ठिरः।
न प्रभुः स्यात्कुलस्यास्य न वयं मर्षयेमहि ।। ११।।(०४)

ईशो हि नः पुण्यतपाः प्राणानामपि चेश्वरः।
मन्यतेऽजितमात्मानं यद्येष विजिता वयम् ।। १२ ।।(०५)

न हि मुच्येत सञ्जीवन् पदा भूमिमुपस्पृशन्।
सत्यधर्मान् परामृश्य पाञ्चाल्या मूर्धजानिमान् ।। १३ ।।(०६)

लक्षालङ्कारः-न हि मुच्येत सञ्जीवन् (?) इत्यत्र पाञ्चाल्याः इमान् मूर्धजान् उपस्पृशन् अयं

---

(०१) (२) समवैक्षन्त; समुदीक्षन्ति; समवेक्षं (क्ष्यं)त; (३) तु (for नु); वक्षति; धर्मज्ञ वक्ष्यति; धर्मज्ञे; धर्मात्मा; किं वक्ष्यसि च धर्मज्ञ; (४) स्नाति (for इति); साचि; साचि (सात्वि) तिर्यक् । ०कृताननः;.

(०२) वक्ष्यति (१) तु (for नु); वक्षति; (२) जितोयं (for अजितो); वापि; वाथ (for युधि); पाण्डवाः; अजितात्मा महाबलः; (३) भीमसेनौ; चोभौ; वेति; चापि; चैव;.

(०३) (१) वाक्ये (for शब्दे); (३) रुचिरं (for विपुलं); प्रगृह्य रुचिरं चिव्यं; (४) बाहुं (for भुजं); चं (मं) दनभूषितं; चर्चितं; रुक्षितं;.

(०४) (१) भीम उ०; भीमसेन उ; यदेष; यद्यार्य; (२) महामनाः (for युधिष्ठिरः); (३) प्रभुः स्यान्न कुल; (४) मर्षयीमयि; मर्षयामहे; वर्षयेमहि; मर्षयं मही;.

(०५) (१) यशो (for ईशो); ईशो हि ईह्शो नः पुणयतपाः (पः; कर्मा); (२) चेतसः (for चेश्वरः); (३) मन्येताजित; मन्यते यदि; (४) यदैवं; यद्येवं; यथे (थै) ष; यद्यैते; विजितां;.

(०६) (१) वि (for हि); जीवन् मे; (२) पादा; भूमिमपि स्पृ; (३) मृत्युधर्मान् (त्); पश्य धर्म; मृत्युधर्मान्; परामृष्य; परामृष्टां; (४) पाञ्चालीमूर्धं;.

दुश्शासनः मे पदा पादेन भूमिमुपस्पृशन् पादघातेन भूमौ निपातित इत्यर्थः । जीवन्न मुच्यते हि । सत्यधर्मान् परामृश्य मुच्येत ।

पश्यध्वं ह्यायतौ वृत्तौ भुजौ मे परिघाविव।
नैतयोरन्तरं प्राप्य मुच्येतापि शतक्रतुः ।। १४ ।।(०१)

धर्मपाशसितस्त्वेवं नाधिगच्छामि सङ्कटम्।
गौरवेण विरुद्धश्च निग्रहादर्जुनस्य च ।। १५ ।।(०२)

धर्मराजनिसृष्टस्तु सिंहः क्षुद्रमृगानिव ।
धार्तराष्ट्रानिमान्पापान्निष्पिषेयं तलासिभिः ।। १६ ।।(०३)

एवमुक्त्वा महाबाहुं विस्फुरन्तं मुहुर्मुहुः । (०४)

लक्षालङ्कारः- एवमुक्त्वा इत्यत्र विष्फुरन्तं ओष्ठविस्फुरणं कुर्वन्तम् ।

वैशम्पायनः

तमुवाच तदा भीष्मो द्रोणो विदुर एव च ।
क्षम्यतामिदमित्येवं सर्वं सम्भाव्यते त्वयि ।। १७ ।।(०५)

---

(०१) (१) पश्य त्वम्; ह्यायतौ; आयता; ह्यायतो वृत्तो; वीक्ष्यध्वं (क्षन्तु; ०क्षध्वं) विपुलौ वृत्तौ; पश्यध्वं (०श्यन्तु) हि समौ दीर्घौ; (२) परिघोपमौ; (३) सेवयोरन्तरं; अन्तरे; (४) मुच्यस्यपि; मुच्यतापि; न मुच्येता; पुरन्दरः; शतक्रतुं;.

(०२) (१) धर्मपाशस्थितस्; पाश-शितम्; ०पासिशितश्; ०पाशै सितास्; ०पाश- सितास्; ०पाशावृतस्; ०पाशासितस्; ०पाश-वृतस्; सितः (बद्धः); त्वेव; चैव; त्वे(त्वै)ष (for त्वेवं); (२) योधिगच्छामि; नाधिगच्छामः नाभिगच्छामि (०नि); अभिगच्छाम; अधि (पथि) गच्छामि; (३) गौरवेना; निरुद्धस्य; द्धाश्च; ०द्धोस्य (०स्मि); कौरवेणातिरुद्धाच्च;.

(०३) (१) ०नियुक्तस्; विसृष्टस्; तं (for तु); (३) पापान्, सर्वान्; (३) निष्पिपेषं; निक्षिप्येयं; निष्कृष्येयं; निष्पिष्येयं; निष्पिष्यामि; निष्पिपेषे; तलादिभिः; तलासिना (नां); निष्पिष्याम्यत्र वासिभिः;.

(०४)( वैशं; बाहुर्;).

(०५)वैशं उ; (१) ततो (for तदा); कर्ण (for भीष्मो); (२) द्रौणिर्; (३) क्षाम्यताम्; चैवम्; इदम् (एवम्); इत्येव; शा(श)म्यतां शाम्यतामेवं(व); (४) सम्भाव्यते; त्वया;.

क्षाम्यातां क्षाम्यतामेवं सर्वं सम्भवतित्वयि ।। १८ ।।

कर्णः

त्रयः किलेमे ह्यधना भवन्ति
दासः शिष्यश्चास्वतन्त्रा च नारी।
दासस्य पत्नी त्वधनस्य भद्रे
हीनेश्वरा दासधनं च दासी ।। १९ ।।

लक्षालङ्कारः-त्रयः किलेम इत्यत्र न विद्यते धनं येषां ते अधनाः । गृहस्थितसर्वधनेषु स्वातन्त्र्यरहिता इत्यर्थः । त्वं दासपत्नी दासस्य धर्मराजस्य पत्नी । अस्य धर्मराजस्य धनं च एतद्गृहस्थितधनानां मध्ये त्वमप्येकं धनम् । अस्यैव जीवद्धनमित्यर्थः । अत एव हीनेश्वरा त्वं दुर्योधनस्य दासी दासधनं च अभूः । सेवाकर्मण्यौचित्याद्दासीत्वम् । साक्षादेव उपभोगानर्हत्वाद्धनत्वं दासद्वारैवेति सूचनाय दासधनमित्युक्तम् ।

त्रयः किलेमे सधनास्सभायां भीष्मः क्षत्ता कौरवाणां गुरुश्च ।
य स्वामिनं दुष्टतमं वदन्ति वाञ्छन्ति वृद्धिं न च विक्षिपन्ति।(०१)

प्रविश्य चान्तः परिवारै भजस्व
तत्ते कार्यं शिष्टमादिश्यतेऽच ।
ईशास्तु सर्वे तव राजपुत्रि

---

(०१) (किलेमे; ह्यधनाः ह्यधमाः (for सधमाः) ब्रुवन्ति (for वदन्ति); वृद्धा; वृद्धं (for वृद्धिं); चित्रयन्ति; वित्रपन्ति (for विक्षोपन्ति); (१) भूयः; पार्थाः (for त्रयः); ह्यधना; अधुना (for अधना); (२) दासं; दास्याः (for दासः); शिष्याश्व; पुत्रश्च; पुत्रं च (for शिष्यश्च); दासश्च शिष्यश्च स्वतन्त्रनारी; (३) त्वं स्य सा दास (for दासस्य); पत्नीयं (for पत्नि त्वं); दासस्य पत्ना त्वधनस्य भद्रे; दासस्य नारि धनस्य भद्रे; दासपत्नि त्वं; मुण्डनमर्हस्यभद्रे; त्वं; दासपत्नी; धनम्; धनम्; अस्य; (४) दिनेश्वरा; ह्यनीं (for हीनें); दासी; सर्व (सर्वे); नारी; दासी; दासी;.

भवन्ति वै धार्तराष्ट्रा न पार्थाः ।। २० ।।(०१)

लक्षालङ्कारः-प्रविश्य चान्तः परिचारै इत्यत्र अन्तर्वेश्मेति सम्बन्धः । परिचारैः सहेति योग्यपदाध्याहारः ।

अन्यं वृणीष्व पतिमाशु भाविनि
यस्माद्दास्यं न लभसि देवनेन।
अनवद्या वै पतिषु कामवृत्ति
र्नित्यं दास्ये विहिता तत्तवास्तु ।। २१ ।।(०२)

लक्षालङ्कारः-नत्यं दास्य इत्यत्र विहिता वृत्तिः ।

पराजितो नकुलो भीमसेनो
युधिष्ठिरः सहदेवोऽर्जुनौ च ।
दासीभूता त्वं हि वै याज्ञसेनि
पराजितास्ते पतयो नैव सन्ति ।। २२ ।।(०३)

लक्षालङ्कारः-दासीभूता इत्यत्र भवतीति योग्यपदाध्या

(०१) (१) ता प्रविध्य (for प्रविश्य); मा नः चैनं; मानं; राज्ञः; तान्तः; चान्तः; सर्वान्नः; सान्तः (for सा नः); प्रविश्यान्तः (for श्य सा नः); परिवारैर्; वारे; वारं; चारं; चारान्; वा* (पुरचैरैर्; वारा(for चारैर्); (२) काश्यं; कार्य; इष्टम्; दिष्टम् (for शिष्टम्); आवेद्य मन्ये; आतिष्ठ वेश्म; आविश्य वेश्म; आविः (दि)श्यते स्मः आदिश्यतेत्र; आदिश्य वेश्म; (३) स्मः तु; च (for स्म); भज (for तव); राजपुत्रा; राजपुत्री; (४) प्रभवन्ति; भस्तु(for भवन्ति); ते; वै; (ए)ते; नो (for ते);.
(०२) (१) भजस्व; वृणुष्व (for वृणीष्व); भविनि (नी); भामिनी (for भामिनि); (२)यस्य (for यस्माद्); न; लभसि (सी); देवि येन; सदेवने (for देवनेन); (३) अगर्ह्या; अनिवद्यो; अवाच्या (बाध्या); अवध्या; अवद्या० असाद्याद्; अनवद्यं; वद्य (for वद्या); ते; त्वं (for वै)ल भहुषु; पतिषु; का (मा) मवृत्ति; वृत्तिं; वृत्तं; वृत्तिर्; (४) तु दास्ये; दास्यै; सहितं; विसिता (for विदितं); तत्तवास्तु; तत्ववास्तु; तत्तवायु; तत्र वास्तु; ते तवास्तु; नित्यातुरं सेवितं वै तवास्व;.
(०३) (१/२) भीमसेनः युधिष्ठिरः सहदेवार्जुनौ च; वार्जुनश्च; पराजिता() पाण्डवा याज्ञसेनि सर्वे नष्टाः पतयो नैव सन्ति; (३ दासीकृता त्वं हि नो (वै); प्रविशय; प्रविवेश; प्रविश्य; व्रज(for प्रविश); प्रविशतु; याज्ञसेनी; (४)वसन्ति; न सन्ते; नैव सन्ति(for न सन्ति);.

प्रयोजनं जन्मनि किं न मन्यते
पराक्रमं पौरुषं वेह पार्थः।
पाश्चाल्यस्य द्रुपदस्यात्मजाम् त्वां
सभामध्ये यो व्यदेवीद्ग्लहेषु ।। २३ ।।(०१)

वैशम्पायनः

तच्च श्रुत्वा भीमसेनोऽत्यमर्षी
भृशं निशश्वास तदाऽऽर्तरूपः।
राजानुगो धर्मपाशानुबद्धो
दहन्निवैनं क्रोधसंरक्तचक्षुः ।। २४ ।।(०२)

भीमः

नाहं कुप्ये सूतपुत्राय राज-
न्नेदं सत्यं दासधर्मः प्रदिष्टः।
किं विद्विषो  वाक्यमाहासयेयुर्
नादेवीस्त्वं यद्यनया नरेन्द्र ।। २५ ।।(०३)

---

(०१) (१) जन्मनि; जन्मन; त्वान्मनि; जननि (for चात्मनि); चात्मनि; कं; को (for किं); च; तु; न (for नु); मन्यसे; मन्यन्ते; प्रयोजनज्ञं मनु किं नु मन्यते; (२) चैव; वेह; सेह; वेद (for चेह); पार्थे; पार्थात्; पार्श्र्वात्; पार्थान्; पार्थाः; (३) पाश्चालस्य; द्रुपदात्मजाम्; द्रुपदस्यात्मजा; त्वां; त्वं (for इमां ); (४)यददीविद्; यातिदें; योतिदेवीर्; यो व्यदें; यो ह्यदें (यामदें); दीव्यमाना; योतिदिव्य- (for योऽतिदें); गृहेषु;.

(०२) (१) तद्धि; तच्च; तत् (for तद्वै); वै श्रुत्वा; भीमसेनस्त्वमर्षी; स्त्वमानी; नोत्यमार्षी; (२)विनिश्वास (for निशं); तदात्तं; रूपं (for रूपः); (३) राजानुजो (जौ) (for गो ); वबद्धो; नुबुद्धो; नुबन्धो; नुबद्धौ; नुविद्धो (for तुबद्धो); (४)एनं; ऐक्षत् (for एनं); क्रोधं (for कोपं); चक्षुः (चक्षुषा) (for दृष्टिः) क्रोध(कोप )संरक्तदृष्टिः (चक्षुः; नेत्रः) कोपविविक्तदृष्टैः कोपविषक्त चक्षुः (दृष्टिः); विरक्तदृष्टिः;.

(०३) भीमसेन (for भीम); (१) सूतपुत्राय (for पुत्रस्य); (२) अयं; न ततु; एतत्; नैतत्; इदं; एष; दासभावं (व-); धर्मं; धर्म-; राजधर्मं;प्रदिष्टः प्रविष्टाः (for प्रविष्टः); (३)कथं (for किं); विद्वेषोः मे द्विषो; च द्विषो; मु (उ)द्विषोः वा द्विषो (for विद्विषो); मा (for मां); वाद्येमां; (ऽ)स्यायुनिः (रि)दं; वै

वैशम्पायनः

राधेयस्यवचः श्रुत्वा राजा दुर्योधनस्तदा ।
युधिष्ठिरमुवाचेदं तूष्णीम्भूतमचेतनम् ।। २६ ।।(०१)

दुर्योधनः

भीमार्जुनौ यमौ चैव स्थितौ नृपनि शासने।
प्रश्नं ब्रूहि च कृष्णां त्वमजितां यदि मन्यसे ।। २७ ।।(०२)

वैशम्पायनः

एवमुक्त्वा तु कौन्तेयमपोह्य वसनं स्वकम्।
स्मयनैक्षात पाञ्चालीमैश्वर्यमदमोहितः ।। २८ ।।(०३)

कदलीदण्ड सदृशं सर्वलक्षणपुजितम्।
गजहस्तप्रतीकाशं वज्रप्रतिमगौरवम् ।। २९ ।।(०४)

अभ्युत्स्मयित्वा राधेयं भीममाधर्षयन्निव।
द्रौपद्याः प्रेक्षमाणायाः सव्यमूरुमदर्शयत् ।। ३० ।।(०५)

वृकोदरस्तमालोक्य नेत्रेत्पाद्य लोहिते।

---

मामेवं; मामिह; मां; मामिदं (for वाद्य मां); मन्युमावारयेयुर्; वाक्य (ह्यन्न)माहार (माराध; मधारः माधार); येयुद् (यं); (for वाद्य मां धारयेयुर्); (४)नादीवीस्त्वं; नादेवीस्तं; न देवस्त्वं; अनयान् (for या); नरेन्द्रः;.

(०१) (१) भीमसेनवचः श्रुत्वा; (४)तूष्णीभूतम्; कृष्णीं; अचेतनं; इव स्थितं (for अचेतसम्);.

(०२) दुर्योधनः (१) नृपौ (for यमौ); चेति; चापि (for चैव); भीमसेनार्जुनौ यमौ (२)जितौ (for स्थितौ); नृपति; नृप सु; तु नृप (for ते नृप); शासनात्(for शासने); (३) ब्रूहि च; विब्रूहि; च ब्रूहि (for प्रब्रूहि); कृष्णार्थम्; कृष्णाम्र्; कृष्णाथ; कृष्णांर्थे; कृष्णां च;.

(०३) (१) उक्त तु (for स); (२)व्यसनं (for वसनं); (३)स्वयं; हसन्;यस्मिन् (for स्मयन्); अवैक्षत्; निरीक्ष्य; इवैक्ष्यन्; इवैक्ष्य; इवेक्ष्य; ऐक्षत; अवेक्ष्य; नैक्षत; इवैष; अवैक्ष (for इवैक्षत्);.

(०४) (१) गर्भं; स्तम्भं; काण्डं (for दण्डं); कदलीदण्डसङ्काशं; (२) लक्षितं; भृषुतं; संयुतं (for पूजितम्);.

(०५) (१) अभ्युत्सयित्वा; अभ्युस्मं; अभ्युष्णं; अदर्शयत्स; अत्युन्नयित्वा; अत्युत्स्मं; उत्साहयित्वा राजानं; (२) आकर्षयन्; आमर्षयन् (for आधर्षयन्); (३) प्रेक्ष्यं (for प्रेक्षं); द्रौपद्यां प्रेक्षमाणायां; (४) आताडयत् (for अदर्शयत्);.

प्रोवाच राजमध्ये तं सभां विश्रावयन्निव ।। ३१ ।।[०१]

भीमः

पितृभिः सह सालोक्यं मा स्म गच्छेद्वृकोदरः।
यद्येतमूरुं गदया न भिन्द्यां ते महाहवे ।। ३२ ।।[०२]

**वैशम्पायनः**

क्रुद्धस्य तस्य सर्वेभ्यः स्रोतोभ्यः पावकर्चिषः।
वृक्षस्येव विनिश्चेरुः कोटरेभ्यः प्रदह्यतः ।। ३३ ।।

न प्रयास्यामि ताल्लोकान्पुपयात्तपुण्यतमानपि ।*
यद्यहं मुकुटं चैव मर्दयित्वा पदा च ते ।
न शिरस्ताडयाम्याजौ तदाग्निं प्रविशाम्यहम् ।[०३]

विदुरः

परं भयं पश्यति भीमसेनात्
तद्बुध्यध्वं वै पार्थिवाः प्रातिपेयाः।
दैवेरितो नूनमयं पुरस्तात्

---

(०१) (१) भीमसेनस्; युधिष्ठिरस् (वृकोदरस्); तमां; समां (for तदां); (२) नेत्र; उत्फुल्ल; उत्पल; उत्फुल्य; उत्पाद्य (उत्पाट्य; उल्पाट्च); (३) राजमध्यस्थं; मध्यस्थः तनयं (for मध्ये तं); (४) सभ्यान् (for सभां);.

(०२) (१) तलो (ल्लो) का; मा लोक (for सालोक्यं); (२) सं- (for स्म); गच्छे; कं गच्छेः (for गच्छेद्); मा स्म गच्छेद्य कौरव; (३)(ए) नम्; (ए) हम् (for (ए) तम्); (४)छिन्द्यां; भिद्यां; भिन्द्यात्; भिनद्यां; भिद्या; भिद्यात् (for भिन्द्यां); अहमाहवे (for ते महाहवे);.

(०३) वैशं उं; (१/२)कुलस्य (for क्रुद्धं); श्रोतोभ्यः; सर्वेभ्यः स्रेतो (श्रोत्रे; श्रोतो)भ्यः निश्चेरुः स्रेतोभ्यः; श्रोत्रे(स्रोतो)भ्यो निश्चेरुः कार्चिताः; (३) दक्षस्य (for वृक्षस्य); (ए)व (for (इ)व); प्रदीप्तस्य (for विनिश्चेरुः); वृक्षस्य दीप्यमानस्य; (४)प्रधक्ष्यतः; यथाग्निना; प्रदह्यतं (for प्रदह्यतः);.

परोऽनयो भरतेषूदपादि ।। ३४ ।।[०१]

लक्षालङ्कारः-. परं भयं पश्यति इत्यत्र पश्यति दुर्योधनः ।

अतिद्यूतं कृतमिदं धार्तराष्ट्रा
येऽस्यांस्त्रियां विवदध्वे सभायाम्।
योगक्षेमो नश्यते नैव राजन्
परितात्मनः कुशो मन्त्रयन्नो ।। ३५ ।।[०२]

इमं धर्मं कुरवो जानताशु
ध्वस्ते धर्मे परिषत्सम्प्रदुष्येत्।
इमां चेत्पूर्वं कितवोऽग्लहिष्य
न्नैषाऽभविष्यदपराजितात्मा ।। ३६ ।।[०३]

लक्षालङ्कारः- इदं धर्मम् इत्यत्र अजानतेति लङात्मनेपदे प्रथमपुरुषबहुवचनम् । ज्ञातवन्त

---

(०१) (१) पस्यम; पश्यति; (दुर्योधनः) (for पश्यत); (२) युध्यध्वं राज्ञो; उत्पन्नंराज्ञो; सम्बुध्यध्वं; तदुध्यध्वं (राज्ञो);ततश्च राज्ञो; तदुध्यं; बुध्यस्व राज्ञो; बुध्यस्व वै; बुध्यध्वं वै (for बुध्यध्वं राज्ञो); वरुणस्य पाशात्; पार्थिवाः प्राति-पेयाः; धृतराष्ट्रस्य पुत्राः; णस्यैव पाशात् (for वरुणस्येव पाशात्); (३)वैवस्वतो; दै (दे)वे स्थितो; दै (दे)वेरितं; देवेरितो; दै(दे)वेषि(क्षि)तो (for दैविरितो); देवे(=देवने); इदं (for अयं); विकारः(for पुरस्तात्); (४) महानयो; दुरोदरो; महद्भयं; पराभवो; (for परोऽनयो); भारतेषु;(for भरतेषु); (उ)दयापि; (उ)पपादि (for (उ)दं); उदपादि;.

(०२) (१) अन्यं दूतं; अभिधूतं; गतमिदं; क्रीडितं (for कृतमिदं); धार्तराष्ट्रो; राष्ट्रैद् (ष्ट्रे); (for राष्ट्रा); (२) यस्यां; यस्मात्; यस्य; यद्वै; एषां; येस्याः (for येऽस्यां); स्त्रिया; स्त्रियां (for स्त्रियं); विपणध्वं; विवृणुध्वं विवदध्वे; विवदद्ये; सवायां (for सभायाम्); येषां स्त्रियं विवदध्वे सभायां; (३)योगक्षेमौ; क्षेमं; क्षेमा;क्षेमे (for क्षेमो);योगः क्षेम; नश्यतो; दृश्यतो (for दृश्यते); नो (वा; नः); वै; यो(for वो); वो; नोत्स्यवेते; नैव नाशं (for वो महाभयः); भयं च; समग्रौ; सभायां (याः; यां ये); महाभयं; महाहवे (for भयः);

(४)महाभयो दृश्यते मूढचेताः; पापात्मानः (परीतात्मानः;परितात्मनः; पापान्मन्त्रान्) कुरवो मन्त्रयन्ते;.(पापान्मन्त्रान्कुरवो मन्त्रयन्ति)

(०३) (१) इदं धर्मं; इमं च धर्मं; इदमन्तं; इदं मन्त्रं; इदं कर्मं; मदं धर्मं (for इमं धर्मं); (अ) जानत (अ) पि(for (आ)शु); (२) दुर्दृष्टे वा; (दु) दृष्टेस्मिन्; दुष्टेस्मिन्; ध्वस्ते; (दुष्टे) धर्मे; दुर्दुष्टे हि; (दु)

इत्यर्थः । दुर्दृष्टे दुःखेन दृष्टे अन्यबलात्कारेणापि दृष्ट इत्यर्थः । इमां च पूर्वम् इत्यत्र इमां द्यूतलीलां कितवः दुर्योधनः यस्मादग्रहीष्यत् तस्माद्दोषोऽप्यभविष्यत्। अत एव अपराजितात्मा न पराजित आत्मा मनो येन स तथोक्तः, जितमनस्को नेत्यर्थः ।

स्वप्ने यथैद्धि धनंत कजिनं स्यादे

तथैव मन्ये यदि दीव्यत्यनीशः।

गान्धारपुत्रस्य वचो निशम्य

धर्मादस्मात्कुरवो मापयात ।। ३७ ।।(०१)

लक्षालङ्कारः-गान्धारपुत्रस्य इत्यत्र हे कुरव इति सम्बोधनम् ।

दुर्योधनः

भीमस्य वाक्ये तद्वदेवार्जुनस्य

स्थितोऽहं वै यमयोश्चैवमेव।

युधिष्ठिरश्चेद्विवदत्यनीशम्

अथो दास्यान्मोक्ष्यसे याज्ञसेनी ।। ३८ ।।(०२)

लक्षालङ्कारः-युधिष्ठिरश्चेत् इत्यत्र विवदति विशेषेण वदति ।

---

दुष्टे हिः (दु) दुर्ष्टेस्मिन्; दुष्टेन्नितं; ददट्टष्टे हि; दुर्दृष्टैर्हि; दुदुष्टैर्हि (for दुर्दृष्टेऽस्मिन्); दुर्दृष्टे परुषं(for परिषत्); सम्प्रदुष्ये; सम्प्रदृस्येत्; प्रदुष्येत्; दूष्येत्; (३) इमं (for इमां); च; न (for चेत्); पूर्व कुरवो (for कितवो); नाग्रहीष्यन्; गृह्णीशन् (ऽ)ग्रहिष्यद् (ऽ)ग्रहिष्यन्; (ऽ) ग्लहिष्यद्; (ऽ)ग्रहीष्य; (ऽ)ग्रहीष्यद्; (ऽ) प्यग्लहिष्यत्; (ऽ)ग्लहिष्यद्; गृहीष्यन्; (ऽ)ग्लहीष्य; (४) ग्लहीष्यति; दोषोः न चेद्; चेद्; नैव; एषा; ईषोः नो; जेता; नैषा (for ईशो); भविष्यति; (for भविष्यन्); (for ऽभविष्यद्);.

(०१) (१) स्वप्नो (for स्वप्ने); यद्येतद्; यथैतं; यथा तद् (for यथैतद्); विजितं धनं विधनं जितं; नि (स) धनं जितं; हि तं धनं (for हि धनं जिते); (२)एवं; तदेव; तथैव (for तदेवं); यश्च; यस्तु; (अ)स्य; यत्तु; यदि(for यस्य); (अ)णीशः; (अ)निशाः; शौः; दीवस्थनीशः; दीव्यह्यनीशः; दीब्यन्धनेशः (for दी० यत्यनीशः); (३) गान्धारपुत्रस्य; गान्धारराजस्य; गान्धारीपुत्रस्थ; वधो (for वचो);

(४)कितवो; गुरवो; कुरवो; मापयात्; मापयान्तं; मोपायात्; मापयन्ते; मापगच्छन्; चापयात; मानयध्वं; मापयातः मा पपात; ग्रहीष्ये; मावगाहत; मापगात; मावदातं; मापयात;.

(०२) (१) भीष्मस्य (for भीमं); वाक्यं; वाक्योः; वा*(for वाक्ये); च तथा; तद्वधे वा; तव देव (for

अर्जुनः

ईशो राजा पूर्वमासीद् ग्लहे नः
कुन्तीपुत्रो धर्मराजो महात्मा ।
ईशस्त्वयं कस्य पराजितात्मा
तज्जानीध्वं कुरवः सर्व एव ।। ३९ ।।(०१)

कर्णः

दुश्शसन निबोधेदं वचनं मे प्रभाषितम् ।
किमनेन चिरं वीर नयस्व द्रुपदात्मजाम् ।
दासीमावेन भुङ्क्ष्व त्वं यथेष्टं कुरु मानद ।। ४० ।।

वैशम्पायनः

ततो गान्धारराजस्य पुत्रः शकुनिरब्रवीत् ।
साधु कर्ण महाबाहो यथेष्टं क्रियतामिति ।। ४१ ।।

ततो दुश्शासनस्तूर्णं द्रुपदस्य सुतां बलात् ।
प्रवेशयितुमारब्धः स चकर्ष दुरात्मवान् ।। ४२ ।।

ततो विक्रोशती वेगात् पाञ्चाली देववर्णिनी ।। ४३ ।।

द्रौपदी

---

तद्वदेव); अर्जुनस्य; (२) यथा स्थितोहं; स्थितोस्वयहं (for स्थितोऽहं वै); ते; ते वै (for वै); चैवमेतत्; चैव तद्वत्;चैव वाक्ये; चैवमेवं;

(३) युधिष्ठिरशू् चेत्प्रवदेद्; नैव वदन्तिः चेत्प्रवदत्ति; ते प्रवदन्तु (ति); चेद्धिवदं (द) तु; चेद्धिव(वि); दन्ति; चेद्वदन्तु; चेत्प्रवदन्तु; चेत्तु वदं (द) ति; चेद्धि वदति; चेद्धिवदति (for चेत्प्रवदन्ति); (अ)नीशो (for शम्);

(४)अस्माद्; तदा; यदा; यथा (for अथो); दाक्षान्; दास्याम्; दासान् (for दास्यान्); मोक्षसे; मोक्ष्यते; याज्ञसेनी;.

(०१) (१) गृहे नः; गृहेषु; ग्लहेषु (for ग्लहे नः); (२) सुतो (for पुत्रो); (३)त्वेवं; त्वं स्वयं (for त्वयं); यस्यः; केन (for कस्य); (४)वि तद्वै; तं; (for तज्) ;एत(for एव);.

परित्रायस्व मां भीष्म द्रोण द्रौणे तथा कृप ।
परित्रायस्व विदुर धर्मिष्ठो धर्मवत्सल ।। ४४ ।।

धृतराष्ट्र महाराज परित्रायस्व वै स्नुषाम् ।
गान्धारि त्वं महाभागे सर्वज्ञे धर्मदर्शिनि१ ।
परित्रायस्व मां देवि सुयोधनपराजिताम् ।। ४५ ।।

त्वमार्ये वीरजननि किं मां पश्यसि चापदि ।
क्लिश्यमानामनार्यैर्मां कि न त्रायसि स्वां वधूम् ।। ४६ ।।

इति लालप्यमानां मां न कश्चित् किञ्चिदब्रवीत् ।
हा हताऽस्मि सुमन्दात्मा सुयोधनवशं गता ।। ४७ ।।

न वा पाण्डुर्नरपतिर्न धर्मो न च देवराट् ।
न वायुर्नाश्विनौ वाऽपि परित्रायन्ति वै स्नुषाम् ।। ४८ ।।

धिक् कष्टं यदहं जीवे मन्दभाग्या पतिव्रता ।। ४९ ।।

विदुरः

शृणोमि वाक्यं तव राजपुत्रि
नवै पार्थाः किञ्चिदपि ब्रुवन्ति ।
सा त्वं प्रियार्थं कुरु वाक्यमेतद्
यदुच्यते पापमतिः कृतघ्नः ।। ५० ।।

सुयोधनः सानुचरः सुदुष्टः
सहैव राज्ञा धिक्कृतः सूनुना च ।
तदेव वाक्यं महदुच्यमानं

न श्रोष्यते पापमतिः कृतघ्नः ।। ५१ ।।

लक्षालङ्कारः-यदुच्यते पापमतिः कृतघ्न इत्यत्र धिक्कृतः सद्भिर्धिक्कृतः सूनुर्यस्य तेन राज्ञा धृतराष्ट्रेण सहैव पापमतिः सुयोधनः त्वया उच्यमानं महत् वाक्यम् आक्रन्दनरूपवचनं यदि न श्रोष्यते, तर्हि तेन यदुच्यते तदेव वाक्यं प्रियार्थं दुर्योधनप्रियार्थं कुर्विति योजना।

वैशम्पायनः

इत्येवमुक्त्वा द्रुपदस्य पुत्रीं
क्षत्ताऽब्रवीद् धृतराष्ट्रस्य पुत्रम्।
मा क्लिश्यतां वै द्रुपदस्य पुत्री
मा त्वं चारीन् द्रक्ष्यसि राजपुत्र ।।

लक्षालङ्कारः-मा क्लिश्यताम् इत्यत्र तथा सतीति योग्यपदाध्याहारः ।

वैशम्पायनः-

तमेवमुक्त्वा प्रथमं धृतराष्ट्रमुवाच ह ।। ५२ ।।

यद्येवं त्वं महाराज सङ्क्लेशयसि द्रौपदीम् ।
अचिरेणैव कालेन पुत्रस्ते सह मन्त्रिभिः ।। ५३ ।।

गमिष्यति क्षयं पापः पाण्डवाप्रियकारकः ।

भीमार्जुनाभ्यां क्रुद्धाभ्यां माद्रीपुत्रद्वयेन च ।। ५४ ।।

तस्मान्निवारय सुतं मा विनाशं विचिन्तय ।। ५५ ।।

वैशम्पायनः

एतच्छ्रुत्वा मन्दबुद्धिर्नोत्तरं किञ्चिदब्रवीत् ।
ततो दुर्योधनस्तत्र दैवमोहबलात्कृतः ।
अचिन्त्य क्षत्तुर्वचनं हर्षेणायतलोचनः ।। ५६ ।।

ऊरू दर्शयते पापो द्रौपद्या वै मुहुर्मुहुः ।। ५७ ।।

ऊरौ सन्दर्श्यमाने तु निरीक्ष्य तु सुयोधनम् ।
वृकोदरस्तदालोक्य नेत्रे उत्पाद्य लोहिते ।। ५८ ।।

एतत्समीक्ष्यात्मनि चावमानं नियम्य मन्युं बलवान् स मानी ।
रामानुजस्संसदि कौरवाणां विनिष्क्रमन् वाक्यमुवाच भीमः ।। ५९ ।।

भीमः

अहं दुर्योधनं हन्ता कर्णं हन्ता धनञ्जयः ।
शकुनिं त्वक्षकितवं सहदेवो हनिष्यति ।। ६० ।।

इदं च भूयो वक्ष्यामि सभामध्ये बृहद्वचः ।
सत्यं देवाः करिष्यन्ति यदा युद्धं भविष्यति ।। ६१ ।।

सुयोधनमिमं पापं हन्तास्मि गदया युधि ।
शिरः पादेन चास्याहमधितिष्ठामि भूतले ।। ६२ ।।

अर्जुनः

भीमसेन न ते सन्ति यैषां वैरं त्वया सह ।
मन्दा गृहेषु सुखिनो न बुद्ध्यन्ते महद्भयम् ।। ६४।।

नच वाचा व्यवसितं भीम विज्ञायते सताम् ।
यदि स्थास्यन्ति सङ्ग्रामे क्षत्रधर्मेण वै सह ।। ६५ ।।

दुर्योधनस्य कर्णस्य शकुनेश्च दुरात्मनः ।
दुश्शासनचतुर्थानां भूमिः पास्यति शोणितम् ।। ६६।।

असूनृतानां शत्रूणां प्रहृष्टानां दुरात्मनाम् ।
भीमसेन नियोगात् ते हन्ताहं कर्णमाहवे ।। ६७ ।।

कर्णं कर्णानुगांश्चैव रणे हन्तास्मि पत्रिभिः ।
येचान्ये प्रतियोत्स्यन्ति बुद्धिमोहेन मां नृपाः ।। ६८ ।।

तान् स्म सर्वान् शितैर्बाणैर्नेतास्मि यमसादनम् ।
चलेद्धि हिमवान् स्थानान्निष्प्रभः स्यात् दिवाकरः ।। ६९ ।।

वैशम्पायनः

इत्युक्तवति पार्थे तु श्रीमान् माद्रवतीसुतः ।
प्रगृह्य विपुलं चापं सहदेवः प्रतापवान् ।। ७० ।।

सौबलस्य वधप्रेप्सुरिदं वचनमब्रवीत् ।
क्रोधसंरक्तनयनो निश्वसन्निव पन्नगः ।। ७१।।

सहदेवः

अक्षान् यान् मन्यसे मूढ गान्धाराणां यशोहर ।
नैतेक्षा निशिता बाणा ये तव्या समरे धृताः ।। ७२ ।।
यथा चैवोक्तवानार्यस्त्वामुद्दिश्य सबान्धवम् ।
कर्ताहं कर्मणस्तस्य कुरु कार्याणि सर्वशः ।। ७३ ।।
यदि स्थास्यसि सङ्ग्रामे क्षत्रधर्मेण सौबल ।। ७४ ।।

वैशम्पायनः

सहदेववचः श्रुत्वा नकुलोपि विशाम्पते ।
दर्शनीयतनो नृणामिदं वचनमब्रवीत् ।। ७५ ।।

नकुलः

सुतेयं यज्ञसेनस्य द्यूतेस्मिन् धृतराष्ट्रजैः ।
यैर्वाचश्श्राविता रूक्षास्थितैर्दुर्योधनप्रियैः ।। ७६ ।।

धार्तराष्ट्रान् सुदुर्वृत्तान् मुमूर्षून् कालचोदितान् ।
दर्शयिष्यामि भूयिष्टमहं वैवस्वतक्षयम् ।। ७७ ।।

उलूकं च दुरात्मानं सौबलस्य प्रियं सुतम् ।

हन्ताहमस्मि समरे मम शत्रुं नराधमम् ॥ ७८ ॥

निदेशाद् धर्मराजस्य द्रौपद्याः पदवीं चरन् ।

निर्धार्तराष्ट्रां पृथिवीं कर्तास्मि न चिरादिव ॥ ७९ ॥

द्रौपदी

यस्माच्चोरुं दर्शयसे यस्माच्चोरुं निरीक्षसि ।
तस्मात् तद् वाप्यधर्मिष्ठ ऊरौ मृत्युर्भविष्यति ॥ ८० ॥

लक्षालङ्कारः-तस्मात्तद्वाऽप्यधर्मिष्ठ इत्यत्र 'वा विकल्पोपमानयोः' इत्यभिधानात्, तद्वा तत् ऊरुदर्शनमिव मृत्युर्भविष्यति । मृत्योर्दर्शनमपि तव भविष्यतीत्यर्थः।

यस्माच्चैवं क्लेशयति भ्राता ते मां दुरात्मवान् ।
तस्माद् रुधिरमेवास्य पास्यते वै वृकोदरः ॥ ८१ ॥

इमं च पापिष्ठमतिं कर्णं ससुतबान्धवम् ।
सामात्यं सपरीवारं हनिष्यति धनञ्जयः ॥ ८२ ॥

क्षुद्रकर्मन् नैकृतिकं शकुनिं पापचेतसम् ।
सहदेवो रणे क्रुद्धो हनिष्यति सबान्धवम् ॥ ८३ ॥

लक्षालङ्कारः-क्षुद्रकर्मन् दुर्योधन ।

वैशम्पायनः

इत्येवमाह वचनं द्रोपदी धर्मदर्शिनी ।

ततोऽन्तरिक्षात् सुमहत् पुष्पवर्षमवापतत् ।

मूर्ध्न्यदृश्यत पाश्चाल्याः साधुशब्दश्च सर्वशः ॥ ८४ ॥

तेषां तु वचनं श्रुत्वा नोचुस्तत्र सभासदः ।
अर्जुनस्य भयाद् राजन्नभून्निश्शब्दमत्र वै ॥ ८५ ॥

अस्मिन् पर्वणि ६३ अध्याये ८५ श्लोकाः सन्ति

( द्यूतपर्वणि(१५) पञ्चदशोऽध्यायः )

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि द्यूतपर्वणि चतुष्षष्टितमोऽध्यायः।। ६४ ।।

# ६४. चतुष्षष्टितमोऽध्यायः

## 02- 06- 64

धृतराष्ट्रेण द्रौपद्याः प्रार्थनया पाण्डवानामदासत्ववरदानम् ।। १ ।।

द्रौपद्या वचनं श्रुत्वा चुकोपाथ धनञ्जयः ।
स तदा क्रोधताम्राक्ष इदं वचनमब्रवीत् ।
कर्णं हन्तास्मि समरे सपुत्रं सहबान्धवम् ।। १ ।।

यस्याश्रयात् स्वयं पापो धार्तराष्ट्रः प्रगर्जति ।
तं समूलं हनिष्यामि सूतजं बलशालिनम् ।। २ ।।

ये चापरे च योत्स्यन्ति धार्तराष्ट्रस्य राजकाः ।
तान् सर्वान् निहनिष्यामि सत्येनायुधमालभे ।। ३ ।।

अद्यैवाहं हनिष्यामि सर्वानेतान् सभासदः ।
अतीव मन्युर्भवति दृष्ट्वेमां द्रुपदात्मजाम् ।। ४ ।।

किन्त्वहं वै करिष्यामि यद् राजा सततं घृणी ।। ५ ।।

अद्यैवाऽहं मुहूर्तेन कृत्स्नं नृपतिमण्डलम् ।
शरैर्नयिष्ये सदनं यमस्यामित्रकर्शनः ।
अयं तु मां वारयते धर्मराजो युधिष्ठिरः ।। ६ ।।

वैशम्पायनः-

इत्युकत्वा क्रोधताम्राक्षो धनुरादाय वीर्यवान् ।
सव्यसाची समुत्पत्य ताञ्छत्रन्  समुदैक्षत ॥ ७ ॥

उद्यन्तं फल्गुनं तत्र ददृशुस्सर्वपार्थिवाः ।
युगान्ते सर्वलोकांस्तु दहन्तमिव पावकम् ॥ ८ ॥

वीक्षमाणं धनुष्पाणिं निश्श्वसन्तं मुहुर्मुहुः ।
हन्तुकामं पशून् क्रुद्रं दक्षक्रतौ यथा ॥ ९ ॥

तथाभूतं नृपा दृष्ट्वा विषेदुस्त्रस्तमानसा ः ।
धनञ्जयस्य वीर्यज्ञा निराशा जीविते तदा ॥ १० ॥

मृतभूता भवन् सर्वे नेत्रैरनिमिषैरिव ॥ ११ ॥

अर्जुनं धर्मपुत्रं च समुदैक्षन्त पार्थिवाः ।
क्रुद्धं तदा..र्जुनं दृष्ट्वा पृथिवी च चचाल ह ॥ १२ ॥

खेचराणि च भूतानि वित्रेसुर्वै भखयार्दिताः ।
नादित्यो विरराजाथ नापि वाति च मारुतः ॥ १३ ॥
न चन्द्रो न च नक्षत्रं द्यौर्दिशो न व्यभाव्यत ।

सर्वमाविद्धमभवज् जगत् स्थावरजङ्गमम् ।
उत्पतन् स बभौ पार्थो दिवाकर इवाम्बरे ॥ १४ ॥

पार्थं दृष्ट्वा न्तरे क्रुद्धं कानान्तकयमोपमम् ।
भीमसेनो मुदा युक्तो युद्धायैव मनो दधे ॥ १५ ॥

पाञ्चाला च ददर्शाथ सुसङ्क्रुद्धं धनञ्जयम् ।
हन्तुकामं रिपून् सर्वान् सुपर्णमिव पन्नगान् ॥ १६ ॥

दुष्प्रेक्षस्सो..भवत् क्रुद्धो युगान्ताग्निरिव ज्वलन् ।
तं दूष्ट्वा तेजसाविष्टं विव्यधुः पुरवासिनः ॥ १७ ॥

उत्पतन्तं तु वेगेन ततो दृष्ट्वा धनञ्जयम् ।
जग्राह स ततो राजा पुरुहूतो यथा हरिम् ।। १८ ।।

उवाच स घृणी ज्येष्ठो धर्मराजो युधिष्ठिरः ।। १९ ।।

युधिष्ठिरः-

मा पार्थ साहसं कार्षीर् मा विनाशं गमेर्यशः ।
अहमेतं पापमतिं सूतं दग्धुं समुत्सहे ।। २० ।।

युधिष्ठिरः

मा पार्थ साहसं कार्षीर्विनाशं गमयेद् यशः ।
पापं त्विमं पापमतिं स भवान् हन्तुमुत्सहेत् ।
त्वमिमं जगतोऽर्थे वै क्रोधं संयच्छ पाण्डव ।। २१ ।।

वैशम्पायनः

एवमुक्तस्तदा राज्ञा पाण्डवोऽथ धनञ्जयः ।
क्रोधं संशमयन् पार्थो धार्तराष्ट्रं प्रति स्थितः ।। २२ ।।

तस्मिन् वीरे प्रशान्ते तु पाण्डवे फल्गुने ततः ।
सर्वं प्रहृष्टमभवज्जगत् स्थावरजङ्गमम् ।। २३ ।।

वारितं च ततो दृष्ट्वा भ्रात्रा पार्थं वृकोदरः ।
बभूव विमना राजन्नभून्निश्शब्दमत्र वै ।। २४ ।।

ततो राज्ञो धृतराष्ट्रस्य गेहे
गोमायुरुच्चैर्व्याहरदग्निहोत्रे ।
तं रासभाः प्रत्यभाषन्त राजन्
समन्ततः पक्षिणश्चैव रौद्राः ।। २५ ।।[०१]

---

(०१)(२)व्याहरच्च; व्याजहार (for व्याहरद्); (३) प्रत्यनन्दन्त; वास्यन्त; वाशन्त; वाश्यन्तः पाद्यन्त;

तं वै शब्दं विदुरस्तत्त्ववेदी
शुश्राव घोरं सुबलात्मजा च ।
भीष्मो द्रोणो गौतमश्चापि विद्वान्
स्वस्ति स्वस्तीत्यपि चैवाहुरुच्चैः ।। २६ ।।(०१)

ततो गान्धारी विदुरश्चापि विद्वांस्
तमुत्पातं घोरमालक्ष्य राज्ञे।
निवेदयामासतुरार्तवत्तदा
ततो राजा वाक्यमिदं बभाषे ।। २७ ।।(०२)

हतोऽसि दुर्योधन मन्दबुद्धे
यस्त्वं सभायां कुरुपुङ्गवानाम्।
स्त्रियं समाभाषसि दुर्विनीत
विशेषतो द्रौपदीं धर्मपत्नीम् ।। २८ ।।(०३)

एवमुक्त्वा धृतराष्ट्रो मनीषी
हितान्वेषी बान्धवानामपायात्।
कृष्णां पाञ्चालीमब्रवीत्सान्त्वपूर्वं

---

वादन्त (for भाषन्त); (४) समागताः(for समन्ततः); पक्षिगणा (ण) श्व; णश्चापि (for णश्चैव);.

(०१) (१) वै(for च)सर्वः विशब्दं (for शब्दं); शब्दवेदी; तत्त्वदर्शी (for तत्त्ववेदी); (२) शब्दं; देवी (for घोरं); विदुरस्यात्मजा; सुबलस्यात्मजा(for सुबलात्मजा);

(३) भीष्मो द्रोणो (for भीष्मद्रोणौ); चैव (for चापि); सर्वे (for विद्वान्); (४)(अ) पि चैवाशशंसुः; (ए) व ते वै शशंसुः; (अ) ब्रुबन्सर्व एव (for (अ) पि चैवाहुरुच्चैः);.

(०२) (१) तथा (for ततो); गान्धारि; चापि (for चैव); (२)समुत्पातं (fortमुं); आलोक्य (for आलक्षय); ताज्ञः (for राज्ञे); (३) न्यवेदं (for निवेदं); ततो (for तदा); (४) इतो राजा; राजा तदा (for ततो राजा);.

(०३) धृतराष्ट्र उं (धृतराष्ट्रः); (१) ततोसि; हतोस्मि (for हतोऽसि); (२)यत्त्वं; यस्त्वा; यां त्वं (for यस्त्वं); (३) समाभाषसे; कर्षति; सभामानयसि; समाभषसि; कर्षसि; कर्षति सि; नेष्यसि (for भाषसि); स्त्रियंसतीं भाषसे दुर्विनीतो; (४) द्रौपदी पत्नी;.

विमृश्यैतत्प्रज्ञया तत्त्वबुद्धिः ।। २९ ।।[०१]

धृतराष्ट्रः

वरं वृणीष्व पाञ्चालि मत्तो यदभिवाञ्छसि।
वधूनां हि विशिष्टा मे त्वं धर्मपरमा सती ।। ३० ।।[०२]

द्रौपदी

ददासि चेद्वरं मह्यं वृणोमि भरतर्षभ।
सर्वधर्मानुगः श्रीमानदासोऽस्तु युधिष्ठिरः ।। ३१ ।।[०३]

*(अधिकपाठः - कपाठे) [०४]

एवमस्तु तवाभीष्टमदासोऽस्तु युधिष्ठिरः ।
पुनरन्यं वरं पुत्रि वृणीष्व त्वं पतिव्रते ।

मनस्विनमजानन्तो मैवं ब्रूयुः कुमारकाः।
एष वै दासपुत्रो हि प्रतिविन्ध्यं ममात्मजम् ।। ३२ ।।[०५]

लक्षालङ्कारः-एष वै दासपुत्रेति इत्यत्र एषः दुर्योधनः ते कुमारकाश्च दासपुत्रेति मा ब्रूयुरिति

---

(०१) वैशं उं (१) एवमुक्तो; एतावदुक्त्वा; एवं तूक्त्वा; स एवमुक्त्वा; इत्येवमुक्त्वा (for एवमुक्त्वा); (२)पाण्डवानाम् (for बान्धवानाम्); उपायात्; आपापां; उपेयात्; अपायात्; (३)अब्रुवीत्; अबुवन्; ह्यब्रवीत् (for अब्रवीत्); सान्त्वयित्वा; शान्त्वपूर्वं; सामं (for सान्त्वं);
(४) विमृष्यैतत्; विष्ठस्यैतत्; विमृश्यैवं; श्य तत्; प्रजया; दुष्टबुद्धिः; मन्दं (for तत्त्वं);.
(०२) (१) कल्याणि (णी); पाञ्चाली; (२)वाञ्छितं; काङ्क्षितं; काङ्क्षसे; वाञ्छसि (for काङ्क्षसि); (३) बन्धूनां; स्नुषाणां (for वधूनां); च; त्वं; तु (for हि); वरिष्ठा (for विशिष्टा); (४) धार्मिकी (का)परमा; श्रेयसी परमा; नित्यं धर्मपरा; त्वमेव परमा; सति;.
(०३) (१) सत्यं (for मह्यं); (२)वृणीमि; (३)सर्वधर्मपरः; धर्मानुज (for धर्मानुगः); (४) न दासो (for अदासो);.
(०४) ५६९** धृतराष्ट्रः ।*.
(०५) (१) मनस्वी समजानन्तो; (२) मा वि मैवं; मा मे; मा ते (for मा वै); (३) एहि (for एष); त्वं (for वै); दासपुत्रस्ते; पुत्रोसि; पुत्रो हि; दासिपुत्रेति; (४) विध्य (प्रति); प्रतिविध्यं; विध्याम्; बुध्य; पूज्यं; विन्ध्यं; स्वमात्मजं; ममात्मजं; उपागतं; समागताः (तं) (for तमागतम्);.

सम्बन्धः ।

राजपुत्रः पुरा भूत्वा यथा नान्यः पुमान्कचित्।
राजभिर्लालितस्यास्य न युक्ता दासपुत्रता ।। ३३ ।।[०१]

धृतराष्ट्रः

एवं भवतु कल्याणि यथा त्वमभिभाषसे।[०२]
द्वितीयं ते वरं भद्रे ददानि वरयस्व ह ।
मनो हि मे वितरति नैकं त्वं वरमर्हसि ।। ३४ ।।[०३]

द्रौपदी

सरथौ सधनुष्कौ च भीमसेनधनञ्जयौ।
यमौ च वरये राजन्नदासान्स्ववशानहम् ।। ३५ ।।[०४]

धृतराष्ट्रः

तृतीयं वरयास्मत्तो नासि द्वाभ्यां सुसत्कृता।
त्वं हि सर्वस्नुषाणां मे श्रेयसी धर्मचारिणी ।। ३६ ।।

तथास्तु ते महाभागे यथा त्वं नन्दिनीच्छसि ।[०५]

---

(०१) (१) राजपुत्र; पराभूत्व (for पुरा भूत्वा); (२) यथान्यायः न्यायं (for यथा नान्यः); भुवि (for कचित्); (३)(अ)राजपुत्रत्वं (श्च; स्त्वं) (for दासपुत्रत्वं); राजभिर्ला(र्ल); लित-स्यास्य; (४) पश्य; पश्येन् (for पश्यन्); पश्येद्धि; नश्यति; (for नश्येद्धि ); न युक्ता दासपुत्रता; न स (नाधि-; न च) गच्छेद्धि (गच्छेति; गच्छति) भारत;.

(०२)(भद्रं ते (for कल्याणि);.

(०३) (१) तु (for ते); द्वितीयं तव भद्रं ते; (२)ददानि; सि (for मि); ह; तं (for माम्); ददानि वरय स्वयं; (३)वरो (for मनो); (४)नैकस्त्वं, नैकत्वं; अर्हति;.

(०४) (१) रथस्थौ; संरब्धौ; सारथौ (for सरथौ);स्वधनुष्कौ; सानुषङ्गौ; सदनिष्कौ; (३/४) नकुलः सहदेवश्च; द्वितीयो वरदे वरं; यमौ च वरये राजन्नदासान्स्व राजंस्त्वद्दासान्स)वशानहं; स्ववशान्;.

(०५) (१) वरदास्मत्तो;वरदान्मत्तो; (२) नासन्नस्यां; नास्ति द्वाभ्यां; नासि वाक्यं; नापि नासी) द्वाभ्यां; सुसंस्कृता; सुसञ्ज्ञता; सुसंस्कृतं (for सुसत्कृता); (३) तु (for हि); (४)श्रेयसि;.

क्षमस्वाद्याश्रुपातेन शून्यं भवति वै गृहम् ।[०१]

द्रौपदी

लोभो धर्मस्य नाशाय भगवन्नाहमुत्सहे।
अनर्हा वरमादातुं तृतीयं राजसत्तम ।। ३७ ।।[०२]

एकमाहुर्वैश्यवरं द्वौ तु क्षत्रस्त्रिया वरौ।
त्रयस्तु राज्ञो राजेन्द्र ब्राह्मणस्य शतं वराः ।। ३८ ।।[०३]

पापीयांस इमे भूत्वा सन्तीर्णाः पतयो मम।
वेत्स्यन्ति चैव भद्राणि राजन्पुण्येन कर्मणा ।।३९ ।।[०४]

लक्षालङ्कारः-पापीयांस इमे भूत्वा इत्यत्र पापो दुर्योधनः तस्य इमे पापिनः अतिशयेन पापिनः पापीयांसः, सम्यग्दुर्योधनदासतां प्राप्ता इत्यर्थः ।

अस्मिन् पर्वणि ६४अध्याये ३९श्लोकाः सन्ति

द्यूतपर्वणि(१६) षोडशोऽध्यायः

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि द्यूतपर्वणि चतुष्षष्टितमोऽध्यायः।। ६४।।

# ६५. पञ्चषष्टितमोऽध्यायः

श्रीमन्महाभारततात्पर्यनिर्णये एकविंशाध्याये

---

(०१) ( क्षमास्मादृश्यपातेन; क्षमास्मादाश्रु;)

(०२) (१) डम्भ (for धर्म); नाशस्य; नाशोयं(for नाशाय); लोभाद्धर्मस्य नाशं वै; लोभो; (लोभाद्) धर्मविनाशाय; (२)भगवान् (for वन्); अहम्; नार्हम्(for नाहम्); (३)अनर्हं (हं; र्ह);.

(०३) (१) एकं चाहुर्; (२)स्त्रियो (for स्त्रिया); द्वौ क्षत्रियवरौ स्मृतौ (स्त्रिस्य); द्वौ स्मृतौ क्षत्रियावरौ; द्वौ वरौ क्षत्रियस्य तु (च) द्वौ वरौ (तु वै) क्षत्रिय स्त्रियः (योः; याः; यां); द्वितीयं क्षत्रियस्त्रियाः

(३)त्रयोस्तु; त्रयं तु; राज्ञां (for राज्ञो); त्रयः शूद्रस्य राजेन्द्र; त्रयस्तु शूद्रनरीणां; न च त्रयस्तु राजेन्द्र; वरत्रयं तु राज्ञां तु; (४) ब्राह्मण्याश्च (for णस्य); शतां; वरः; वरं; वरां (for वराः);.

(०४) (२)सन्तीर्णा; सतीर्णा; (३)क- लप्स्यन्ति । वेश्यन्ति; लिप्सन्ते; सेत्स्यन्ति (for वेत्स्यन्ति);.

ततः सुयोधनानुजश्चकर्ष पार्षतात्मजाम् ।
गृहाय तन्निशाम्य तु क्रुधाऽऽह मारुतात्मजः ।।३५२।।
अर्जुनार्जुन नैवात्र क्षमा मे तात रोचते ।
पतितस्यास्य देहस्य काष्ठविष्ठासमस्य च ।
फलानि त्रीणि शिष्यन्ते विद्या कर्म सुता इति ।।३५३।।
इति वेदोदितं वाक्यं न सुतो दारधर्षणे ।
दुष्टदारो न चाऽप्नोति लोकानर्द्धो हि दूषितः ।
अरक्षणाद् दूषिताया न त्यागाच्च शुभं भवेत् ।।३५४।।
अतोऽद्य सानुबन्धकान् निहन्मि धार्तराष्ट्रकान् ।
इति ब्रुवन् व्यलोकयद् रिपून् दहन्निवौजसा ।।३५५।।
ददर्श च महाघोरमादातुं परिघं रुषा ।
कर्तुं व्यवसितो बुद्ध्या निश्शेषान् धृतराष्ट्रजान् ।।३५६।।
तदा शिवा ववाशिरे सुयोधनाग्निगेहतः ।
तथैव तत्पितुर्गृहेऽप्यभूद् भयानकं बहु ।।३५७।।
निमित्तान्यतिघोराणि कुपिते मारुतात्मजे ।
दृष्ट्वाऽम्बिकेयो विदुरं पप्रच्छैषां फलं द्रुतम् ।।३५८।।
आह तं विदुरो ज्येष्ठं क्षणेऽस्मिंस्तव पुत्रकाः ।
सानुबन्धा न शिष्यन्ति वृकोदरबलाहताः ।।३५९।।
क्रीडसेऽर्भकवत् त्वं हि किं जितं किं जितं त्विति ।
अधर्मेण जितानत्र जितान् पश्यसि पाण्डवान् ।।३६०।।
स्त्रीषु द्यूतेषु वा दत्तं मदान्धेन नरेण वा ।
न दत्तमाहुर्विद्वांसस्तस्य बन्धुभिरेव च ।।३६१।।
आहार्यं पुनराहुश्च तथाऽपि न तु पाण्डवैः ।
तत् कृतं तव पुत्राणां ख्यापयद्भिरशिष्टताम् ।।३६२।।

इत्युक्त आहाऽम्बिकेयो निमित्तानां फलं कथम् ।
न भवेदिति स प्राह द्रुतं कृष्णा विमुच्यताम् ॥३६३॥
तोषयस्व वरैश्चैनामन्यथा ते सुतान् मृतान् ।
विद्धि भीमेन निष्पिष्टान् माऽत्र ते संशयो भवेत्॥३६४॥
कृष्णा च पाण्डवाश्चैव तपोवृद्धिमभीप्सवः ।
तपसा नैव धक्ष्यन्ति तेन जीवन्ति ते सुताः ॥३६५॥
तथाऽपि यदि कृष्णां त्वं न मोचयसि ते सुतान् ।
हनिष्यति न सन्देहो बलेनैव वृकोदरः ॥३६६॥
इतीरितो विनिर्भर्त्स्र्य पुत्रं दुःशासनं नृपः ।
अमोचयद् वरैश्चैनां छन्दयामास पार्षतीम् ॥३६७॥
छन्दिता सा वरैस्तेन धर्मे भागवते स्थिता ।
नैवाऽत्मनो वरान् वव्रे वव्रे तेषां विमोक्षणम् ॥३६८॥
युधिष्ठिरस्य सभ्रातुः सराष्ट्रस्य विमोक्षणम् ।
ददौ नृपोऽस्या न पुनश्छन्द्यमानाऽपि साऽवृणोत्॥३६९॥
भर्तुर्विष्णोश्च नान्यस्माद् वरस्वीकार इष्यते ।
एवं हि भगवद्धर्मस्तस्मात् सा नावृणोत् परम् ॥३७०॥
अधर्मतो हृतत्वात्तु तद् दानं न वरो भवेत् ।
इति मत्वा पाण्डवानां वव्रे कृष्णा विमोक्षणम् ॥३७१॥
श्वशुरादैहिकवराः क्षत्रियायास्त्रयो यतः ।
उक्ताः शतं च विप्राया धर्मे भागवते ततः ।
हेतुना तेन वव्रे सा नान्यत् किञ्चिदतः परम् ॥३७२॥
ततो विमुक्ताः प्रययुश्च पार्था गुरून् प्रणम्य स्वपुरं सकृष्णाः ।

## 02- 06- 65

कर्णप्रलपितम् ॥ १ ॥ क्रुद्धं भीमं निवार्य युधिष्ठिरस्य धृतराष्ट्रसमीपगमनम् ॥ २ ॥

पाण्वानामिन्द्रप्रस्थगमनम् ।। ३ ।। शत्रूणां वधार्थमुद्यतस्य भीमस्य युधिष्ठिरकर्तृकं प्रशमनम्

कर्णः

या नः श्रुता मनुष्येषु स्त्रियो रूपेण सम्मताः।
तासामेतादृशं कर्म न कस्याश्चन शुश्रुम ।। १ ।।(०१)

क्रोधाविष्टेषु पार्थेषु धार्तराष्ट्रेषु चाप्यति।
द्रौपदी पाण्डुपुत्राणां कृष्णा शान्तिरिहाभवत् ।। २ ।।(०२)

अप्लवेऽम्भसि मग्नानामप्रतिष्ठे निमज्जताम्।
पाञ्चाली पाण्डुपुत्राणां नौरेषा पारगाभवत् ।। ३ ।।(०३)

वैशम्पायनः

तद्वै श्रुत्वा भीमसेनः कुरुमध्येऽत्यमर्षणः।
स्त्रीगतिः पाण्डुपुत्राणामित्युवाच सुदुर्मनाः ।। ४ ।।(०४)

त्रीणि ज्योतींषि पुरुष इति वै देवलोऽब्रवीत्।(०५)
युद्धेऽपराङ्मुखत्वं च आहूतस्यानिवर्तनम्।

---

(०१) (१) न न मे; या वः; या वा; यास्तु; या न (for या नः); श्रुत्वा (for श्रुता ); मनुष्येन्द्र; (२) रूपेष; संस्कृताः; संमता; (४)क- श्च निशभ्यते । कस्यां न च; कासाञ्चन ० शुश्रुम; न कस्याश्चन; ( स्यां न च) शुश्रुम; न कस्याश्चिद्विशां पते; न कस्या ( न कासां )चिन्निशम्यते; न कासां; (कस्यां ); चित्प्रदृश्यते; न कस्याश्च (कस्याश्चि )न्निशाम्यते; न कश्चास्य निशम्यते;.

(०२) (१) क्रोधवि; सर्वेषु (for पार्थेषु); (२)क- सुतेषु च । धार्तराष्ट्रे ( षु ); वाप्यति; चाप्युत; धृतराष्ट्रसुतेषु ( तेन) च; धार्तराष्ट्रसुतेषु च; (३) पाण्डु- पुत्राणां स्त्री गतिः; (४) इहागमत्; इवाभवत् द्रौपदी शान्तिरिहागमत् ; कृष्णा शान्ति- पराभ०; इत्युवाच सुदुर्मनाः ).

(०३) (१) भग्नानाम्; (२) प्रतिषेति (for अप्रतिष्ठे); अप्रतिष्टेषु म; (३)क- नोरेषा पारगाऽभवत् । द्रौपदी (for पाञ्चाली); (४) नौरेषां; परगा- नौरेषां पारगा (०षा परमा) भवेत्; पारगा नौरिवाभवत्;.

(०४)स्त्री गतिः (२) (अ)मर्षणः (for ऽत्यमर्षणः ); (४) इत्यवोचत दु;.

(०५) भीमसेन उ (उ०); भीम उ; पुरुक्षे (षेम्); षैर्; षा; षम्; (१) सन्ति (for इति);.

दाराणां रक्षणं चैव इति तज्ज्योतिषां त्रयम् ।। ५ ।।[०१]

लक्षालङ्कारः- दाराणां वर्तनम् इत्यत्र दाराणां सकाशात् औपासनाग्नौ अग्निहोत्रादिसद्धर्मप्रवर्तनम् ।

अपत्यं कर्म विद्या च यतः सृष्टाः प्रजास्ततः ।। ६ ।।

अमेध्ये वै गतप्राणे शून्ये ज्ञातिभिरुज्झिते।
देहे त्रितयमेवैतत्पुरुषस्योपयुज्यते ।। ७ ।।[०२]

लक्षालङ्कारः-अमेध्ये वै गतप्राण इत्यत्र दाराख्ये तृतीयज्योतिस्साधने अमेध्ये अपवित्रे गतप्राणे मृते शून्ये सद्धर्मशून्ये जातिभिरुज्झिते जातिरहिते च जाते सति एतत् तृतीयं ज्योतिः पुरुषस्यैव देहे उपजायते । कुण्डरहिते तज्ज्योतिः देहान्तस्समारोप्य ध्यानार्चनादिना तत्रैव सेवां कुर्यात् । न तु बहिरित्यर्थः ।

तन्नो ज्योतिरभिहतं दाराणामभिमर्शनात्।
धनञ्जय कथंस्वित्स्यादपत्यमभिमृष्टजम् ।। ८ ।।[०३]

कथं ज्यायःकथं स्वस्यात्तदपत्यमभीष्टजम् ।
तन्नोज्योतिर्विरहितैर्दारस्याद्याभिमर्शनात्।

---

(०१)((वर्तनं (for रक्षणं ); रक्षणं चैव दाराणां)) (३) वै विद्या; विद्यां च (for विद्या च); (४) तथा (for ततः ); सृष्ट्वाजस्रं प्रजापतिः;.

(०२) (१) अमेध्यं; ०ध्य; वै गतप्राणाः; विगतप्राणे ( ०णः); वि (वै) गतः प्राणे; (२) उज्जिते; उप्सिते; उत्थिते; (३) देह तृतीयं (for त्रितयं ); अप्यैतत् (४) (उ) पथुः; (०य)ज्यते; (४) (अ) पजायते; पुरुषस्येव न जायते;.

(०३) (१) ज्योती; तिरसि (for ज्योतिर् ); उपाहतं; उपादृते; अभिहितं; इयं राजन्; इयं जाता; ( अभिहत); उपहृतं; विरहितं; उपाहन्त;

(२) दारुणाम्; दासस्याद्; इह धर्षणां; इह द(क) शनात्; अभि- दर्शनात्; अतिधर्षणात्; इव धर्षणी; अभिमर्षणात;दारूणामिव धर्षणी ( धर्मणी(णि)); दारूणामिति धर्षणा; दारुणामिव धर्षणात्;(वर्षणि); दारुणा भीमदर्शनात्; इह (सभायां); परूषां गिरं न वरैम्; .

धनञ्जय कथं किं स्यादनपत्याभिमृष्टजम्।[०१]

अर्जुनः

न चैवोक्ता न चानुक्ता हीनतः परुषा गिरः।
भारताः प्रतिजल्पन्ति सदानुत्तमपूरुषाः ।। ९ ।।[०२]

लक्षालङ्कारः-न चैवोक्ता इत्यत्र हीनतः हीनेष्वपि जनेषु न चैवोक्ताः प्राक्केनाप्यनुक्ताः, न चानुक्ताः कैश्चिदुक्ताश्च वाच्यावाच्यरूपा इत्यर्थः । परुषा गिरः निष्ठुरोक्तीः । उत्तमपूरुषा न भवन्तीति अनुत्तमपूरुषाः । भारताः भरतकुलोत्पन्ना दुर्योधनादयः सदा प्रतिजल्पन्तीति योजना ।

स्मरन्ति सुकृतान्येव न वैराणि कृतान्यपि।
सन्तः प्रति विजानन्तो लब्धसम्भावनाः स्वयम् ।। १० ।।[०३]

लक्षालङ्कारः-सन्तः प्रति इत्यत्र प्रतिविजानन्तः प्रतिकर्तुं जानन्तोऽपि सन्तः आत्मनः परमात्मनः प्रत्ययं ज्ञानम् ।

*५७४ (अधिकपाठः - कपाठे)

पुनर्युधिष्ठिरं भीमः क्रुद्धो वचनमब्रवीत् ।
अनुजानीहि मां राजन्निग्रहाय दुरात्मनाम्।*

---

(०१) नु स्याद्; तस्या; न स्याद्; चिन्त्याद्; हि स्याम्; हि स्याद्; कथं स्वित्; धनञ्जयः कथं नास्याम्; ०जयाभिमृष्टाया (०सृष्टाया; ०मृष्टयोर् );

(४) अभिदृष्टवान्; ०सृष्टवान्;इ(अ)तिशिष्टवत्; इति मृ(सृ)ष्टवान्; सृष्टजं; धृष्टजं; अपद्यमभिघृष्टवत् नापत्यमभिपृच्छवान्; स्यादपत्यमहो कथं; न प्रष्टमिति सृष्टबान्; अनपत्याभिमृष्टजं; तदपत्यमभीष्टन्त सृष्टः(? मृष्ट) वान् ( उन्मूलितवान्);.

(०२)धनञ्जयः (for अर्जुन उ); (१) न चैकोत्त्वा; न वै चोक्ता; चानरक्ता (for चानुक्ता); न वै चोक्ता चानरक्ता (for चानुक्ता); न वै चोक्ता न वानुक्ता; (२) ह्रीमन्तः; हीनतः पुरुः (०र) षा हनिसत्पुरुषो गिरः (३) भारता; भारत; ०जल्पन्तु प्रविजल्पन्ति; प्रतिज्वलन्ति; प्रतिजल्पन्ति तं धीराः; भ्रातरः परिज०; (४) पुरुषाः सदा उत्तमं; सदानुत्तम्म; हीनेन उक्त। अनुक्ता वा परुषा गिरः । न प्रतिजल्पक्म नोत्तरयन्ति ।.

(०३) (२) वैराणि; (अ)पि तु (for च); सर्वेराणि कृतन्यपि; वैराणि न कृतान्य(न)पि; (३) ०जानन्ति; हिंसन्ति; (४) आत्मनि; लब्धप्रल्प्य; लब्धसम्भावनाः स्वयं ( कथं ); प्रत्ययम्; लब्धसम्भावना;.

भीमः

इहैवैतांस्त्वहं सर्वान्हन्मि शत्रून्समागतान्।
अथ निष्क्रम्य राजेन्द्र समूलान्हन्मि भारत ।। ११ ।।(०१)

किं नो विवदितेनेह किमुक्तेन च भारत।
अद्यैवैतान्निहन्मीह प्रशाधि पृथिवीमिमाम् ।। १२ ।।(०२)

इत्युक्त्वा भीमसेनस्तु कनिष्ठैर्भ्रातृभिः सह ।
मृगमध्ये यथा सिंहो मुहुपरिघमैक्षत ।। १३ ।।(०३)

लक्षालङ्कारः-परिघं परितो घातयतीति परिघः स्थूलस्तम्भः ।

सान्त्व्यमानो वीक्षमाणः पार्थेनाक्लिष्टकर्मणा।
खिद्यत्येव महाबाहुरन्तर्दाहेन वीर्यवान् ।।१४ ।।(०४)

---

(०१) (१) एतान्व(न्न)रान्; एतात्सूरन्;एतान्द्विषः; तानरीन्; एतास्त्वरन्; एनान्त्ययं;एतां(नां )स्तूरा; तास्तुरान्; तांस्तु वा; तांस्तु वः; एतांस्तु तान्; एतानिहं; तानहं; एनाः (ता)न्वयं; एतान्स्तुता; नित्यपपाठः (for एतास्तुरा); तूरा- त्वरया; इह वै तान्वयं; (न्व -राजन्); हन्तै; नानाशु नः; हतैतानाशु वः; हन्तैतानाशुचः; इहेनैवान्वयः पापे रतक्ष्यवयं; इह वै तादृशान् (for इहैवै-तास्तुरा);

(२) मम; हत्वा हन्म; जन्म-; अस्मत् (for हन्मि );

(३) अद्य (for अथ); निकृत्य; निःक्रम्य; राष्ट्रेभ्य (for राजेन्द्र );

(४) आमूलात्; आ (अ)मूलान्; आमूलं; विद्धि; किं हि; हन्मि; किं न०; किं नु; निह; कृषिः कृद्धिः कृधि ( कृन्धि);(-छिन्धि); भारतः आमूलाग्रापि भारत;.

(०२) (१) विविदितेनेह; विपदिते; पपतिते०; (२) उक्तेन च; नोक्तेन च; नःक्रोशेन (for नः क्लेशेन); चैव हि; चैव ह (for भारत ); किं न;क्लेशो( शे-) न चैव ह; क्लिन्नः केशेन भारत; किं क्लेशचयैव हि

(३) अथ (for अद्य );(ए)व वा; (ए) व तान्; (ए)त्रैनान्; चैना (ता)न् (for(ए)वैतान्); निहन्त्याजौ; निहत्यैव (वं); निह्नम्यैवं; निहत्येह (for निहन्महि); अद्यैव तान्न हन्मीह; अद्य चैनान्हनिष्यामि;

(४) पृथिवीम् (for वसुधाम् );.

(०३) (२) सह; भृशं (for वृतः); (४) मुहुर्मुहुरुदैक्षत;.

(०४) (१) सान्त्व-; शान्त्व्य--माणो (for मानो); वार्यमाणः (०न); वीक्षां(क्ष्य)माणः पार्थे नाकृष्टं; श्विद्यते च; स्विद्यते (त्ये) व; खिद्यते च (ते मे; ०तेद्य); खिद्यत्येव; स्विद्यते हि; ते वै; क्लिश्यते च; विद्यते हि; (४) परं दाहेन; अन्तर्देहेन;.

क्रुद्धस्य तस्य स्रोतोभ्यः कर्णादिभ्यो नराधिप।
सधूमः सस्फुलिङ्गार्चिः पावकः समजायत ॥ १५ ॥(०१)

भ्रुकुटीकृतदुष्प्रेक्ष्यमभवत्तस्य तन्मुखम्।
युगान्तकाले सम्प्राप्ते कृतान्तस्येव रूपिणः ॥ १६ ॥(०२)

युधिष्ठिरस्तमावार्य बाहुना बाहुशालिनम्।
मैवमित्यब्रवीच्चैनं जोषमान्वे(स्स्वे)ति भारत ॥ १७ ॥(०३)

निवार्य च महाबाहुं कोपसंरक्तलोचनम्।
पितरं समुपातिष्ठद्धृतराष्ट्रं कृताञ्जलिः ॥ १८ ॥(०४)

युधिष्ठिरः

राजन्किं करवामस्ते प्रशाध्यस्मांस्त्वमीश्वरः।
नित्यं हि स्थातुमिच्छामस्तव भारत शासने ॥ १९ ॥(०५)

धृतराष्ट्रः

अजातशत्रो भद्रं ते अरिष्टं स्वस्ति गच्छत।
अनुज्ञाताः सहधनाः स्वराज्यमनुशासत ॥ २० ॥(०६)

---

(०१) (१) श्रोत्रेभ्यः; श्वौतेभ्यः; श्रोतोभ्यः; स्रोतस्सु (for स्रोतोभ्यः); (२) कर्णाद्येभ्यो; कर्णान्तेभ्यो; कर्णास्येभ्यो; कर्णेभ्यश्चैव भारत; (३) सन्धूमः;.

(०२) (१) भ्रुकुटी; भृकुटी; भ्रकुटी; भ्रकुटी; दुष्प्रेक्ष्यम्; दुष्प्रेक्षम्; दुःप्रेक्ष्यम्; दुःप्रेक्षम्; पुत्रं; पटं; कृत; तट; ०कण्ठ०; ०मुख० (for ०पुट०); टीकृतमप्रैक्ष्यं; (२) येभवत् (for अभवत्); (३) युगान्ते समनुप्राप्ते; (४) कृतातस्यैव; दूषिणः (for रूपिणः);.

(०३) (१) समावार्यु; तमाचार्य; (२) बाहुभ्यां; शालिनः; षालिनं; (३) नैवम्; मैनम् (for मैवम्);चैव (for चैनं); (४) जौषम्; आदिष्ट; आस्थेति; आस्वेति;(for आस्स्वेति ); आस्व ( तिष्ठ );.

(०४) (१) त्वं; वै; च (for तं);महात्मानं; ०बाहुः; (२) क्रोध- (for कोप-);(३) समुपातिष्ठ; तमुपातिष्ठद्; (४) कृताञ्जलि;.

(०५)(२) ईश्वर; (३) सं- (for हि); इच्छामि;.

(०६)(२) वरिष्ठं; अरिष्टाः; अरिष्टां; आदिष्टा; गच्छतः; गच्छते; ह्यरिष्टा स्वस्ति गच्छतां; (४) स्वराष्ट्रम्; शासतः; राज्यं पालयतानधाः (नया);.

इदं चैवावबोद्धव्यं वृद्धस्य मम शासनम्।
मया निगदितं सर्वं पथ्यं निःश्रेयसं परम् ।। २१ ।।(०१)

वेत्थ त्वं तात धर्माणां गतिं सूक्ष्मां युधिष्ठिर ।**
विनीतोऽसि महाप्राज्ञ वृद्धानां पर्युपासिता ।। २२ ।।(०२)

यतोनुबुद्धितः शान्तिः प्रशमं गच्छ भारत।
नादारौ क्रमते शस्त्रं दारुण्येतन्निपात्यते ।। २३ ।।(०३)

लक्षालङ्कारः-यतोऽनुबुद्धित इत्यत्र 'यती प्रयत्ने' इति धातोः यतः प्रयत्नवान् । नादारौ क्रमते शस्त्रम् इत्यत्र अदारौ दारुव्यतिरिक्ते शिलादौ शस्त्रं परशुम् ।

न वैराण्यभिजानन्ति गुणान्पश्यन्ति नागुणान्।
विरोधं नाधिगच्छन्ति ये त उत्तमपूरुषाः ।। २४ ।।(०४)

सन्तः परार्थं कुर्वाणा नावेक्षन्ते प्रतिक्रियाम्।
स्मरन्ति सुकृतान्येव न वैराणि कृतान्यपि।

संवादे परुषाण्याहुर्युधिष्ठिर नराधमाः।
प्रत्याहुर्मध्यमास्त्वेतेऽनुक्ताः परुषमुत्तरम् ।। २५ ।।(०५)

---

(०१) (१) चैवाव; तात; च तेव०; त्वेव च; त्वेव (for त्वेवाव०); शासनात्; (३) मया; सिद्धं (for धिया); सर्वं (for कृत्स्नं);
(४) पश्य निः-; पश्यन्निः-; पश्यति (for पथ्यं निः-); निःश्रेयसे; पश्यन्ति प्रेयसं परं;.

(०२) (१) वेद; वेद्धि; वेत्स्य (for वेत्थ); राज- (for तात०); वेदध्वं सर्वधर्माणां; (२) इष्टां (for सूक्ष्मां); (३) विन०; विदि (for विनी); (ऽ)स्मि (for ऽसि); (४) पासितां; ०सत; सित;.

(०३) (१) बुद्धि सुतः (for बुद्धिस्ततः); यतो नु बुद्धितः; क्षान्तिः (for शान्तिः); (२) प्रथमं (for प्रशमं); (३) न दारौ; नाधत्ते (for नादारौ); नादारुणि पतेच्छ (पते श)स्त्रं; अदारुणि; (४) दारुण्येतन् (०ण्येव); ददौ शस्त्रं (for दारौ शस्त्रं);.

(०४) (१) जानाति; ०पद्यन्ति; पश्यन्ति (for जानन्ति); (२) वागुणान्; गुणात्पश्यन्ति नागुणात्; (३) ये तु; हन्त; सन्त; यत; ये वै; नित्यम् (एत) (for ये त); पौरुषाः;.

(०५) (१) पुरुषाण्या; पुरुषस्या०; (आ)ह (for (आ)हुर्); (३/४) प्रीत्या (for प्रत्या); मध्यगास् (for मास्); त्वेतायु (न्यु) क्ताः; त्वेनमुक्त्वा; त्वेननुक्ताः; त्वेतेनो (नु) क्ताः; त्वेतानुक्त्वा; त्वे (ते) नानुक्ताः

न चोक्ता नैव चानुक्तास्त्वहिताः परुषा गिरः।
प्रतिजल्पन्ति वै धीराः सदा तूत्तमपूरुषाः ।। २६ ।।[०१]

स्मरन्ति सुकृतान्येव न वैराणि कृतान्यपि।
सन्तः प्रतिविजानन्तो लब्ध्वा प्रत्ययमात्मनः ।। २७ ।।[०२]

*५७६ (अधिकपाठः - कपाठे)
असम्भिन्नार्थमर्यादाः साधवः प्रियदर्शनाः।*

यथाऽऽचरितमार्येण त्वयास्मिन् सत्समागमे ।
दुर्योधनस्य पारुष्यं तत्तात हृदि मा कृथाः ।। २८ ।।[०३]

लक्षालङ्कारः-यथाऽऽचरितमार्येण इत्यत्र आर्येण उत्तमपुरुषेण यथा आचरितं पूर्वमाचरितं, तथा अस्मिन् सत्समागमे त्वयाऽप्याचरितम् ।

मातरं चैव गान्धारीं मां च त्वं गुणकाङ्क्षया।
उपस्थितं वृद्धमन्धं पितरं पश्य भारत ।। २९ ।।[०४]

---

(for त्वेता०); पुरुषम् (for प); उत्तमं; ०र; ०मा (for ०रम्); पुरुषसत्तमाः (for परुषमु०); मध्यमास्तु परुषमुक्ताः;.

(०१) (१) न चोक्ता (for नैवोक्ता); नेवोक्ता नेव चा; न चैवोक्ता न चानुक्ता; ० वानुक्तान् उक्ताः अनुक्ताः;
(२) अहित-; आहिताः; त्वहिताः; हीनत (for अहिताः); पुरुषा गिराः; अहितां प (पु) रुषां गिरं; ह्य (न) चिन्ता (०त्या) महतां गिरः; न भीमाः पौरुषा गिरः;
(३) अति जल्पन्ति; इति ज; अधिज; भारताः प्रतिजल्पन्ति; नातिजल्पन्ति वै वीराः; (४) तूत्तम; ह्युत्तम सदानुत्तम; सदैवोत्तम पौरुषाः; ०पुरुषः;.

(०२) (२) नावैरास्सु-; नापराध- (for न वैराणि); (३) प्रत्यभिजानन्ते; प्रतिविजानैव; विजानन्ति; (४) लब्धा; आत्मनि; वानुक्तास्त्वहिता गिरः;.

(०३) (१) यथ (for तथा); विहितम् (for (आ)चरितम्); तथाचरन्ति मार्गेण; - ०चरितमार्गे ऽ ०वहितमार्गेण; चरितमानत्वं; (२) गते (for ०गमे); त्वया चा (वा-; त) स्मिन्समा०; यथास्मिन्स समा; त्वय स्मिन्समा; (त्व) यास्मि तत्समा; (४) तत्तावद्; तत्तथा; त्वं (ते) तात; तात ते (for तत्तात);.

(०४) (२) मा (for मां); त्वं गु (ग) ण०; त्वद्गुरु०; तद्गुण; गण (for गुण); काङ्क्ष्या (याः); काङ्क्षिणौ; ०काङ्क्षितं; काङ्क्षणं; मां च त्वं गुणकाङ्क्षया (०क्षितं; ०क्षणं); (३) वृद्धतमं; वृद्धमयं;.

प्रेक्षापूर्वं मया द्यूतमिदमासीदुपेक्षितम्।
मित्राणि द्रष्टुकामेन पुत्राणां च बलाबलम् ।[०१]
अशोच्याः कुरवो राजन्येषां त्वमनुशासिता ।। ३० ।।[०२]

मन्त्री च विदुरो धीमान्सर्वशास्त्रविशारदः ।। ३१ ।।[०३]

त्वयि धर्मोऽर्जुने धैर्यं भीमसेने पराक्रमः।
श्रद्धा च गुरुशुश्रूषा यमयोः पुरुषाग्र्ययोः ।। ३२ ।।[०४]

अजातशत्रो भद्रं ते खाण्डवप्रस्थमाविश।
भ्रातृभिस्तेऽस्तु सौभ्रात्रं धर्मे ते धीयतां मनः ।। ३३ ।।[०५]

वैशम्पायनः

इत्युक्तो भरतश्रेष्ठ धर्मराजो युधिष्ठिरः।
कृत्वाऽऽर्यसमयं सर्वं प्रतस्थे भ्रातृभिः सह ।। ३४ ।।[०६]

ते रथान्मेघसङ्काशानास्थाय सह कृष्णया।
प्रययुर्हृष्टमनस इन्द्रप्रस्थं पुरोत्तमम् ।। ३५ ।।[०७]

---

(०१) (१) प्रेक्ष्य; प्रेक्ष्या० (for प्रेक्षा); द्यूतं (for पूर्वं); इदं (for मया); पूर्वम्; नूनम् (for द्यूतम्); (२) आसीदिदम्; आसीदिहम्; (३) मित्राणां दुष्टकामेन; (४) पुरुषाणां; मित्राणां च;.

(०२) युधिष्ठिर उं; (१) न शोच्याः; (२) एषां (for येषां); ०शासकः;.

(०३) (१) मन्त्रे च; शास्त्रं त्वयि;.

(०४) (१) धृतराष्ट्र उं; त्वयि; त्वया (for त्वयि); धर्मे (for धर्मो); (ऽ) र्जुनो (for ०ने); धैर्यं (for वीर्यं); (२) पराक्रमं; (३)क- शुद्धा च । श्रुत्वा; शुद्धा; तद्वत्; तथा (for श्रद्धा); तु (for च); (४) पुरुषाग्रयोः;.

(०५) (२) आविशः; तैस्तु (for तेऽस्तु); सौहार्दं (for सौभ्रात्रं); (४) स्थीयतां; धीमतां; रमतां; धीयते (for धीयतां); मतः; मतिः (for मनः); दर्शितं त्वयि निष्ठितं;.

(०६) (१) भ्रातर; पुरुष (for भरत); श्रेष्ठ; (२) धर्मराजा; (३) चः (अ)थ; (अ)स्य (for (आ)र्य); सर्वे (for सर्वं); (समयं, आर्य); सर्व समयं कृत्वा;। कृत्वा तु तेन समयं; (४) प्रस्थिता; प्रस्थितो (for प्रतस्थे);

(०७) (१) हेमं; सूर्य० (for मेघ); (३) प्रत्ययुर्; प्रययौ; मनसा; (४)क-पुरोत्तमम् । इन्द्रप्रस्थ; ०प्रस्थपुर प्रति;

## अस्मिन् पर्वणि ६९अध्याये ३५९श्लोकाः सन्ति

### द्यूतपर्वणि(१७) सप्तदशोऽध्यायः

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि द्यूतपर्वणि धृतराष्ट्रवर प्रदानपूर्वकमिन्द्रप्रस्थ प्रति युधिष्ठिरगमने पञ्चषष्टितमोऽध्यायः।। ६९ ।।**

**(समाप्तं द्यूतपर्व)**

# अनुद्यूतपर्व

## ६६.षट्षष्टितमोऽध्यायः

## 02- 07- 66

अर्जुनस्य शौर्यमुपवर्ण्य पुनर्द्यूताय पाण्डवानाह्वयितुं दुर्योधनस्य धृतराष्ट्रं प्रत्यनुरोधस्तस्य धृतराष्ट्रकर्तृकं स्वीकरणं च ।। लक्षालङ्कारः-

जनमेजयः

अनुज्ञातांस्तान्विदित्वा सरत्नधनसञ्चयान्।
पाण्डवान्धार्तराष्ट्राणां कथमासीन्मनस्तदा ।। १ ।।(०१)

वैशम्पायनः

अनुज्ञातांस्तान्विदित्वा धृतराष्ट्रेण धीमता।
राजन्दुःशासनः क्षिप्रं जगाम भ्रातरं प्रति ।। २ ।।(०२)

दुर्योधनं समासाद्य सामात्यं भरतर्षभ ।
दुःखार्तो भरतश्रेष्ठमिदं वचनमब्रवीत् ।। ३ ।।(०३)

(दुःशासनः)

दुःखेनैतत्समानीतं स्थविरो नाशयत्यसौ।

---

(०१) वैशम्पायन (For जनमेजय ) (१) तदा दृष्ट्वा; तु तान्दृष्ट्वा; विदित्वा तान् (२)सरत्नधनुसञ्चयान्
(३)पाण्डवानां (वान् ) (For धार्त ); (४) आसीन् ); तथा (For तदा );.

(०२) (१)विदित्वा तान्; विदित्वा च (तु); (२) सधनान्पाण्डवर्षभान्
(४)पितरं (For भ्रातरं ); प्रियं (Forप्रति );.

(०३) (१)समासीनं (Forसाद्य ); स० दुर्यो (सुयो ) धनमासाद्य; स दुर्योधनमासीनं;
(२)भरतर्षभं; भरतर्षभः; पुरुषर्षभ; (३)भरतश्रेष्ठम् (४) त्विदं १०; इदं );.

शत्रुसाद्गमयन् द्रव्यं तद्बुध्यध्वं महारथाः ।। ४ ।।(०१)

लक्षालङ्कारः-शत्रुसाद्गमयन् इत्यत्र 'तदधीनकात्स्न्र्ययोर्वा सात्' इति वचनात् शत्रुसात् शत्र्वधीनं गमयन् प्रापयन् ।

वैशम्पायनः-

निष्क्रान्ताः पाण्डवा राजन्त्यहवाहधनानुगाः ।
सधनुष्काः सतूणीरास्तदुध्यध्वं महारथाः ।। ५ ।।(०२)

**अथ दुर्योधनः कर्णः शकुनिश्चापि सौबलः।**
**मिथः सङ्गम्य सहिताः पाण्डवान्प्रति मानिनः।**(०३)

वैचित्रवीर्यं राजानं धृतराष्ट्रं मनीषिणम्।
अभिगम्य त्वरायुक्ताः श्लक्ष्णं वचनमब्रुवन् ।। ६ ।।(०४)

दुर्योधनः

न त्वयेदं श्रुतं राजन्यज्जगाद बृहस्पतिः।
शक्रस्य नीतिं प्रवदन्विद्वान्देवपुरोहितः ।। ७ ।।(०५)

सर्वोपायैर्निहन्तव्याः शत्रवः शत्रुसूदन।

---

(०१) दुःशासन उ (दुःशासनः) (१) दुःखानैतासू; दुःखेनीतान् (Forदुःखेनैतत् ); यत्; (ए) तान् तान् ( ए तत् ) समानीतान्; समुत्तीर्य; समानीय (For नीतं );.

(०२) (३)शात्रवं; शत्रुसाद् ग (श) मयन् अगमद् पुत्रा (शत्रू) न्मंशमयत्यद्य; पुत्रान्संशयमभ्येत्य; शत्रूनुद्यमयत्यद्य; (४)बुध्यध्वं वै (च); तद्बुध्य त्वं; त (स) हुध्यस्व, बुध्यस्व त्वं; नराधिपाः; महारथ; रथ;.

(०३) (१)वैशं उं (उ ) दुर्योधनं; (३) सङ्गत्य महता (Forसहिताः ); (४)भारत (For मानिनः).

(०४) (१)युक्त; युक्ता (For युक्ताः ); (४)श्लक्ष्ण अब्रवीत् । अब्रवन् (For अब्रुवन् );.

(०५) (१) ए तत् (For () दं ) त्वयेदं श्रूयतां राजन् (३) चक्रस्य (Forशक्रस्य ) नीतं (For नीतिं ); प्रवदत् (४)विज्ञो; णो विद्यान्; पुरा (For विद्वान् );.

पुरा युद्धाद्बलाद्वापि प्रकुर्वन्ति तवाहितम् ॥ ८ ॥(०१)

**लक्षालङ्कारः-पुरा युद्धात्पुरा, उपायैरित्यर्थः । हितं यथा भवति तथा न कुर्वन्तीति योजना ।**

ते वयं पाण्डवधनैः सर्वान्सम्पूज्य पार्थिवान्।
यदि तान्योधयिष्यामः किं वै नः परिहास्यति ॥ ९ ॥(०२)

**लक्षालङ्कारः-परिहास्यति 'ओहाक् त्यागे' इति धातोर्लृट् । नङ्क्ष्यतीत्यर्थः।**

अहीनाशीविषान्क्रुद्धान्नाशाय समुपस्थितान्।
कृत्वा कण्ठे च पृष्ठे च कः समुत्स्रष्टुमर्हति ॥ १० ॥(०३)

आत्तशस्त्रा रथगताः कुपितास्तात पाण्डवाः।
निःशेषं वः करिष्यन्ति क्रुद्धा ह्याशीविषा इव ॥ ११ ॥(०४)

सन्नद्धो ह्यर्जुनो याति विवर्त्य परमेषुधी ।

**लक्षालङ्कारः-विवर्त्य विशेषेण वर्तयित्वा अलङ्कृत्येत्यर्थः । 'विभज्य' इति पाठे भुजद्वये**

---

(०१) (१) नियन्तव्याः (Forनिहन्तव्याः) (२) कुरवः (Forशत्रवः ); सूदन (नः); कर्शण कर्शन नः; (नाः) (For कर्षण)

(३) परा; पुरा (आ) युधाद्; युधा; ( आ ) युध वधाच्चा (द्वा)पि न यावद्धि; बला वा (द्य); पि (For बलाद्वापि ); बलाद् (४) ये कुर्वन्ति; सदा; ( अ ) मता तथा (For तवा );.

(०२) (१) तवायं (For ते वयं ); (४) पूर्ववत्पूज्यः सर्वान्सम्पूर्य; पाण्डवान्; पार्थिवं,
(३)अहितान्; यदिमान् (यदि वा) (For यदि तान् ); यिष्यामा (मि)
(४) वै च हि (वा) न (नः) प्रतियास्यति (नः परिभाष्यति स्यति);.

(०३) (१) घोरान् (For क्रुद्धान् ); (२) ना ( नां )शाय दंशान् (For दंशाय );
(३)धृत्वा; बध्वा; दग्ध्वा; स्कन्धे; कर्णे (For कण्ठे ); कण्ठे पृष्ठे; कृत्वा लाङ्गुलविच्छेदं
(४) कथमुत्स्रष्ढ्वमर्हति (सि); कः पुमान्यष्टुम;.

(०४) (१)आर्तशस्त्रा; आप्तशस्त्रा; आर्तशस्त्रा; -(२) तत्र (For तात );
(३) निःशेषान् निःशेषान्तः वः न (For नः ); (४) हि; इव; सभाः (For यथा );
विषो (For विषा);क्रुद्धा इव भुजङ्गमाः; आशीः क्रुद्धा विषा इव क्रुद्धा ह्याशीविषोपमाः;.

विभक्तौ कृत्वेत्यर्थः ।

२) विभज्य इति लक्षालङ्कारसूचितपाठान्तरम् ।

गाण्डीवं मुहुरादत्ते निःश्वसंश्च निरीक्षते।[०१]

गाण्डीवं गृह्य सङ्क्रुद्धः पार्थः शस्त्रभृतां वरः ।
अचिरेणैव कालेन निःशेषं नः करिष्यति ।। १२ ।।[०२]

न पश्यामि रणे क्रुद्धं बीभत्सुं विनिवर्तितुम् ।। १३ ।।

भीष्मो द्रोणश्च कर्णश्च द्रौणिश्च रथिनां वरः ।

कृपश्च वृषसेनश्च विकर्णश्च जयद्रथः ।। १४ ।।

बाह्लीकः सोमदत्तश्च भूरिर्भूरिश्रवाः शलः ।

शकुनिः ससुतश्चैव नृपाश्चान्ये च कौरवाः ।
एते सर्वे रणे यत्ताः पार्थं सोढुं न शक्नुवन् ।। १५ ।।

अर्जुनेन समो वीर्ये नास्ति लोके धनुर्धरः ।
योऽर्जुनेनार्जुनस्तुल्यो द्विबाहुर्बहुबाहुना ।। १६ ।।

धृतराष्ट्रः

कस्त्वयोक्तः पुमान् वीरो बीभत्सुसमविक्रमः ।
तं मे ब्रूहि महावीर्यं श्रोतुमिच्छामि पुत्रक ।। १७ ।।

दुर्योधनः

कार्तवीर्यार्जुनो नाम राजा बाहुसहस्रवान् ।

---

(०१) (१) सोर्जुनो (For ह्य ) भाति (For याति ); (२)विभज्य इति लक्षालङ्कारसूचितपाठान्तरम् ।
वितत्य; विधृत्य; विभृत्य; विहृत्य विवर्त्य (For विवृत्य ); परमेषुधीः; षुधिः षुधि षुधृक;.
(०२) (३) गाण्डिवं गाञ्जीवं धनुरादत्ते अनु चादत्ते गृह्य सङ्क्रुद्धः मुहराधत्ते (४) पार्थः शस्त्रभृतां वरः; निशश्वस नराधिपः (निरीक्षते).

हेहयाधिपतिर्वीरः पाश्वदश्यः पितामहात् ।। १८ ।।

धृतराष्ट्रः

गान्धारीपुत्र सर्वांस्तान् कार्तवीर्यपितामहान् ।
आनुपूर्व्याच्च मे शंस ततस्तं पार्थिवं तथा ।। १९ ।।

दुर्योधनः

कार्तवीर्यस्य चरितं शृणु राजन् महात्मनः ।। २० ।।

अव्यक्तप्रभवो ब्रह्मा सर्वलोकपितामहः ।
ब्रह्मणोऽत्रिः सुतो विद्वानत्रेः पुत्रो निशाकरः ।। २१ ।।

सोमस्य तु बुधः पुत्रो बुधस्य तु पुरूरवाः ।
तस्याप्यथ सुतोऽप्यायुरायोस्तु नहुषः सुतः ।। २२ ।।

नहुषस्य ययातिस्तु ययातेस्तनुजो यदुः ।
यदोः पुत्रो महाराज सहस्रौजेति विश्रुतः ।। २३ ।।

सहस्रौजसुतो राजन् चक्रदासेति विश्रुतः ।
चक्रदासस्य दायादो हेहयो नाम पार्थिवः ।। २४ ।।
हेहयस्याभवत् पुत्रो धर्मनेत्र इति श्रुतः ।। २५ ।।

धर्मनेत्रस्य कार्तस्तु कृतवीर्यस्तु कार्तजः।
कृतवीर्यस्य तनयो ह्यर्जुनो बलिनां वरः ।। २६ ।।

स चार्जुनो महाराज तपो घोरं चकार ह।

साग्रं वर्षायुतं तप्त्वा तपः परमदुश्चरम् ।
दत्तमाराधयामास सोऽर्जुनोऽत्रिसुतं मुनिम् ।। २७ ।।
तस्य दत्तो वरान् प्रादाच्चतुरः पार्थिवस्य वै ।। २८ ।।

पूर्वं बाहुसहस्रं तु प्रार्थितः परमो वरः।

अधर्मे प्रीयमाणस्य सद्भिस्तत्र निवारणम् ।। २९ ।।

धर्मेण पृथिवीं जित्वा धर्मेणैवानुरञ्जनम् ।
सङ्ग्रामान् सुबहून् जित्वा हत्वा चारीन् सहस्रशः ।। ३० ।।
सङ्ग्रामे यतमानस्य वधश्चैवाधिकाद् रणे ।। ३१ ।।

तस्य बाहुसहस्रं तु युध्यतः किल भारत ।
रथो ध्वजश्च संजज्ञ इत्येवं मे श्रुतं पुरा ।। ३२ ।।

तथेयं पृथिवी राजन् सप्तद्वीपा सपत्तना ।
ससमुद्राकरा तात बलिनोग्रेण वै जिता ।। ३३ ।।

स चार्जुनोऽथ तेजस्वी सप्तद्वीपेश्वरोऽभवत् ।
स च राजा महायज्ञानाजहार महाबलः ।। ३४ ।।

महीं च सकलां जित्वा असकृत् स समा बहूः।
ततोऽर्जुनः कदाचिद्वै राजन् माहिष्मतीपतिः ।। ३५ ।।
नर्मदां भरतश्रेष्ठ स्नातुं दारैर्ययौ सह ।। ३६ ।।

ततस्तु स नदीं गत्वा प्रविश्यान्तर्जलं मुदा ।
कर्तुं राजन् जलक्रीडां ततो राजोपचक्रमे ।। ३७ ।।
तस्मिन्नेव तु काले तु रावणो राक्षसैः सह ।। ३८ ।।
लङ्काया ईश्वरस्तात तं देशं प्रययौ बली ।। ३९ ।।

ततस्तमर्जुनं दृष्ट्वा नर्मदायां दशाननः ।
नित्यं क्रोधपरो धीरो वरदानेन मोहितः ।। ४० ।।

अभ्यधावत् सुसङ्क्रुद्धो महेन्द्रं शम्बरो यथा ।
अर्जुनोऽप्यथ तं दृष्ट्वा रावणं प्रत्यवारयत् ।। ४१ ।।

ततस्तौ चक्रतुर्युद्धं रावणश्चार्जुनश्च वै।

ततस्तु दुर्जयं वीरं वरदानेन दर्पितम् ।। ४२ ।।

राक्षसेन्द्रं मनुष्येन्द्रो युध्द्वा जित्वा रणे बलात् ।
बद्ध्वा धनुर्ज्यया राजन् विवेशाथ पुरीं स्वकाम् ।। ४३ ।।

स तु तं बन्धितं श्रुत्वा पुलस्त्यो रावणं तदा ।
मोक्षयामास दृष्ट्वाऽथ पुरेऽदृष्ट्वाऽर्जुनं तदा ।। ४४ ।।

ततः कदाचित् तेजस्वी कार्तवीर्यार्जुनो बली ।
समुद्रतीरं गत्वाऽथ विचरन् दर्पमोहितः ।। ४५ ।।

अवाकिरत् शितशरैः समुद्रं स तु भारत ।
तं समुद्रो नमस्कृत्य कृताञ्जलिरभाषत ।। ४६ ।।

आशुगान् वीर मा मुञ्च ब्रूहि किं करवाणि ते ।

मदाश्रयाणि भूतानि त्वन्निसृष्टैर्महेषुभिः ।
वध्यन्ते राजशार्दूल तेभ्यो देह्यभयं विभो ।। ४७ ।।

अर्जुनः

देहि सिन्धुपते युद्धमद्यैव त्वरया मम ।
अथवा पीडयामि त्वां तस्मात् त्वं कुरु मा चिरम् ।। ४८ ।।

समुद्रः

लोके राजन् महावीर्या बहवो निवसन्ति ये ।
तेषामेकेन राजेन्द्र कुरु युद्धं महाबल ।। ४९ ।।

अर्जुनः

मत्समो यदि सङ्ग्रामे वरायुधधरः क्वचित् ।
विद्यते तं ममाचक्ष्व यः सहेत महामृधे ।। ५० ।।

समुद्रः

महर्षिर्जमदग्निस्तु यदि राजन् परिश्रुतः ।
तस्य पुत्रो रणं दातुं यथावद्वै तवार्हति ।। ५१ ।।

दुर्योधनः

समुद्रस्य वचः श्रुत्वा राजा माहिष्मतीपतिः ।
नारदस्य वचः पूर्वं क्रोधेन महता वृतः ।। ५२।।

ततः प्रतिययौ शीघ्रं क्रोधेन सह भारत ।
स तमाश्रममागत्य राममेवान्वपद्यत ।। ५३।।

स रामप्रतिकूलानि चकार सह बन्धुभिः ।
आयासं जनयामास रामस्य स महात्मनः ।। ५४ ।।

ततस्तेजः प्रजज्वाल रामस्यामिततेजसः ।

प्रदहन्निव सैन्यानि रश्मिमानिव तेजसा ।
अथ तौ चक्रतुर्युद्धं वृत्रवासवयोरिव ।। ५५ ।।

ततः परशुमादाय नृपं बाहुसहस्रिणम् ।
चिच्छेद सहसा रामो बहुशाखमिव द्रुमम् ।। ५६ ।।

तं हतं पतितं दृष्ट्वा समेताः सर्वबान्धवाः ।
असीनादाय शक्तीश्च रामं ते प्रत्यवारयन् ।। ५७ ।।

रामोऽपि रथमास्थाय धनुरायम्य सत्वरः ।
विसृजन् परमास्त्राणि व्यधमत् पार्थिवं बलम् ।। ५८ ।।

ततस्तु क्षत्रिया राजन् जामदग्न्यभयार्दिताः ।
विविशुर्गिरिदुर्गाणि मृगाः सिंहभयादिव ।। ५९ ।।

तेषां स्वविहितं कर्म तद्भयान्नानुतिष्ठताम् ।

प्रजा वृषलतां प्राप्ता ब्राह्मणानामदर्शनात् ।। ६० ।।

तथा ते द्रविडाः काशाः पुण्ड्राश्च शबरैः सह ।
वृषलत्वं परिगता ह्युच्छिन्नाः क्षत्रकर्मणः ।। ६१ ।।

ततस्तु हतवीरासु क्षत्रियासु पुनः पुनः ।
द्विजैरभ्युदितं क्षत्रं तानि रामो निहत्य च ।। ६२ ।।

ततस्त्रिस्सप्तमं वारं रामं वागशरीरिणी ।
दिव्या प्रोवाच मधुरा सर्वलोकपरिश्रुता ।। ६३ ।।

राम राम निवर्तस्व स्वगुणं चाथ पश्यसि ।
क्षत्रबन्धूनिमान् प्राणैर्विप्रयुज्य पुनः पुनः ।। ६४ ।।

तथैव तं महात्मानमृचीकप्रमुखास्तथा ।
राम राम महावीर निवर्तस्वेत्यथाब्रुवन् ।। ६५ ।।

पितुर्वधममृष्यंस्तु रामः प्रोवाच तानृषीन् ।
नार्हा हन्त भवन्तो मां निवारयितुमित्युत ।। ६६ ।।

पितरः

नार्हसि क्षत्रबन्धूंस्त्वं निहन्तुं जयतां वर ।
न हि युक्तस्तदाघातो ब्राह्मणेन सता त्वया।

दुर्योधनः

पितॄणां वचनं श्रुत्वा क्रोधं त्यक्त्वा स भार्गवः ।
अश्वमेधसहस्राणि नरमेधशतानि च ।। ६७ ।।

इष्ट्वा सागरपर्यन्तां काश्यपाय महीं ददौ ।
तेन रामेण सङ्ग्रामे तुल्यस्तात धनञ्जयः ।

कार्तवीर्येण च रणे तुल्यः पार्थो न संशयः ।
रणे विक्रम्य राजेन्द्र पार्थं जेतुं न शक्यते ।। ६८ ।।

**अस्मिन् पर्वणि ६६ अध्याये ६८ श्लोकाः सन्ति**

अनुद्यूतपर्वणि(१) प्रथमोऽध्यायः ।

**इति श्रीमहाभारते शतसाहस्र्या वैयासिक्यां संहितायां सभापर्वणि अनुद्यूतपर्वणि गान्धारीवाक्ये षट्षष्टितमोऽध्यायः।।६६।।**

# ६७. सप्तषष्टितमो..ध्यायः

दुर्योधनेन धृतराष्ट्रसमीपे अर्जुनप्रभाववर्णनम् ।। १ ।। दुर्योधनदुर्बोधनेन धृतराष्ट्रस्य पुनर्द्यूताय पाण्डवानयानाभ्यनुज्ञा ।। २ ।।

दुर्योधनः

शृणु राजन् पुराऽचिन्त्यान् अर्जुनस्य च साहसान् ।
अर्जुनो धन्विनां श्रेष्ठो दुष्कृतं कृतवान् पुरा ।। १ ।।

द्रुपदस्य पुरे राजन् द्रौपद्याश्च स्वयंवरे ।

आबालवृद्धसङ्घोषे सर्वक्षत्रसमागमे ।
क्षिप्रकारी जले मत्स्यं दुर्निरीक्ष्यं ससर्ज ह ।। २ ।।

सर्वैर्नृपैरसाध्यं तत् कार्मुकप्रवरं च वै ।
क्षणेन सज्यमकरोत् सर्वक्षत्रस्य पश्यतः ।। ३ ।।

ततो यन्त्रमयं विद्ध्वा विसारं फल्गुनो बली ।

कृष्णया हेममाल्येन स्कन्धे स परिवेष्टितः ॥ ४ ॥

ततस्तया वृतं पार्थं दृष्ट्वा सर्वे नृपास्तदा ।

रोषात् सर्वायुधान् गृह्य क्रुद्धा वीरा महाबलाः ॥ ५ ॥

वैकर्तनं पुरस्कृत्य सर्वे पार्थमुपाद्रवन् ॥ ६ ॥

स दृष्ट्वा पार्थिवान् सर्वान् क्रुद्धान् पार्थो महाबलः ।

वारयित्वा शरैस्तीक्ष्णैरजयत् तत्र स स्वयम् ॥ ७ ॥

जित्वा तु तान् महीपालान् सर्वान् कर्णपुरोगमान् ।

लेभे कृष्णां शुभां पार्थो युद्ध्वा वीर्यबलात् तदा ।

सर्वक्षत्रसमूहेषु अम्बां भीष्मो यथा पुरा ॥ ८॥

ततः कदाचिद्बीभत्सुः तीर्थयात्रां ययौ स्वयम् ॥ ९ ॥

अथोलूपीं शुभां जातां नागराजसुतां तदा ।

नागेष्ववाप चाग्र्येषु प्रार्थितोऽथ यथातथम् ॥ १० ॥

ततो गोदावरीं वेण्णां कावेरीं चावगाहत ।

तत्र पाण्ड्यं समासाद्य तस्य कन्यामवाप सः ।

लब्ध्वा जिष्णुर्मुदं तत्र ततो याम्यां ययौ दिशम् ॥ ११ ॥

स दक्षिणं समुद्रान्तं गत्वा चाप्सरसां च वै ।

कुमारीतीर्थमासाद्य मोक्षयामास चार्जुनः ॥ १२ ॥

ग्राहरूपान्विताः पञ्च अतिशौर्येण वै बलात् ।

कन्यातीर्थं समभ्येत्य ततो द्वारवतीं ययौ ॥ १३ ॥

तत्र कृष्णनिदेशात् स सुभद्रां प्राप्य फल्गुनः ।

तामारोप्य रथोपस्थे प्रययौ स्वपुरीं प्रति ।। १४ ।।

अथादाय गते पार्थे ते श्रुत्वा सर्वयादवाः ।
तमभ्यधावन् सङ्क्रुद्धाः सिंहं व्याघ्रगणा इव ।। १५ ।।

प्रद्युम्नः कृतवर्मा च गदः सारणसात्यकी ।
आहुकश्चैव साम्बश्च चारुदेष्णो विडूरथः ।। १६ ।।

अन्ये च यादवाः सर्वे बलदेवपुरोगमाः ।
एकमेव ऋते कृष्णं गजवाजिरथैर्युताः ।। १७ ।।

अथासाद्य वने यान्तं परिवार्य धनञ्जयम् ।
चक्रुर्युद्धं सुसङ्क्रुद्धा बहुकोट्यश्च यादवाः ।। १८ ।।

एक एव तु पार्थस्तैर्युद्धं चक्रे सुदारुणम् ।
तेन तेषां समं युद्धं मुहूर्तं प्रबभूव ह ।। १९ ।।

ततः पार्थो रणे सर्वान् वारयित्वा शितैः शरैः ।

बलाद् विजित्य राजेन्द्र वीरस्तान् सर्वयादवान् ।। २० ।।
तां सुभद्रामथादाय शक्रप्रस्थं विवेश ह ।। २१ ।।

भूयः शृणु महाराज फल्गुनस्य तु साहसम् ।
ददौ च वह्नेर्बीभत्सुः प्रार्थितं खाण्डवं वनम् ।। २२ ।।

लब्धमात्रे तु तेनाथ भगवान् हव्यवाहनः ।
भक्षितुं खाण्डवं राजन् ततः समुपचक्रमे ।। २३ ।।

ततस्तं भक्षयन्तं वै सव्यसाची विभावसुम् ।

रथी धन्वी शरान् गृह्य स कलापयुतः प्रभुः ।
पालयामास राजेन्द्र स्ववीर्येण महाबलः ।। २४ ।।

ततः श्रुत्वा महेन्द्रस्तं मेघांस्तान् सन्दिदेश ह ।
तेनोक्ता मेघसङ्घास्ते ववर्षुरतिवृष्टिभिः ।। २५ ।।

ततो मेघगणान् पार्थः शरव्रातैः समन्ततः ।
खगमैर्वारयामास तदाश्चर्यमिवाभवत् ।। २६ ।।

वारितान् मेघसङ्घांश्च श्रुत्वा क्रुद्धः पुरन्दरः ।
पाण्डरं गजमास्थाय सर्वदेवगणैर्वृतः ।। २७ ।।

ययौ पार्थेन संयोद्धुं रक्षार्थं खाण्डवस्य च ।। २८ ।।

रुद्राश्च मरुतश्चैव वसवश्चाश्विनौ तदा ।
आदित्याश्चैव साध्याश्च विश्वे देवाश्च भारत ।
गन्धर्वाश्चैव सहिता अन्ये सुरगणाश्च ये ।। २९ ।।

ते सर्वे शस्त्रसम्पन्ना दीप्यमानाः स्वतेजसा ।
धनञ्जयं जिघांसन्तः प्रपेतुर्विबुधाधिपाः ।। ३० ।।

युगान्ते यानि दृश्यन्ते निमित्तानि महान्त्यपि ।
सर्वाणि तत्र दृश्यन्ते सुघोराणि महीपते ।। ३१ ।।

ततो देवगणाः सर्वे पार्थं समभिदुद्रुवुः ।। ३२ ।।

असम्भ्रान्तस्तु तान् दृष्ट्वा स तां देवमयीं चमूम् ।
त्वरितः फल्गुनो गृह्य तीक्ष्णांस्तानाशुगांस्तदा ।
शक्रं देवांश्च सम्प्रेक्ष्य तस्थौ काल इवात्यये ।। ३३ ।।

ततो देवगणाः सर्वे बीभत्सुं सपुरन्दराः ।
अवाकिरन् शरव्रातैर्मानुषं तं महीपते ।। ३४ ।।

ततः पार्थो महातेजा गाण्डीवं गृह्य सत्वरः ।
वारयामास देवानां शरव्रातैः शरांस्तदा ।। ३५ ।।

पुनः क्रुद्धाः सुराः सर्वे मर्त्यं सङ्घे महाबलाः ।
नानाशस्त्रैर्ववर्षुस्तं सव्यसाचिं महीपते ।। ३६ ।।

तान् पार्थः शस्त्रवर्षान् वै विसृष्टान् विबुधैस्तदा ।
द्विधा त्रिधा च चिच्छेद ख एव निशितैः शरैः ।। ३७ ।।

पुनश्च पार्थः सङ्क्रुद्धो मण्डलीकृतकार्मुकः ।
देवसङ्घाञ्छरैस्तीक्ष्णैरर्पयद्वै समन्ततः ।। ३८ ।।

ततो देवगणाः सर्वे युद्ध्वा पार्थेन वै मुहुः ।
रणे जेतुमशक्यं तं ज्ञात्वा ते भरतर्षभ ।। ३९ ।।

शान्तास्ते विबुधाः सर्वे पार्थबाणाभिपीडिताः ।
सद्विपं वासवं त्यक्त्वा दुद्रुवुः सर्वतोदिशम् ।। ४० ।।

प्राचीं रुद्राः सगन्धर्वा दक्षिणां मरुतो युधि ।
दिशं प्रतीचीं भीतास्ते वसवश्च तथाऽश्विनौ ।। ४१ ।।

आदित्याश्चैव विश्वे च दुद्रुवुर्वा उदङ्मुखाः ।
साध्याश्चोर्ध्वमुखा भीताश्चिन्तयन् पार्थसायकान् ।। ४२ ।।

एवं सुरगणाः सर्वे प्राद्रवन् सर्वतोदिशम् ।
मुहुर्मुहुः प्रेक्षमाणाः पार्थमेव सकार्मुकम् ।। ४३ ।।

विद्रुतान् देवसङ्घांस्तान् रणे दृष्ट्वा पुरन्दरः ।
ततः क्रुद्धो महातेजाः पार्थं बाणैरवाकिरत् ।। ४४ ।।

पार्थोऽपि शक्रं विव्याथ मानुषो विबुधाधिपम् ।। ४५ ।।

ततः सोऽश्ममयं वर्षं व्यसृजद् विबुधाधिपः ।
तच्छरैरर्जुनो वर्षं प्रतिजघ्नेऽत्यमर्षणः ।। ४६ ।।

अथ संवर्धयामास तद्वर्षं देवराडपि ।

भूय एव तदा वीर्यं जिज्ञासुः सव्यसाचिनः ॥ ४७ ॥

सोऽश्मवर्षं महावेगमिषुभिः पाण्डवोऽपि च ।
विलयं गमयामास हर्षयन् पाकशासनम् ॥ ४८ ॥

उपादाय तु पाणिभ्यामङ्गदं नाम पर्वतम् ।
सद्रुमं व्यसृजच्छक्रो जिघांसुः श्वेतवाहनम् ॥ ४९ ॥

ततोऽर्जुनो वेगवद्भिर्ज्वलमानैरजिह्मगैः ।

बाणैर्विध्वंसयामास गिरिराजं सहस्रशः ।
शक्रं च वारयामास शरैः पार्थो बलाद्युधि ॥ ५० ॥

ततः शक्रो महाराज रणे वीरं धनञ्जयम् ।

ज्ञात्वा जेतुमशक्यं तं तेजोबलसमन्वितम् ॥ ५१ ॥

परां प्रीतिं ययौ तत्र पुत्रशौर्येण वासवः ॥ ५२ ॥

तदा तत्र न तस्यासीद् दिवि कश्चिन्महायशाः ।
समर्थो निर्जये राजन्नपि साक्षात् प्रजापतिः ॥ ५३ ॥

ततः पार्थः शरैर्हत्वा यक्षराक्षसपन्नगान् ।
दीप्ते चाग्नौ महातेजाः पातयामास सन्ततम् ॥ ५४ ॥

प्रतिप्रेक्षयितुं पार्थं न शेकुस्तत्र केचन ।
दृष्ट्वा निवारितं शक्रं दिवि देवगणैः सह ॥ ५५ ॥

यथा सुपर्णः सोमार्थं विबुधानजयत् पुरा ।
तथा जित्वा सुरान् पार्थस्तर्पयामास पावकम् ॥ ५६ ॥

ततोऽर्जुनः स्ववीर्येण तर्पयित्वा विभावसुम् ।
रथं ध्वजं हयांश्चैव दिव्यास्त्राणि सभां च वै ॥ ५७ ॥

गाण्डीवं च धनुश्श्रेष्ठं तूणी चाक्षयसायकौ ।
एतान्यवाप बीभत्सुर्लेभे कीर्तिं च भारत ॥ ५८ ॥

भूयोऽपि शृणु राजेन्द्र पार्थो गत्वोत्तरां दिशम् ।
विजित्य नववर्षांश्च सपुरांश्च सपर्वतान् ॥ ५९ ॥

जम्बूद्वीपं वशे कृत्वा सर्वं तद्भरतर्षभ ।
बलाज्जित्वा नृपान् सर्वान् करे च विनिवेश्य च ॥ ६० ॥

रत्नान्यादाय सर्वाणि गत्वा चैव पुनः पुरीम् ।

ततो ज्येष्ठं महात्मानं धर्मराजं युधिष्ठिरम् ।
राजसूयं क्रतुश्रेष्ठं कारयामास भारत ॥ ६१ ॥

स तान्यन्यानि कर्माणि कृतवानर्जुनः पुरा ।
अर्जुनेन समो वीर्ये नास्ति लोके पुमान् क्वचित् ॥ ६२ ॥

देवदानवयक्षाश्च पिशाचोरगराक्षसाः ।
भीष्मद्रोणादयः सर्वे कुरवश्च महारथाः ॥ ६३ ॥

लोके सर्वनृपाश्चैव वीराश्चान्ये धनुर्धराः ।
एते चान्ये च बहवः परिवार्य महीपते ॥ ६४ ॥

एकं पार्थं रणे यत्ताः प्रतियोद्धुं न शक्नुयुः ॥ ६५॥

अहं हि नित्यं कौरव्य फल्गुनं प्रति सत्तमम् ।
अनिशं चिन्तयित्वा तं समुद्विग्नोऽस्मि तद्भयात् ॥ ६६ ॥

गृहे गृहे च पश्यामि तात पार्थमहं सदा ।
शरगाण्डीवसंयुक्तं पाशहस्तमिवान्तकम् ॥ ६७ ॥

अपि पार्थसहस्राणि भीतः पश्यामि भारत ।
पार्थभूतमिदं सर्वं नगरं प्रतिभाति मे ॥ ६८ ॥

पार्थमेव हि पश्यामि रहिते तात भारत ।
दृष्ट्वा स्वप्नगतं पार्थमुद्भ्रमामि ह्यचेतनः ॥ ६९ ॥

अकारादीनि नामानि अर्जुनत्रस्तचेतसः ।
अश्वाश्चार्था ह्यजाश्चैव त्रासं सञ्जनयन्ति मे ॥ ७० ॥

नास्ति पार्थादृते तात परवीराद् भयं मम ।
प्रह्लादं वा बलिं वाऽपि हन्याद्धि विजयो रणे ॥ ७१ ॥

तस्मात् तेन महाराज युद्धमस्मज्जनक्षयम् ।
अहं तस्य प्रभावज्ञो नित्यं दुःखं वहामि च ॥ ७२ ॥

पुरा हि दण्डकारण्ये मारीचस्य यथा भयम् ।
भवेद्रामे महावीर्ये तथा पार्थे भयं मम ॥ ७३ ॥

धृतराष्ट्रः

जानाम्येव महद्वीर्यं जिष्णोरेतद् दुरासदम् ।
तात वीरस्य पार्थस्य मा कार्षीस्त्वं तु विप्रियम् ॥ ७४ ॥

द्यूतं वा शस्त्रयुद्धं वा दुर्वाक्यं वा कदाचन ।

एतेष्वेवं कृते तस्य विग्रहश्चैव वो भवेत् ।
तस्मात् त्वं पुत्र पार्थेन नित्यं स्नेहेन वर्तय ॥ ७५ ॥

यश्च पार्थेन सम्बन्धाद् वर्तते च नरो भुवि ।
तस्य नास्ति भयं किञ्चित् त्रिषु लोकेषु भारत ॥ ७६ ॥

तस्मात् त्वं जिष्णुना वत्स नित्यं स्नेहेन वर्तय ॥ ७७ ॥

दुर्योधनः

द्यूते पार्थस्य कौरव्य मायया निकृतिः कृता ।
तस्माद्धि तं जहि सदा त्वन्योपायेन नो भवेत् ॥ ७८ ॥

धृतराष्ट्रः

उपायश्च न कर्तव्यः पाण्डवान् प्रति भारत ।

पार्थान् प्रति पुरा वत्स बहूपायाः कृतास्त्वया ।
तानुपायान् हि कौन्तेया बहुशो व्यतिचक्रमुः ॥ ७९ ॥

तस्माद्धितं जीविताय नः कुलस्य जनस्य च ।
त्वं चिकीर्षसि चेद्वत्स समित्रः सहबान्धवः ॥ ८० ॥

सभ्रातृकस्त्वं पार्थेन नित्यं स्नेहेन वर्तय ॥ ८१ ॥

वैशम्पायनः

धृतराष्ट्रवचः श्रुत्वा राजा दुर्योधनस्तदा ।
चिन्तयित्वा मुहूर्तं तु विधिना चोदितोऽब्रवीत् ॥ ८२ ॥

दुर्योधनः

न त्वयेदं श्रुतं राजन् यज्जगाद बृहस्पतिः ।
शक्रस्य नीतिं प्रवदन् विद्वान् देवपुरोहितः ॥ ८३ ॥

सर्वोपायैर्निहन्तव्याः शत्रवः शत्रुकर्शन ।
पुरा युद्धाद् बलाद्वाऽपि न कुर्वन्ति यथा हितम् ॥ ८४ ॥

ते वयं पाण्डवधनैः सर्वान् सम्पूज्य पार्थिवान् ।
यदि तान् योधयिष्यामः किं वा नः परिहास्यति ॥ ८५ ॥

अहीनाशीविषान् क्रुद्धान् दंशाय समुपस्थितान् ।
बद्ध्वा कण्ठे च पृष्ठे च कः समुत्स्रष्टुमर्हति ॥ ८६ ॥

आत्तशस्त्रा रथगताः कुपितास्तात पाण्डवाः ।
निश्शेषान् नः करिष्यन्ति क्रुद्धा ह्याशीविषा यथा ॥ ८७ ॥

सन्नद्धो ह्यर्जुनो यातो विवृत्य परमेषुधीः ।

गाण्डीवं मुहुरादत्ते निशश्वास नराधिप ।
निरिक्षते गदां गुर्वीं समुद्यम्य वृकोदरः ।। ८८ ।।

स्वरथं योजयित्वाऽऽशु निर्यात इति नः श्रुतम्।(०१)
नकुलः खड्गमादाय चर्म चाप्यर्धचन्द्रवत् ।। ८९ ।।

सहदेवश्च राजा च चक्रुराकारमिङ्गितैः ।। ९० ।।(०२)

ते त्वास्थाय रथान्सर्वे बहुशस्त्रपरिच्छदान्।

अभिघ्नन्तो हयान्राजन्(रथव्रातान्) सेनायोगाय निर्ययुः ।। ९१ ।।(०३)

न क्षंस्यन्ते तथास्माभिर्जातु विप्रकृता हि ते।
द्रौपद्याश्च परिक्लेशं कस्तेषां क्षन्तुमर्हति ।। ९२ ।।(०४)

पुनर्दीव्याम भद्रं ते वनवासाय पाण्डवैः।
एवमेतान्वशे कर्तुं शक्ष्यामो पुरुषर्षभ ।। ९३ ।।(०५)

ते वा द्वादश वर्षाणि वयं वा द्यूतनिर्जिताः।
प्रविशेम महारण्यमजिनैः प्रतिवासिताः ।। ९४ ।।(०६)

---

(०१) निरीक्षते क्षत; क्षतिः क्षन्वै क्षंस्तु) गदां गुर्वी समुद्यम्य वृकोदरः (३) स रथं (Forस्वरथं) तु १०० (For आ शु) स्वयं रथं योजयित्वा; (४)निर्यात इव; ता इति; तयति; नः श्रुतः विश्रुतः;.

(०२) (२) वा (For च )( अ) प्यथ चन्द्रकं ( अ) प्यर्धचन्द्रवत् (०कं) द्व्यष्टचन्द्रकं व्येष्टं; (४) चकाराकारम् नान्यमाकारम् (For चक्रुराकारम्); पृच्छतः ऋच्छतः हृच्छयाः ईहितैः इङ्गितैः.

(०३) (१) त्वादाय; आस्थाय (त्वास्थाय); सर्वान् (For सर्वे); (२) बहुशस्त्र ( ०शः स)-परिच्छदाः परिग्रहान्; परिग्रहाः, बहुशः सुपरिग्रहान् (३) अभिघ्नन्ते; घ्नको; रथवृतान् रथाब्राजन्; हयात्राजन्; जवो (जके) नाश्वान् (For रथव्रातान्); (४) सैन्य सेना.

(०४) (१) न क्षमन्ते; निक्षप्यन्तिः ने कृष्यते; न क्षस्य(स्यं)ते; न क्षम्यन्ते; न क्षाम्यन्ते; न क्षमास्ते (For न क्षंस्यन्ते); यथा (For तथा ); (२) ये तु; जात-;जाता (For जातु); विप्रकृताकृते; कृतानि ते; कृते हि ते; कृतास्तु ते। विप्रकृताः (३) तं; तु(For च) (४) अर्हसि;.

(०५)(३) एतद् (For एतान् ); वशी (वशं) कर्तु, (४) शक्यामो; पुरुष (For भरत );.

(०६) (१) ततो (For ते वा ); (२) वयं द्यूतविनिर्जिताः (३) प्रविशामो; शाम; निवसाम; प्रविवेश; शेयुर्

त्रयोदशं च सजने अज्ञाताः परिवत्सरम्।

अज्ञातसात् पुनर्द्यूतमिदं कुर्वन्तु पाण्डवाः ।।

लक्षालङ्कारः-अज्ञातसात्पुनर्द्यूतम् इत्यत्र तथा पूर्वोक्तप्रकारेण एकं वर्षं अज्ञातसात् सर्वे अज्ञाता भूत्वा निवसेम । अतः पुनर्द्यूतं प्रवर्ततामिति योजना ।

ज्ञाताश्च पुनरन्यानि वने वर्षाणि द्वादश।(०१)
निवसेम वयं ते वा तथा द्यूतं प्रवर्तताम् ।। ९५ ।।

अक्षानुप्त्वा पुनर्द्यूतमिदं कुर्वन्तु पाण्डवाः।(०२)
एतत्कृत्यतमं राजन्नस्माकं भरतर्षभ ।। ९६ ।।(०३)

अयं हि शकुनिर्वेद सविद्यामक्षसम्पदम् ।। ९७ ।।(०४)

दृढमूला वयं राज्ये मित्राणि परिगृह्य च ।
सारवद्विपुलं सैन्यं सत्कृत्य च दुरासदम् ।। ९८ ।।(०५)

ते च त्रयोदशं वर्षं पारयिष्यन्ति चेद्व्रतम्।

---

(For ०शेम ); महारण्ये; (४)परिवारि ( सि) ताः (For प्रतिवा० );रौ(कौ )रवाजिनवाससः;.

(०१) (१) त्रयोदशे; ०दशश् (For दशं ); तु (For च ); सज्जेन; स्वजने; नगरैर्; सुजनैर्; स्वजनैर् (For सजने ); सजनेन; (अ) प्य- विज्ञाताः (For च सजने ); (२) ह्यज्ञाताः; ()प्यज्ञात्ताः (For अज्ञाताः ); प्रतिवत्सरं; परि उपरि वने च परिवत्सरे; (३)विज्ञाताः; ज्ञाताश्चेत् (For ज्ञाताश्च); पुनरान्यानि; (४) वर्षाणि द्वादशैव तु; वने वर्ष त्रयोदश.

(०२) (१) निवसामो, निवसाम; निवप्सेम; ते व; तं वा (For ते वा ); (२) ततो (For तथा ); (३) अक्षाणि (For अक्षान्), उद्या (उत्वा ); यूतमिदं (द्यूं, यथा); (४)इति; एते; पुनर् (For इदं ); कुर्वन्तु; दिव्यन्तु (For दीव्यन्तु );.

(०३) (१)कृत्येतमं;कृत्यतरं; कृततमं.

(०४) (१) अहं (For अयं ); तु (For हि ); (२)सुविद्याम्; निकृत्याम् (For सविद्याम्); अक्षसंविदं (०दां);सम्भवां (वं );.

(०५) (१) धृत (For दृढ० ); विगतारिबला राज्ये; (२)प्रतिगृह्य (For परि ); (३) सारं० वा (For सारवद् ); (४)सत्कृतं; तत्कृत्य (For सत्कृत्य); तुरासदं (For दुरा ).

जेष्यामस्तान्वयं राजन्रोचतां ते परन्तप ।। ९९ ।।(०१)

धृतराष्ट्रः

तूर्णं प्रत्यानयस्वैतान्कामं व्यध्वगतानपि।
आगच्छन्तु पुनर्द्यूतमिदं कुर्वन्तु पाण्डवाः ।। १००।।(०२)

वैशम्पायनः

ततो द्रोणः सोमदत्तो बाह्लीकश्चैव गौतमः।
विदुरो द्रोणपुत्रश्च वैश्यापुत्रश्च वीर्यवान् ।। १०१।।(०३)

भूरिश्रवाः शान्तनवो विकर्णश्च महारथः।
मा द्यूतमित्यभाषन्त शमोऽस्त्विति च सर्वशः ।। १०२ ।।(०४)

५७ द्युस्र यथोपजोषं वसतां पुनर्यूतप्रवृत्तये ।
(०जोषमासीनाः; यूतप्रवर्तने; पूतं प्रवर्तये;

अकामानां च सर्वेषां सुहृदामर्थदर्शिनाम्।
अकरोत्पाण्डवाह्वानं धृतराष्ट्रः सुतप्रियः ।। १०३ ।।(०५)

अथाब्रवीन्महाराज धृतराष्ट्रं जनेश्वरम्।

---

(०१) (१) तु; वा (For च ); त्रयोदशं (श) वर्षं; (२)धारयिष्यन्ति; पाल; वार (For पार); तद्; ते नो (For चेद् );भुजं; गृहं; ध्रुवं; कृतं; द्रुतं; बुवं (For व्रतम् ); जहामस्तान्सुखं राजन्रोचते परमं तप ( तव ).

(०२) (१) तूर्ष्णीं (For तूर्णं ); प्रत्यानयं (य) तु; ०यनन्तु; (ए) नान् (For (ए) तान् ); (२)अध्व०; व्यध्व इन्द्रप्रस्थगतानपि; (४) इह (For इदं ); दीव्यन्तु (For कुर्वन्तु );.

(०३) (१)समदत्तो (For सोम ); (२) बाह्लिकश्च; (अ) थ गौतमः; (ए) व गौतमः (सत्तम ); (३) कृपश्च (For विदुरो ); (४) वश्याः; वेश्या (For वैश्या);.

(०४)(२)महाबलः (For रथः); (३) भाषन्त; भाषन्ते (अ) भाष्यन्त; (अ) भाषन्तः (For (अ)भाषन्य) (४) ()स्तीति (For ऽस्त्विति );भारत (For सर्वशः );.

(०५) (१)अवमानाच्च सर्वेषां; (२) सुकृताम् (For सुहृदाम् ); अर्थदर्शितां; अनुदर्शिनां; सर्वद; अथ दर्शितं; (४) धृतराष्ट्र ष्ट्रं सुतः.

पुत्रहार्दाद्धर्मयुक्ता गान्धारी शोककर्षिता ।। १०४ ।।[०१]

गान्धारी-

जाते दुर्योधने क्षत्ता महामतिरभाषत।
नीयतां परलोकाय साध्वयं कुलपांसनः ।। १०५ ।।[०२]

व्यनदज्जातमात्रो हि गोमायुरिव भारत।
अन्तो नूनं कुलस्यास्य कुरवस्तन्निबोधत ।। १०६ ।।[०३]

**मा निमज्जीः स्वदोषेण महाप्सु त्वं हि भारत ।**

मा बालानामशिष्टानामभिमंस्था मतिं प्रभो।
मा कुलस्य क्षये घोरे कारणं त्वं भविष्यसि ।। १०७ ।।[०४]

बद्धं सेतुं को नु भिन्द्याद्धमेच्छान्तं च पावकम्।
शमे स्थितान्को नु पार्थान्कोपयेद्भरतर्षभ ।। १०८ ।।[०५]

---

(०१) वैशं० उ ( वैशं०); (१) महाप्रज्ञ (०ज्ञा) राजं; राजन्;तेजा(For ०राज ); (२) जनप्रियं (For जनेश्वरम् ); (३) पुत्रस्नेहाद्; पुनस्तदा (For पुत्रहार्दाद् ); धर्मपूर्वं; युक्ता; पत्नी शीला (For ०युक्तं); पुत्रहेतोर्विमुह्यन्तं; पुत्रहा दीर्घमायुक्ता; (४) चैव मूर्छिता; शोकमूर्छिता; शोककर्षिता;.

(०२) गान्धार्युवाच (गान्धारी) (२) यथामतिर् (For महा ); (३) यम (For पर); (४) कुलपांसुनः; पांसमःपांशनः;.

(०३) (१)अनद; अदद० (For व्यनद ); (ऽ)पि; (ऽ)यं (For हि ); (२) भाषत; विस्वरं(For भारत);
(३) अतो (For अन्तो ); (४) सं (For तन्) तन्निबोधत भारत (ताः);.

(०४) (१) मा अशिष्यानाम् (For ०ष्टानाम्) बालानामवि(व) शिष्टानाम्; अबा(अबि) लानां विशिष्टानाम्
(२) अति (नि) संस्था; अतिमंस्था; मावमंस्था (स्थाम्) (For अभिमंस्था) इति (For मतिं) मतिं मे स्था इति प्रभो; मतिमास्थाय वै प्रभो; मा मते तिष्ट वै प्रभो; मातिष्टा इति वै प्रभो (३) क्षये घोरं; (For क्षये धोरे)
(४) कारणा(त्) (For णं) च (For त्वं) भविक्ष्यति; नरेन्द्र भूः ( भाः; भोः) (For भविष्यसि).

(०५) (१) अलं (For बद्धं); नु को को न; भिद्यात् विद्यात् बद्धं च सेतु को भिद्यात्
(२) शमेत्; धूमेत् धर्मेत्; धर्मे; धमेत् हुताशनं ०नः ० (For च पावकम् );
(३) समे; शमं (For शमे ); वृतः; स्थितान् (For धृतान्); को नु (For पुनः); शमावृतान्पाण्डुपुत्रान्
(४) भरतर्षभ; को हि भारत; को नु पार्थिव.

स्मरन्तं त्वामाजमीढ स्मारयिष्याम्यहं पुनः।
शास्त्रं न शास्ति दुर्बुद्धिं श्रेयसे चेतराय च ।। १०९।।[०१]

न वै वृद्धो बालमतिर्भवेद्राजन्कथश्चन।
त्वन्नेत्राः सन्तु ते पुत्रा मा त्वां दीर्णाः प्रहासिषुः ।। ११०।।[०२]

लक्षालङ्कारः-त्वन्नेत्रा इत्यत्र त्वन्नेत्राः त्वमेव नेता प्रेरको येषां ते तथोक्ताः जीर्णाः नष्टाः ते पुत्राः त्वां मा प्रहासिषुः 'ओहाक् त्यागे' इति धातोः लुङि बहुवचनम् मा त्यजन्त्वित्यर्थः ।

तथा ते न कृतं राजन्पुत्रस्नेहान्नराधिप ।
तस्य प्राप्तं फलं विद्धि कुलान्तकरणाय ह ।[०३]
तस्मादयं मद्वचनात्त्यज्यतां कुलपांसनः ।*

शमेन धर्मेण (परस्य बुध्या)नयेन युक्ता

या ते बुद्धिः सास्तु ते मा प्रमादीः।

प्रध्वंसिनी क्रूरसमाहिता श्रीः
मृदुप्रौढा गच्छति पुत्रपौत्रान् ।। १११ ।। [०४]

लक्षालङ्कारः-प्रध्वंसिनी इत्यत्र क्रूरसमाश्रिता क्रूरेषु मर्त्येषु समाश्रिता श्रीः सम्पत् प्रध्वंसिनी

---

(०१) (१) स्मरंश्च त्वम्; स्मरन्त्यहम्; स्मरन्ति त्वाम्; सर्वं तु त्वाम्; विस्मयं त्वाम् (For स्मरन्तं त्वाम्) त्वा; च (For त्वाम्) आजमीढं; (आ) जमीढेदं; त्वाजमीढं (ढ) (For आजमीढ);

(२) स्मरयि; तत् (For (अ) हं) (३) शास्त्रं तु (नु); शास्त्रं च; शास्त्रानु शस्त्रं तु; न शास्त्रं शास्त्रशास्ता दुर्बुद्धे (०द्धि;) (४) निश्चयाय वा (च ; वै);चे(ने) तराय वा ( च); ते(वेत) रोथ वा(For वेतरोय वा).

(०२) (१) बाल इति; बालमिति (For मतिर्) (२) भवद्; भवे; राजा (For राजन् );

(३) त्वन्नेत्रं त्वां तु ते पुत्रो; (४) मा चा; नात्मा; मा वा; मा ते; मत्वा; मा त्वां जीर्ण; हीनं; राजन्; चीर्णाः; दीनां ( ना); जीर्णाः; प्रशा (रा) सिषुः; प्रभाषत; प्रभासिषुः;

८८१४ तस्मादयं मद्वचनात्त्यज्यतां कुलपांसनः ।.

(०३) (१) अ )नेन (For ते न ); (२)स्नेहं (For स्नेहान्); महामते; महात्मनः; सहिष्यसि For नराधिप (३)तस्मिन्; तस्मात् (For तस्य ); महाघोरं (For फलं विद्धि); यत्;हि; वै; तत् (For ह ); (४)कुलातं विद्धि भारत.

(०४) (१) समेन; श्रुतं च; श्रुतेन; शमेण (For शमेन ); धर्मस्य (For धर्मेण ); परस्य बुध्यता; नयेन

**तस्यैव नाशकरी । मृदुप्रौढा मृदुभिः शान्तैः प्रकर्षेण ऊढा अङ्गीकृता श्रीः सम्पत् पुत्रपौत्रपर्यन्तं स्थिरीभवतीत्यर्थः ।**

वैशम्पायनः-

अथाब्रवीन्महाराजो गान्धारीं धर्मदर्शिनीम् ।। १११ ।।

धृतराष्ट्रः-

अन्तः कामं कुलस्यास्तु न शक्नोमि निवारितुम्।(०१)
यथेच्छन्ति तथैवास्तु प्रत्यागच्छन्तु पाण्डवाः।
पुनर्द्यूतं च कुर्वन्तु मामकाः पाण्डवैः सह ।। ११२ ।।(०२)

**अस्मिन् पर्वणि ६७ अध्याये ११२ श्लोकाः सन्ति**

अनुद्यूतपर्वणि(२) **द्वितायोऽध्यायः ।**

**इति श्रीमहाभारते शतसाहस्त्र्यां वैयासिक्यां सहितायां सभापर्वणि अनुद्यूतपर्वणि गान्धारीवाक्ये पञ्चसप्ततितमो**ऽध्यायः।।६७।।

# ६८. अष्टषष्टितमोऽध्यायः

श्रीमन्महाभारततात्पर्यनिर्णये एकविंशाध्याये

---

युक्ता (सूक्ता; युक्ताद्); परेण युक्ता; जानाति बुद्ध्या; शमेन युक्ता (For परस्य बुध्या); (२) जाता; या ते (या तेन); या सा (For जाता ); शास्तु; यास्तु (For सास्तु); साश्नुते (For सास्तु ते); प्रतीता; प्रमादीः (०दी); प्रदीपाः; प्रतीपा मा वास्तु ते बुद्धिरेषा प्रतीपा; बुद्धिस्तु या ते प्रतिदीव्यते (३)प्रध्वंसनी; क्रूरस(स ) माशि (For क्रूरसमा हिता) श्री; (४) मृदुप्रौढान्; मृदौ प्रौढा; मृदुः प्रौढा; मधुप्रौढा; प्रौढा यच्छति (For ग) ०पौत्रं (For ०पौत्रान् ); (सभापर्वणि अनुध्यूते);.

(०१) (१)वैशं उ( वैशं ) ततो (For अथा)० महाप्राज्ञां; राज (For ०राजो ); (२) धर्मचारिणीं; तत्वदर्शि( ०र्शं )नीं; (३) अन्तो नूनं; अन्तकालं ( मं); अतः कामं; अन्तं कामं; सुतस्य (For कुलस्य ); (४) शक्नोमि; शक्यामि; शक्यं हि (For शक्ष्यामि ); निवर्तितुं ( न सेवितुं); निषेधितुं;.

(०२) (१) यथेप्सितं; यदिच्छति, यबच्छसि; यथेच्छति (For यथेच्छन्ति); (आ) शु (For (अ) स्तु ); (३) च; तु (For प्र); कुर्वन्ति (For कुर्वन्तु); (४) कुरवः (For मामकाः); पाण्डवा मामकैः सह; मामकाः पाण्डवाः सह; अनुध्यूत; पुनर्यूत; धयूत पुनर्धूतप्रसङ्गः ( निश्चयः );.

दुर्योधनानन्तरजो जगाद तातं निजं पापकृतां प्रधानः।।३७३।।

समस्तपाण्डवश्रियं समागतामहो पुनः ।
व्यमोचयो वृकोदराद् वधश्च नो ध्रुवो भवेत् ।।३७४।।
अतः पुनश्च पाण्डवान् समाह्वयस्व नः कृते ।
पुनश्च देवनं भवेज्जिताः वनं प्रयान्तु च ।।३७५।।
तेनोक्तः स तथा राजा पाण्डवान् पुनराह्वयत् ।
पुनः पित्रा समाहूतो देवनाय युधिष्ठिरः ।
भ्रातृभिर्वार्यमाणोऽपि कृष्णया चाऽगमत् सभाम्।।३७६।।
द्वादशाब्दं वने वासमज्ञातं त्वेकवत्सरम् ।
वासं प्रसिद्धनृपतेः पुरे नैवातिदूरतः ।।३७७।।
कृष्णायाः पाण्डवानां वा दर्शनेऽज्ञातवासिनाम् ।
एकस्यापि समस्तानां द्वादशाब्दं पुनर्वनम् ।।३७८।।
वत्सराज्ञातवासं च त्यागेऽप्युक्तविधेस्तथा ।
दुर्योधनः पणं चक्रे बुद्ध्या दुःशासनोक्तया ।।३७९।।
गान्धारेण पुनश्चाक्षहृदयज्ञेन धर्मजः ।
पराजितो वनं यातुमैच्छत् सभ्रातृको यदा ।।३८०।।
तदा ननर्त पापकृत् सुयोधनानुजो हसन् ।
वदंश्च मारुतात्मजं पुनःपुनश्च गौरिति ।।३८१।।
उवाच च पुनः कृष्णां नृत्यन्नेव सभातले ।
अपतिर्ह्यसि कल्याणि गच्छ दुर्योधनालयम् ।।३८२।।
एतेऽखिलाः षण्ढतिलास्तमोऽन्धं
प्राप्ता न चैषां पुनरुत्थितिः स्यात् ।
इति ब्रुवाणोऽनुचकार भीमं

तदाऽहसन् धार्तराष्ट्राश्च सर्वे ।।३८३।।
तदाऽकरोद् भीमसेनः प्रतिज्ञां
हन्ताऽस्मि वो निखिलान् सङ्गरेऽहम् ।
इतीरिते शरणं द्रोणमेव जग्मुः समस्ता धृतराष्ट्रपुत्राः।।३८४।।
यत्र द्रोणस्तत्र पुत्रस्तत्र भीष्मः कृपस्तथा ।
न चात्येति गुरून् भीम इति तं शरणं ययुः ।।३८५।।
अब्रवीद् धार्तराष्ट्रांश्च द्रोणो विप्रोऽपि सन्नहम् ।
सपुत्रः सकृपः शस्त्रं ग्रहीष्ये भवतां कृते ।।३८६।।
रक्षणे भवतां चैव कुर्यां यत्नं स्वशक्तितः ।
न तु भीमाद् रक्षितुं वः शक्तः सत्यं ब्रवीम्यहम्।।३८७।।
ततो ययुः पाण्डवास्ते सभाया
वनाय कृष्णासहिताः सुशूराः ।
गत्याऽनुचक्रे युवसिंहखेल-
गतिं भीमं धार्तराष्ट्रोऽपहस्य ।।३८८।।
दृष्ट्वा सभाया अर्द्धनिष्क्रान्तदेहो
व्यावृत्य भीमः प्राह संरक्तनेत्रः ।
ऊरुं तवान्यं च रणे विभेत्स्ये
इत्युक्त्वाऽसौ निर्गतोऽसत्सभायाः ।।३८९।।
प्रयाताननु तान् कुन्ती प्रययौ पुत्रगृद्धिनी ।
रोरुद्यमानां विदुरः स्थापयामास तां गृहे ।
प्रणम्य तां ययुः पार्थाः सकृष्णाः शीघ्रगामिनः ।।३९०।।
युधिष्ठिरोऽवाग्वदनो ययौ न क्रोधचक्षुषा ।
दहेयं कौरवान् सर्वानिति कारुणिको नृपः ।।३९१।।
उद्धृत्य बाहू प्रययौ बाहुषाली वृकोदरः ।
आभ्यामेवाखिलाञ्छत्रूञ्छक्तो हन्तुमहं त्विति ।।३९२।।

अबद्धकेशा प्रययौ द्रौपदी सा सभातलात् ।
मुक्तकेशा भविष्यन्ति धार्तराष्ट्रस्त्रियस्त्विति ।।३९३।।
वर्षन् पांसून् ययौ पार्थ इत्थं शत्रुषु सायकान् ।
वर्षयानीत्यभिप्रायः परमास्त्रविदां वरः ।।३९४।।
यमाववाङ्मुखौ यातौ नावयोः शत्रवो मुखम् ।
पश्यन्त्वस्यामवस्थायामित्येव धृतचेतसौ ।।३९५।।
प्रेतसंस्कारसूक्तानि पठन् धौम्योऽग्रतो ययौ ।
हतेषु धार्तराष्ट्रेषु मया कार्याः क्रिया इति ।।३९६।।
तानथानुययुः सूता रथैः परिचतुर्दशैः ।
सूदाः पौरोगवाश्चैव भृत्या ये त्वाप्तकारिणः ।।३९७।।
ततस्ते जाह्नवीतीरे वने वटमुपाश्रिताः ।
न्यषीदन्नागतान् दृष्ट्वा समस्तान् पुरवासिनः ।।३९८।।
ततस्तु ते सर्वजगन्निवासं नारायणं नित्यसमस्तसद्गुणम् ।
स्वयम्भुशर्वादिभिरर्चितं सदा भक्त्याऽस्मरन् भक्तभवापहं प्रभुम् ।।३९९।।

## 02- 07- 68

**निजनगरं गच्छतो युधिष्ठिरस्य मध्येमार्गंदूताह्वानेन पुनर्नीवृत्त्य द्यूतसभाप्रवेषः ।। १ ।। अनुद्यूतेऽपि युधिष्ठिरस्य शकुनिना पराजयः ।। २ ।। प्रतिषिद्धस्यापि युधिष्ठिरस्य धृतराष्ट्रानुज्ञया पुनर्द्यूते प्रवृत्तिः पराजयश्च ।।**

**वैशम्पायनः**

ततो व्यध्वगतं पार्थं प्रातिकामी युधिष्ठिरम्।

उवाच वचनाद्राज्ञो धृतराष्ट्रस्य धीमतः ।। १ ।।[०१]

लक्षालङ्कारः-ततो व्यध्वगतम् इत्यत्र विशेषेणाध्वगतं व्यध्वगतं बहुदूरगतमित्यर्थः ।

उपास्तीर्णा सभा राजन्नक्षानुप्त्वा युधिष्ठिर ।**
एहि पाण्डव दीव्येति पिता त्वाऽऽहेति भारत ।। २ ।।[०२]

युधिष्ठिरः

धातुर्नियोगाद्भूतानि प्राप्नुवन्ति शुभाशुभम्।
न निवृत्तिस्तयोरस्ति देवितव्यं पुनर्यदि ।। ३ ।।[०३]

अक्षद्यूते समाह्वानं नियोगात्स्थविरस्य च ।
जानन्नपि क्षयकरं नातिक्रमितुमुत्सहे ।। ४ ।।[०४]

वैशम्पायनः

इति ब्रुवन्निववृते भ्रातृभिः सह पाण्डवः।
जानंश्च शकुनेर्मायां पार्थो द्यूतमियात्पुनः ।। ५ ।।

**असम्भवे हेममयस्य जन्तो-**
**स्तथापि रामो लुलुभे मृगाय ।**
**प्रायः समापन्नपराभवाणां**
**धियो विपर्यस्ततरा भवन्ति ।।**[०५]

---

(०१) (१) क- ऽध्वानगतं । गते (For ततो) ह्यध्वगतं; (ऽ)प्यध्वगतं; (ऽ) ध्वनि गतं; व्यपगतं; गतान्पार्थान् (For गतं पार्थं); (२) प्रतिकामी; प्रातिगामी; कामि; (३) वचनं (For वचनाद् );.
(०२) (१) प्रातिकाम्युवाच; क- उपस्तीर्णा सभा । क- उपारुह्य सभां । उपास्तीर्णा ( र्णास्); उपस्तीर्ण उपागृह्य सभां राजन् (२) अक्षाणि; उद्ध्य; उत्वा; युधिष्ठिरं; (३) देव्येति; दी (दि) व्यस्व (For दीव्येति) (४) पिता त्वाह ( चाह; ह त्वा) नराधिप (पः) पिता त्वाहेति ( च) भारत;.
(०३)(२) शुभाशुभे; (३) न च वृत्तिम्; न निर्वृतिस् (४) वेदि( देवि )तव्यं; दिवितव्यं;.
(०४) (१) अक्षयुद्धे ( योग-) (For द्यूते ); महानासीन् (For समाह्वानं ); (२) नियोगा; तु (For च ); (३) च यत्क्षुद्रं (For क्षयकरं ); (४) नापि (For नाति-); जानाति त्त्यमुत्सहे नापि कामीतुमु;.
(०५)( भवानां;) (१)न्निव वृतो; (२) सह पाण्डवैः; सहितस्तदा (For सह पाण्डवः ); (३) स्म (For च);

**असम्भवे हेममयस्य जन्तोस्तथापि रामो लुलुभे मृगाय।**
**प्रायः समासन्नपराभवाणां धियो विपर्यस्ततरा भवन्ति।**

विविशुस्ते सभां तां तु पुनरेव महारथाः।
व्यथयन्ति स्म चेतांसि सुहृदां भरतर्षभाः ।। ६ ।।(०१)

यथोपजोषमासीनाः पुनर्द्यूतप्रवृत्तये।
सर्वलोकविनाशाय दैवेनोपनिपीडिताः ।। ७ ।।(०२)

**तानागतानभिप्रेक्ष्य कृपणं क्षिग्रमक्षवित्।**

**शकुनिः**

अमुञ्चत्स्थविरो यद्वो धनं पूजितमेव तत्।
महाधनं ग्लहं त्वेकं शृणु भो भरतर्षभ ।। ८ ।।(०३)

वयं वा द्वादशाब्दानि युष्माभिर्द्यूतनिर्जिताः।
प्रविशेम महारण्यं रौरवाजिनवाससः ।। ९ ।।(०४)

त्रयोदशं च सजने अज्ञाताः परिवत्सरम्।
ज्ञाताश्च पुनरन्यानि वने वर्षाणि द्वादश ।। १० ।।(०५)

---

(४) अयात् (For इयात्); पार्थे धूतप्रियात्पुनः;.

(०१) (१)ते तां सभायां तु; सभां रम्यां (For सभां तां तु); (२) बलाः (रथाः) (३) व्यथयन्तः (ता); व्यथयन्त (For यन्ति); च (For स्म); (४) भरतर्षभ; भः (For भाः);.

(०२) (१)यथोपयोगम्; जोषम् आसीनः; आनीताः (For आसीनाः); (२) द्यूतनिवृत्तयेः मवर्तयन्; विवृद्धये; चूतं प्रवर्ततां ( र्तिता); धूतं प्रवृत्तयः; घूतप्रवर्तथे( ने) (३) सर्व-लोको; (४) देवनेनोपपीडितः; देवेनोपमि ( नोरसि ) पीडिताः; दैवेनोपातिपीडिता; दैवेनापि निपीडिताः; दैवेन परि;.

(०३) (१) बद्धो (For यद्वो); (२) पूर्वजितं च; ऊर्जितमेवु विजितमेव (For पूजितमेव); तु (For तत्); (३)क- महाग्लहे धनं चैकं । क- ग्लहं त्विह । महाग्लहं महाख्यं तं; ग्लहाम्पहं; महानयं (For महाधनं ); धनं; पणं (For ग्लहं); त्वेके; चैकं (For त्वेकं); ग्लहस्वकं; ग्लहं त्वं कं (For ग्लहं त्वेकं); (४) भो (For मे);.

(०४) (१)वयं वा द्वादशाब्दानि; (२) सायुधा; अष्टाभिर् (For युष्माभिर् ); निश्चिताः (For निर्जिताः ); (३) प्रविशामो; प्रविवेश; शाम (For शेम );.

(०५) (१)तु (For च ); व्यजने; स्वजनैर् (नै); सुजनैर् स्वजने; सजनैर्; (अ)सजने; सदने (For सजने

अस्माभिर्निर्जिता यूयं वने द्वादश वत्सरान्।
वसध्व कृष्णया सार्धमजिनैः प्रतिवासिताः ।। ११ ।।[०१]

त्रयोदशं च सजने अज्ञाताः परिवत्सरम्।
ज्ञाताश्च पुनरन्यानि वने वर्षाणि द्वादश।

त्रयोदशे च निर्वृत्ते पुनरेव यथोचितम्।
स्वराज्यं प्रतिपत्तव्यमितरैरथ वेतरैः ।। १२ ।।[०२]

अनेन व्यवसायेन सहास्माभिर्युधिष्ठिर ।**
अक्षानुस्त्वा पुनर्द्यूतमेहि दीव्यस्व भारत ।। १३ ।।[०३]

अथ सभ्याः सभामध्ये समुच्छ्रितकरास्तदा।
ऊचुरुद्विग्नमनसः संवेगात्सर्व एव हि।[०४]

सभ्याः

अहो धिग्बान्धवानेतान् बोधयन्ति महद्भयम्।
बुद्ध्या बुध्येन्न वा बुध्येदयं वै भरतर्षभः ।। १४ ।।[०५]

**लक्षालङ्कारः-अहो धिग्बान्धवान् इत्यत्र महद्भयं यथा भवति तथा, एतान् पाण्डवान् बुद्ध्या**

---

); (२) प्रच्छन्नाः (For अज्ञाताः); (३) चेत् (For च ); (४)द्वादशाब्दानि कानने.

(०१) (१)वा वने, विजिता, निर्जिता (For वा जिता ); अस्माभिर्वाथ यूयं वा;
(२) वने (जिता) द्वादश वत्सरान् व्रजेयुः; वसेयुः; वसेत; वसन्त (For वसध्वं );
(४) अजनैः; अजितै (For अजिनैः ); परिवासिताः;०वारिताः;०कल्पिताः स्वजने० ०प्रतिवत्सरं );.

(०२) (१) (ऽ) थ; तु; नु (For च) निवृत्ते तु; निर्वृत्ते च; निवृत्ते (For निर्वृत्ते );
(३) स्वं राज्यं; प्रतिपद्यध्वम्; ०वर्तव्यम् (For ०पत्तव्यम् );
(४) चेतरैः (०नैः०) (For वेतरैः ); इतरेतरवेतरैः;.

(०३) (१)अक्षाणि (For अक्षान्); उह्या (For उस्त्वा ); (४) अभि (Forएहि।); दीब्याम; दिव्यस्व; पाण्डव (For भारत );.

(०४) वैशं उ समुत्थित (For ०च्छ्रित०) मा मैवं; संवेगाः(For संवेगात्) सर्वमेव हि).

(०५) सभ्या (For सभासद ); ऊचुः, (१)क-पाण्डवानेतान् मोहयन्ति क- बान्धवानेतान् क-

कुबुद्ध्या बोधयन्ति धिक् । भरतर्षभा वयं च बुद्ध्यन्ते कुबुद्धेरवसाने अबुध्यन्त तैरज्ञायन्त । वयं सर्वे एतेषां दुर्जनानां दृष्टिगोचरा जाताः । न तु पूर्वमिति भावः । यद्वा एतद्दुर्वाक्यफलं एते दुर्योधनादयः प्राक् अवबुध्यन्त अजानन्, अन्वभवन्नित्यर्थः । उपरि बुद्ध्यन्ते अनुभविष्यन्ति । भरतर्षभा वयं च बुध्यामहे परिपाकसमये द्रक्ष्याम इत्यर्थः ।

वैशम्पायनः

जनप्रवादान्सुबहूञ्छृण्वन्नपि नराधिपः।
ह्रिया च धर्मसंयोगात्पार्थो द्यूतमियात्पुनः ।। १५ ।।(०१)

जानन्नपि महाबुद्धिः पुनर्द्यूतमवर्तयत्।
अप्यासन्नो विनाशः स्यात्कुरूणामिति चिन्तयन् ।। १६ ।।(०२)

युधिष्ठिरः

कथं वै मद्विधो राजा स्वधर्ममनुपालयन् ।
आहूतो विनिवर्तेत दीव्यामि शकुने त्वया ।। १७ ।।(०३)

शकुनिः

---

पाण्डवानेतान्. एवं; नैवं; नैव; नूनं (For नैनं ); बान्धवाने (बन्धनानै तान् (For बान्धवा नैनं ); (२) मोह (For बोधं ); महाभयं; (३) बुद्ध्या बुध्येन्न ( बोध्यं न; युध्ये न; बुद्धेन; बुध्यं न) वा (चा) बुध्येत् (बुध्या); अबुध्यन्नथ वा बुध्यन्, बुद्ध्या बो( बु )ध्यं न बुध्यन्ति (ध्यन्ते; ध्यस्ति);बु (बो)ह्च बोध्यं न चाबुध्या (बोद्धन्ते); युध्या बोध्यं न बुध्यन्त; बुद्ध्याबुद्ध्यन्त बुद्ध्यन्ते; (४) स्वयं वो क्षयं हि, क्षयं वा; स्वयं वै; क्षमं हि; अयं च; अयं हि; वयं च (For स्वयं च) भरतर्षभ ( भः );.

(०१) (१)जनापवादान्; जनवादात्; जनप्रवाहाः; जनवादांश्च स (For सु); (२) श्रृण्वन्नपि (For इति श्रृण्वन् ); जनाधिपः; नराधिपाः; ०धिप; (३) ह्रियते; दूयाच्च; प्रियाच्च (For ह्रिया च ); धर्मसंयो गात्; योगाच्च; भङ्गाच्च; भावाच्च सङ्गार्थं; ह्रिया त्वधर्मसङ्गाच्च; (४) अयात् (For इयात् );.

(०२)(२)क- द्युतं प्रवर्तयत् । क- द्युतं विनाशकम् । ग - द्युतं व्यवर्तयत् । अमन्त्रयत्; अवर्तत; विनाशकं; प्रवर्तयत् (For अवर्त०) अक्षान्यूते पराङ्मुखान् (३)सदिव्यं सविनाशस्स्यात् कुरूणामित्यचिन्तयत् । ग- स चासन्नो। अथ यं ते; अप्या(था-;ध्य) सन्नो; अप्ययं नो; अद्य यं न; अव्ययं न (Forअप्ययं न ); अपि (सम्भावनायां ); विनाशं स्थात्; (४) अविचिन्तयन्; कदनं महत् (For इति चिन्त );.

(०३) (१)हि (For वै ); (२) उपपालयन्; अनुचिन्तयन् (For अनुपाल) (३) अहूतो; आहूते; आवृतो; नु निवर्तेत; विनिवर्तेयं; न निवर्तेत; (४) दिव्याम; दिव्यामि; दीव्यानि;.

गवाश्वं बहुधेनूकमपर्यन्तमजाविकम् ।
गजाः कोशो हिरण्यं च दासीदासाश्च सर्वशः।[०१]
एष वै ग्लह एवैको वनवासाय पाण्डवाः ।। १८ ।।

लक्षालङ्कारः-एष वै ग्लह एवैक इत्यत्र एषः गजाश्वादीनां त्याग एको ग्लहः । एकः वनवासाय गमनम् । एकेन सर्वक्षयेण एकेन वनवासाय गमनेन चेति पणद्वयेन दीव्यावेति पूर्वेणान्वयः ।

यूयं वयं वा विजिता वसेम वनमाश्रिताः ।। १९ ।।[०२]
त्रयोदशं च वै वर्षमज्ञाताः सजने तथा ।[०३]

अनेन व्यवसायेन दीव्याम पुरुषर्षभाः।
समुत्क्षेपेण चैकेन वनवासाय भारत ।। २०।।[०४]

वैशम्बपायनः-

एवं दैवबलाविष्टो धर्मराजो युधिष्ठिरः ।
भीष्मद्रोणौ वार्यमाणो विदुरेण च धीमता ।। २१ ।।

लक्षालङ्कारः-भीष्मद्रोणौ वार्यमाण इत्यत्र यौ भीष्मद्रोणौ ताभ्यां वार्यमाणः ।

युयुत्सुना कृपेणाथ सञ्जयेन च भारत
गान्धार्या पृथया चैव भीमार्जुनयमैस्तथा ।। २२ ।।

---

(०१) (१)गवाश्व, प; गजांश्च; गजाश्वं; गजाह्वं; (२) असङ्ख्येयम् (For अपर्यन्तम्); (३) तथा (For गजाः ); कोशं; कोषो (४) दासीदासाश्च ( दासीं दासं च ); भारत (For सर्वशः );.
(०२) (१) हित्वा (For एष ); ना; वै ( वो) (For नो ); ग्लाह; एकैको; एको वै (For एवैको ); (२) वनवासश्च (For वासाय ); पाण्डव; वा; (३) वापि जिता (For वा वि० ); (४) वत्स्यामो; त एव; निवसे (For वसेम ); विजने ( विजिता) वने (For बनमा० );.
(०३) (अथो; चैव (For च वै ); वर्षस्यम्; वर्षैकम्(For वै वर्षम् ); अज्ञात्वा (For अज्ञाताः); स्वजने; स्वजनैसू; सजनैम् (For सजने );).
(०४) (२)दीव्यामि; मो; व (For म ); पुरुषर्षभ; पुरुषर्षभाः ( भः) (For भरतर्षभ ); (३) समाक्षेपेण; समुत्क्षि०; समुत्कर्षेण; यैकेन; वैकेन;.

विकर्णेन च वीरेण द्रौपद्या द्रौणिना तथा ।
**सोमदत्तेन च तथा बाह्लीकेन च धीमता ।**
वायतेतीव सततं न च राजा नियच्छति ।। २३ ।।(०१)

एवं संवार्यमाणोऽपि कौन्तेयो हितकाम्यया ।
देवकार्यार्थसिद्ध्यर्थं मुहूर्तं कलिराविशत् ।। २४ ।।

आविष्टः कलिला राजन् शकुनिं प्रत्यभाषत ।
एवं भवत्विति तदा वननासाय दीव्यते ।। २५ ।।

प्रतिजग्राह तं पार्थो ग्लहं जग्राह सौबलः।
जितमित्येव शकुनिर्युधिष्ठिरमभाषत ।। २६ ।।(०२)

लक्षालङ्कारः-वार्यतेऽतीव सततम् इत्यत्र पूर्वोक्तैर्विदुरादिभिः धर्मराजः अतीव वार्यते । हितकाम्यया एवं संवार्यमाणोऽपि कौन्तेयो राजा देवकार्यार्थसिद्ध्यर्थं न नियच्छति द्यूतगतं मनो न नियमयति । वनवासाय दीव्यते शकुनये तत् वनवासाय गमनमेव पार्थः प्रतिजग्राह । तदा शकुनिः ग्लहं ग्लाह्यते अनेनेति ग्लहमक्षं जग्राह ।

**अस्मिन् पर्वणि ६८ अध्याये २६ श्लोकाः सन्ति**

**अनुद्यूतपर्वणि (३) तृतीयोऽध्यायः**

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि अनुद्यूतपर्वणि पुनर्युधिष्ठिरपराभवे षट्सप्ततितमोऽध्यायः।। ६८ ।।**

# ६९.एकोनसप्ततितमोऽध्यायः

## 02- 07- 69

---

(०१)(५) क- वार्यते चैव । ग- वारितोऽतीव ।.

(०२) (१)तत्; तान् (For तं ); वाक्यं (For पार्थो ); प्रतिज्ञाते तदा पार्थे; (२) गृहं; ग्लहां (For ग्लहं ); ग्लहं, सहं (अक्षं); अनुघृत; पुनर्धूत; द्यूत समाप्त; वनवासपण( ग्लह )बन्धः.

**वनाय प्रस्थितान् पाण्वान् प्रति दुश्शासनकृतापहासः ।। १ ।। पाण्वानां बहुप्रतिज्ञाकरणपूर्वकं धृराष्ट्रसमीपगमनम् ।। ३ ।। पाण्वान् प्रति विदुरवचनम् ।। ४ ।। दुःशासनकृतःपाण्डवाना मुपहासो भीमार्जुननकुलसहदेवानां शत्रुविघाताय प्रतिज्ञा**

**वैशम्पायनः**

ततः पराजिताः पार्था वनवासाय दीक्षिताः।
अजिनान्युत्तरीयाणि जगृहुश्च यथाक्रमम् ।। १ ।।(०१)

अजिनैः संवृतान्दृष्ट्वा हृतराज्यानरिन्दमान्।
प्रस्थितान्वनवासाय ततो दुःशासनोऽब्रवीत् ।। २ ।।(०२)

**दुश्शासनः-**

प्रवृत्तं धार्तराष्ट्रस्य चक्रं राज्ञो महात्मनः।
पराजिताः पाण्डवेया विपत्ति परमां गताः ।। ३ ।।(०३)

अद्यैव ते सम्प्रयाताः समैर्वर्त्मभिरस्थलैः।
गुणज्येष्ठास्तथा श्रेष्ठाः श्रेयांसो यद्वयं परैः ।। ४ ।।(०४)

---

(०१) ते पार्था मतिं चक्रुः (For चक्रुस्ते मतिं पार्थाः) किमु; वनं (For मतिं );ततः पराजिताः पार्था वनवासाय दीक्षिताः; (३) उतरीराजि (४) ते (For च); सुखं (For क्रमम्).

(०२) (२)पाण्डुपुत्रान्; हतं (For हृतं ); अरिन्दम; अर्निन्दितान (For अरिन्दमान्) (३) हस्तिनाद् (For प्रस्थितान्); (४) दुर्योधनो (For दुःशासनो).

(०३) (१) प्रवर्त्त; प्रवृद्दं(For प्रवृत्तं); धृत (For धार्तं); (२) चक्रं राज्ञं; राज्ञश्चक्रं; चक्रं राज्ञन्; चक्रंराज्यं; चक्रू राज्ञो(For चक्रं राज्ञो); चक्रं (तेजः); महात्मना (३) पराजिताः; परिभूताः (For पराभूताः); पाण्डवेया; पाण्डुसुताः (For पुत्रा) (४) परमाहताः (For परमां गताः); विपत्यं परमं गताः;.

(०४) (१)अद्यैव ते; अद्य वै (For अद्य देवाः); सम्प्रायाता; सम्प्रवृत्ताः; सं(सु) प्रसन्नाः (२) सर्वैर्; क्रमे (For समैर्); बन्धुभिर् (For वर्त्मभिर्); अच्छलैः (For अस्थलैः); समं धर्मिभिरच्छलैः; शनैर्वर्त्मभिरंशुलैः; सर्वैर्महर्षिभिः सह; समधैर्वर्त्मभिच्छलैः समयैर्वर्त्मभिश्चितैः सह सर्वैर्महर्षिभिः; सर्वे हात्य भिरच्छलैः; (३) गुणह्येष्ठास्; गुणश्रेष्ठास्; गुणैर्ज्येष्ठास्; गुणज्येष्ठां; वयं (For तथा) श्रेष्टा; द्वेष्टा (For ज्येष्ठा); (४) भूयासो; श्रेयांसो (For भू ); वरं (For वयं); परौ (For परैः);.

नरकं पातिताः पार्था दीर्घकालमनन्तकम्।
सुखाच्च हीना राज्याच्च विनष्टाः शाश्वतीः समाः ।। ५ ।।(०१)

धनेन मत्ता ये ते स्म धार्तराष्ट्रान्प्रहासिषुः।
ते निर्जिता हृतधना वनमेष्यन्ति पाण्डवाः ।। ६ ।।(०२)

लक्षालङ्कारः-धार्तराष्ट्रान् प्रहासिषुः इत्यत्र 'हसे हसने' इति धातोः प्रकर्षेण हासिषुः प्रहासिषुः अहसन्नित्यर्थः । 'बहुलं च्छन्दस्यमाङ्योगेऽपि' इति सूत्रात् अडागमाभावः ।

चित्रान्सन्नाहानवमुञ्चन्तु चैषां(च्य पार्था)
वासांसि दिव्यानि च भानुमन्ति।
विवास्यन्तां रुरुचर्माणि सर्वे
यथा ग्लहं सौबलस्याभ्युपेताः ।। ७ ।।(०३)

न सन्ति लोकेषु पुमांस ईदृशा
इत्येव ये भावितबुद्धयः सदा।
ज्ञास्यन्ति तेऽऽत्मानमिमेऽद्य पाण्डवा
विपर्यये षण्ढतिला इवाफलाः ।। ८ ।।(०४)

लक्षालङ्कारः-षण्डतिलाः स्नेहरहिततिलाः ।।

---

(०१) (१) नरके; नरकैः (For नरकं ); पतिताः (For पा); पार्थ, (२) अरिन्दमाः; अतन्द्रिताः; अनन्तरं (For अनन्तकम्); (३) विहीन; च हीन- (For च हीना) राष्ट्राच्च (For राज्याच्च ); (४) विहीनाः (For विनष्टाः);.

(०२) (१)धनेन (For वलेन); मत्तो मर्त्या (For मत्ता); ये च; एते; ये तु;ये वै (For ये ते); (अ) स्मान्; (अ) स्मै ( स्म); ये तस्मां; ह्येतेस्मान् (For ये ते स्म); (२) धार्तराष्ट्राः; प्रशासिषुः; अहासिषुः; बिभत्सि ( स्तु )षु; प्रभासिषुः; हत (For हत) (४) यास्यन्ति (Forएष्यन्ति);.

(०३) (१) चित्रान्सन्नान्; चित्रासनान्; चित्रासंनाहान्; चित्रान्तंनाभान्; चित्रान्सन्वाहान्; अवमुच्य; सर्वे; पार्थाः (For चैषां ); (२) दिव्यानि वस्त्राणि (For वा दि ); (३) निधास्यन्तां; निवत्स्यतां वा; निवास्य ( श्य) तां; वासस्यतां; विवास्यन्तां; निर्वास्यन्तां; निव; कुरु- (For रुरु ); वर्माणि; तानि; चैव (For सर्वे ); (४) ग्लह; ग्लहः; सौ( सो) बलसाभ्युपेताः; सौ ( स )बलेनाभ्युपेताः ( तः); सोबलस्याद्युपेताः;.

(०४) (१)वसन्ति (For न सन्ति ); ईदृश (For शा ); न सन्ति, लोकेषु ज्ञास्यन्ति

इदं हि वासो यदि वेदृशानां
मनस्विनां रौरवमाहवेषु ।
अदीक्षितानामजिनानि यद्वद्
बलीयसां पश्यत पाण्डवानाम् ।। ९ ।।(०१)

महाप्राज्ञः सौमकिर्यज्ञसेनः
कन्यां पाञ्चालीं पाण्डवेभ्यः प्रदाय।
सचाकार्षीद्वै दुष्कृतं ते हसन्ति
क्लीबाः पार्थाः पतयो याज्ञसेन्याः ।। १० ।।(०२)

**लक्षालङ्कारः-स चाकार्षीद्दुष्कृतम् इत्यत्र दुष्कृतं कर्तुमयोग्यं अकार्यमित्यर्थः । याज्ञसेन्याः पतयः क्लीबा इति ते येषां द्रौपदी दत्ता त इमे जना हसन्ति ।**

सूक्ष्मप्रावारानजिनानि तोषितान्

---

(२) इत्येवं ये; सं; इत्यब्रुवन्; एवं हि ये; इत्येवं (व) वै (For इत्येव ये );

(३) चात्मानम्; तन्मानम् (For तेऽऽत्मानम् ); इमे च; इहाद्य ( त्य); इमेत्य (For इमेऽद्य ); (४) विपर्ययं; विपर्ययस्ताः; विपर्यस्ताः; निरासिताः (For विपर्यये) खण्ड, शण्ड, षण्ड० (For षण्ढं ); यथा (For इव ); (अ) चलाः; (अ) पराः (For (अ) फलाः );

स्वयंवरेऽसौ स्थविरोऽपि मन्दधीर्वृथामतिः स्थविरो यज्ञसेनः .

(०१) (१) श्रियं; इदं; अलं (For अयं ); च; वि- (For हि ); वासोदयम्; वासो यदि; वासो महद्; वासोभवद्; भावो (वे) दयः; भागोदयः; भावो हृदयम्; वासोदयः चेदृ(दि) शानां; दृश्यमानो (For ईदृशानां ); वासो यदिवेदृशानां( यद् + इव + ई) (For वासोदय ईदृ); (२) कौरवा मा; कौरवाणां; कौरववाणां मा; रौरवमाहवेषु ( वेद्यः); रौरवमाभवेद्यत् (३) आदीक्षितानाम्; अदिक्षि; अनुजानि (For अजिनानि ); यद्वयं; युद्धाद्; युद्धे; यद्वा; बिभ्रतां यद्यद् यद्वद् (४) बलीयतां (For सा ); पश्यति; पश्यतु (For पश्यत);

पश्यतु वै भावितबुद्धयस्सदा स्वयंवरेऽसौ स्थविरोऽपि मन्दधीर्वृथामतिः सुप्रज्ञो यज्ञसेनः ।

महीक्षितां पश्यतां पाण्डवानां; यः (For ऽसौ );)

(०२) (१) महाप्रज्ञः; मन्दप्र( प्रा)ज्ञः; सौमकिर् (For सोमको) याज्ञसेनः; मूढचेताः; याज्ञसेनीं;

(२) रम्यां (For पाञ्चालीं ); (३) अपकर्षीद् अपाकार्षीद्; अकार्ष वै; स चाकार्षीद् (For अकार्षीद्वै ); वै; सुकृतं ( ते); दुष्कृतं); द्रुपदो दुष्करं (प्कृतं) तत् (For दुष्कृतं नेह सन्ति ); नेह ( नैव; न त्व-) किञ्चित, तेन ( नैव; ह) सन्ति; ते हसन्ति (For नेह सन्ति ); (४) याज्ञसेनी (For न्याः) नमन्ति ह्री वा याज्ञसेनी; न सन्ति क्लीबाः पतयो याज्ञसेनि;.

दृष्ट्वारण्ये निर्धनान् अप्रतिष्ठान् ।
कां त्वं प्रीतिं लप्स्यसे याज्ञसेनि
पतिं वृणीष्वेह यमन्यमिच्छसि ।। ११ ।।(०१)

**लक्षालङ्कारः-अजिनानिवोषितान् इत्यत्र उषितान् देशान्तरं गतान् भिक्षुकानिव अजिनान् 'अर्श आदिभ्योऽच्' इति वचनात् अजिनं रौरवाजिनं, तद्वत इत्यर्थः ।**

एते हि सर्वे कुरवः समेताः क्षान्ता दान्ताः सुद्रविणोपपन्नाः।
एषां वृणीष्वैकतमं पतित्वे न त्वां तपेत्कालविपर्ययोऽयम् ।। १२ ।।(०२)

यथाफलाः षण्ढतिला यथा चर्ममया मृगाः।
तथैव पाण्डवाः सर्वे यथा काकयवा अपि ।। १३ ।।(०३)

**लक्षालङ्कारः-यथा काकयवा इत्यत्र काकयवाः काकभाजनीभूतयवाः, यवाकारतृणविशेषा वा**

---

(०१) (१)सूक्ष्मा प्रावरणान्; सूक्ष्मप्रावारान् ( रानि) (For सूक्ष्मान्प्रा- वारान्); प्रवासान्; प्रचारान्; प्रवरान्; प्रावारान् अजिनानचोदितान्; अजिनानि वोचि( षि; दि) तान्; अजिनोत्तरीयान् (For अजिनानि चोदितान्); चोचितान्; चापि; चैव; चैवं ; चैत्रं; पोषितान् (For चोदितान् );

(२) हि त्वा (For दृष्ट्वा ); भ्रातृन् (For (अ) रण्ये); तीर्थतीरप्रतिष्ठान्; (For निर्धनानप्र ); सम्प्रति; निःप्रति; अप्रह ( दि);

(३) का त्वं ( त्वं; कान्तं ); लभ्यसे लप्स्यते; यास्यसे; प्राप्स्यसे (For लप्स्यसे) या ( य )ज्ञसेनी; भूयात्प्रीतिः कात्र ( का नु) पाञ्चालि भद्रे;

(४) त्वम्(For ग्रम्); यमिहान्वमि; (इ)हयमन्यमि०; (आ) यत हि मान्यमि; (अ) न्यमथो (तो) यमि ( यदि); (अ)थ हि यं त्वमि०; यदिहान्यमि०; - (अ) न्यमिहायमच्छसि;.

(०२) (१)एवं (For एते); (२) क्षान्ताश्च दान्ताः; कान्ताः क्षान्ताः (For क्षान्ता दान्ताः ); द्रविणो; सद्रविणो० (For सुद्रविणो );

(३) तेषां, एवं; एतेषां (For एषां); वृणुष्व- (अ)न्य तमं(For (ए) कतमं ); पतिं त्वं; पतित्वं; पतिं वै (For पतित्वे); एषा कृष्णे कतमम पतित्वे;

(४) न त्वा; न ते; मा त्वा ( त्वां); मत्वा (For न त्वां ); पतेः; (या) यात्; नयेत्; भवेत्; तपो; भजेत्; तपोत्; तपेत् कार्य (For काल);.

(अधिकं- सम्पश्यन्त्यास्तेऽजिनैः संवृताङ्गाः सन्दृश्यन्तां तेजिनैः; सन्दृश्यते ह्यजिनैः;).)

(०३) (१)शण्ढं, स्वण्ढ, षण्ड, खण्ड (For षण्ढ ); (२) चर्ममयो मृगः; चर्म मृगाः;

(४) लूनयवा; काकतिला; काका यथा; काकायवा; काकयथा; काकवया ( यो); इव; कपिः; बकाः;

।

किं पाण्डवांस्ते पतिनानुपास्य मोघः श्रमः षण्ढतिलानुपास्य ।

वैशम्पायनः-

एवं नृशंसः परुषाणि पार्थान् श्रावयद्धृतराष्ट्रस्य पुत्रः ।। १४ ।।(०१)

तद्वै श्रुत्वा भीमसेनोऽत्यमर्षी
निर्भत्स्योच्चैः सन्निगृह्यैव रोषात्।
उवाच चैनं सहसैवोपगम्य
सिंहो यथा हैमवतः शृगालम् ।। १५ ।।(०२)

भीमसेनः

क्रूर पापजनैर्जुष्टमकृतार्थं प्रभाषसे।
गान्धारविद्यया हि त्वं राजमध्ये विकत्थसे ।। १६ ।।(०३)

यथा तुदसि मर्माणि वाक्शरैरिह नो भृशम्।

---

इति (For अपि );.

(०१) (१)पाण्डवाः (For वान् ); ते; तं (For त्वं ); हि पतीन् (For पतितान्); उपाससे; उपासे, उपास्य; उपासि उपास्ते ( स्थे; स्ये); उपास्यौ; न यासि; उपास्यसे; (२) मोघश्रमः; मोघं फलं; षण्ड०, खण्ड०, शण्ड० शण्ढ० (For षण्ढं ); उपास्य हि; वैशं० उ; (३) एवन्दृशं वः; एवं नृशंसाः; पुरुषाणि; अश्रावयेद्वै; व्यश्रावयद् ( यं); अश्रावयेद्; विश्रावयन्; या ( य) श्रावयद्; आश्रावयद्.

(०२) (१)वैशम्पायनः ह्यमर्षी (For (ऽ) त्यमर्षी );
(२) संनिगृह्य; सं (तं) परिगृह्य(For तं निगृह्य );(इ)व; स्य (For (ए)व)
(३) उवाचैनं; उवाच चैनं; उवाच चेदं; उवाचैवं; उवाच चैव; उवाच चैवं; सहसोप (For सहसैवोप
(४) हेमवतः; भीमपतिः; भीमबलः ( लं); सृगालं; स्वकालं (For श्रृगालम्);.

(०३) (१)क्रूरं; क्ररः; कुरु (For क्रर) नरैर् (For ०जेनैर् ); दुष्टम्; युष्टम्; जुष्ट; दृष्टम्; जुष्टः (For जुष्टम्) क्रूरः पापजनेष्टस्त्वं; (२) अबद्धार्थं; असम्बद्धं; अप्रशस्तं; असम्बन्धं; अवत्धाथं कृतार्थस्त्वं; अकृतार्थं; अकृतार्थः; आकृतार्थं;
(३) अङ्गार-; गान्धारे (Forगान्धार); हीनं; हि त्वा (For हि त्वं ); गान्धारराजविद्याया;
गान्धारे विषयं याहि त्वं गान्धारविद्यया म्लेच्छभाषया । अथ वा गान्धारस्य शकुनेः विद्यया द्यूतविद्यया ।.

तथा स्मारयिता तेऽहं कृन्तन्मर्माणि संयुगे ।। १७ ।।(०१)

**ये च त्वामनुवर्तन्ते क्रोधलोभवशानुगाः।**
गोप्तारः सानुबन्धांस्तान्नेतास्मि यमसादनम् ।। १८ ।।(०२)

वैशम्पायनः

एवं ब्रुवाणमजिनैर्विवासितं
दुःशासनस्तं परिनृत्यति स्म।
मध्ये कुरूणां धर्मनिबद्धमार्गं
गौर्गौरिति स्माह्वयन्मुक्तलज्जः ।। १९ ।।(०३)

लक्षालङ्कारः-गौर्गौरिति स्माह्वयन् इत्यत्र गौः गोरूपपशुः । गोपालैः क्रियमाणशब्दविशेषो वा गौः ।

भीमसेनः

नृशंस परुषं वक्तुं शक्यं दुःशासन त्वया।
निकृत्या हि धनं लब्ध्वा को विकत्थितुमर्हति ।। २० ।।(०४)

---

(०१) (१) यदा (For यथा ); नुदसि; रुदसि (For तुदसि ); चर्माणि; क (म )र्माणि; (२) वाग्जवैर्; वाक्यैर्यद्; वाक्क्रूरैर् (For वाक्शरैर् ); (३) तानि; कथा; यथा (For तथा ); स्मरयिता; स्म रहिता (For स्मारयिता ); चाहं०; (अ) हं तु; मे ह (For तेऽहं ); (४) कृत्वा; तानि; हन्तुर्; कृतं; कृतन्; तं च; कृते (For कृन्तन् ); क्रूरकर्माणि ( कृन्तन्मर्माणि ); कर्माणि; मर्मणि (For मर्माणि).

(०२) (१) येन (For ये च ); ताम् (For त्वाम्); अनुमन्यन्ते (For वर्तन्ते ); (२) लोभमोह-; कालेन च; कामक्रोध-; क्रोधलोभ- (For कामलोभ- ); वशानुग; गं; (३) सानुबधास्ते; बन्धास्तान् (४) नेतास्मि(For नेष्यामि); यममन्दिरं;.

(०३) (१)निवासितं, प्रवासितं; विवासतं; विवासितुं; (२) दृष्ट्वाभिभूतं; दुःशासनस्तं (For दुखाभिभूतं); परिकृन्तति (For नृत्यति); (३) धर्मे (For मध्ये); धर्मनिषिद्धमनार्यं; धर्म्मनिषिद्धमार्य (वाक्ये; मार्ग); अनिषिद्धमार्गं; धर्मनिब( ष )द्धभावं (मार्यं); अनिबद्धभावः; (४) स्माह्वय; द्रौपदीं; ह्याह्वयन्; आह्वयन्; समाह्वय; त्यक्तलज्जः, स्पर्धयन्सः (For मुक्तलज्जः) लज्जा; गौर्गौरिति प्राह विमुक्तलज्जः; गोष्ठे यथा गौरिव बद्धरज्जुः;.

(०४) भीमः(For भीमसेनः) उवाच; (१) नृशंस्य; परुष; पुरुषं; क्रूर; वक्तुं; घोरं(For क्रूरं) (२)

मा ह स्म सुकृतां लोकान्गच्छेत्पार्थो वृकोदरः।
यदि वक्षो हि ते भित्त्वा न पिबेच्छोणितं रणे ।। २१ ।।(०१)

लक्षालङ्कारः-मा ह स्म सुकृतां लोकान् इत्यत्र सुष्ठु कुर्वन्तीति सुकृतः पुण्यकृतः तेषाम् ।

धार्तराष्ट्रान्रणे हत्वा मिषतां सर्वधन्विनाम् ।
शमं गन्तास्मि नचिरात्सत्यमेतद्ब्रवीमि ते ।। २२ ।।(०२)

वैशम्पायनः

तस्य राजा सिंहगतेः सखेलं
दुर्योधनो भीमसेनस्य हर्षात् ।
गतिं स्वगत्यानुचकार मन्दो
निर्गच्छतां पाण्डवानां सभायाः ।। २३ ।।(०३)

लक्षालङ्कारः-ततः स राजा इत्यत्र भीमसेनस्य रोषात् रोषं दृष्टान्तीकृत्य सरोषात् तद्रोषसमानरोषं स्वयमप्यनुकृत्य पाण्डवानां निर्गच्छतां सताम् ।

नैतावता कृतमित्यब्रवीत्तं
वृकोदरः सन्निवृत्तार्धकायः।

---

त्वेवं; उक्तं; शठ(For शक्यं) त्वया शक्यं (३) तु धनं; निधनं; (अ) पि धनं(For हि धनं) (४) अर्हसि (For ति) को विकत्थेत पण्डितः विकत्थितं .

(०१) (१) मा गां हि; मैव स्म; नैव स्म; मा स्म वै; हि स्व; महास्म; मा गन्ता; मा गमत् मा गा स्म; मा ह स्म, (२) अस्मि व्रजेत्; आछत् (For गच्छेत्); (३) युधि (For यदि ) वक्षो हि; वक्ष्यसि; भिक्ष्यसि; वक्षस्व (For वक्षसि); ते भित्वा भित्वा त्वां; हित्वा ते; यदि वक्षो विनिर्भिद्य; यदि निर्भिद्य वक्षस्ते; (४) तव; रुषा (For रणे );.

(०२) (१) धृतं (For धार्त); वशे कृत्वा (For रणे हत्वा ); (२) मिषधा; मिषतां देहिनां (For धन्विनाम्); क्रूरबुद्धीम्भनस्विनः; (३) समं; कामं (For शमं ); गच्छामि (For गन्तास्मि ); नचिरं; (४) कृत्यम् (For सत्यम्); एव; एवं (For एतद् ); भविष्यति;ते; वा (For वः).

(०३) (१)ततो; ततः स (For तस्य ); गताः; गतिः (For गतेः); सहेलं; सुरोषो; सखेलनं; सरोषो (For सखेलं); (२) रोषात् (For हर्षात्); (३) (अ) नुचरेन्; (अ) नुचचार (For (अ)नुचकार); (४) निर्गच्छन्तः; च्छता कौरवाणां; पाण्ड सभायां;.

शीघ्रं हि त्वां निहतं सानुबन्धं
संस्मार्याहं प्रतिवक्ष्यामि मूढ ।। २४ ।।(०१)

एवं समीक्ष्यात्मनि चावमानं
नियम्य मन्युं बलवान्स मानी।
राजानुगः संसदि कौरवाणां
विनिष्क्रामन्वाक्यमुवाच भीमः ।। २५ ।।(०२)

भीमसेनः

अहं दुर्योधनं हन्ता कर्णं हन्ता धनञ्जयः।
शकुनिं चाक्षकितवं सहदेवो हनिष्यति ।। २६ ।।(०३)

इदं च भूयो वक्ष्यामि सभामध्ये बृहद्वचः।
सत्यं देवाः करिष्यन्ति यन्नो बुद्धं भविष्यति ।। २७ ।।(०४)

लक्षालङ्कारः-यन्नो बुद्धं भविष्यति इत्यत्र बुद्धं बुद्धिस्थम् ।।

सुयोधनमिमं पापं हन्तास्मि गदया युधि।
शिरः पादेन चास्याहमधिष्ठास्यामि भूतले ।। २८ ।।(०५)

---

(०१) (१)कृत्यम्; क्षमम् (For कृतम्);तद्; तं दृष्ट्वा (For तं) (२) संनिवृत्तार्धकोपः; परिवरत्तार्धकायः; संनिवृतार्ध; संनिवृस्यार्ध भीम उ (३) हि त्वां; हत्वा; गत्वा (For हि त्वा); नियतं; निहत्य; विहितं (For निहतं); सानुबन्ध; (४) सस्मार्याहं; सभार्याहं; प्रवक्षामि; सम्प्रव( वे)क्ष्यामि ( प्रति); मूढं; मूढः;.

(०२) (१)वैशं० उ; एवं; ततः; एतं (For एतत्); वाचमानं ( नां); वाव, बाध, वाच्य चाव्य(For चाव ); (२) समानि; सुमानी (For स मानी); (३) राजानुजः ( दिकं) (For नृगः) (४) विनिष्टमन्, विनिक्रमन्; विनिःक्रम्यं; विनिष्क्रामन्; विनि-प्स्यन् भूयः (For भीमः);.

(०३) भीमसेन ( भीम) उ; हर्ता (For हन्ता) (३) तु (For च); (४) भवि (For हनि );.

(०४) (१)तु (For च); (२) महद्वचः; सुह्य; त्वहं वचः (For बृहद्वचः); (३) प्रशंसन्ति (For करिष्यन्ति) करिष्यन्ति वय पुनः द्वन्द्वं; युद्धे; बुद्धं (बुद्धिस्थं) (For युद्धं);.

(०५) (१) दुर्यो(For सुयो०); अहं; इदं (For हमं) (२) हर्तास्मि; गन्तास्मि(For हन्तास्मि ); (३)

वाक्यशूरस्य चैवास्य परुषस्य दुरात्मनः।
दुःशासनस्य रुधिरं पातास्मि मृगराडिव ।। २९ ।।(०१)

लक्षालङ्कारः-अस्य निरस्य ।।

अर्जुनः-

भीमसेन न ते सन्ति येषां वैरं त्वया सह ।
मत्ता गृहेषु सुखिनो न बुध्यन्ते महद्भयम् ।। ३० ।।(०२)

लक्षालङ्कारः-गृहेषु स्वान् सुखिनः मत्वा ।।

अर्जुनः

नवै वाच्यं व्यवसितं भीम विज्ञायतां सताम्।
इतश्चतुर्दशे वर्षे द्रष्टारो यद्भविष्यति ।। ३१ ।।

लक्षालङ्कारः-न वै वाच्यम् इत्यत्र सतां सज्जनानां व्यवसितं स्वमनसि निर्णीतं प्रमेयं वाच्यं न वै । किन्तु स्वयमेव विज्ञायतां फलकाले दृश्यताम् ।

भीमसेनः

दुर्योधनस्य कर्णस्य शकुनेश्च दुरात्मनः।
दुःशासनचतुर्थानां भूमिः पास्यति शोणितम् ।। ३२ ।।(०३)

---

चाहत्य; चैवास्य; तस्याहम्; न्यस्याहम्(For चास्याहम्); अस्य (निरस्य), (४) लोठ ( च-; ड, ठ) यिष्यामि; म( ग्र)थिष्यामीह; अधिष्ठानस्य(For ष्टास्यामि).

(०१) (१)वाक्यमूरस्य; वाक्यं शूरस्य; वाक्यक्रूरस्य (२) पुरुषस्य (For प ); (४) पास्यामि; पीतास्मि; मृगराजवत्.

(०२) (१) न वै; नैवं; नैतद्; न तु; ययोर् (For नैव ); वाच्या; वाच्यं; वाचो; वाचं, राजा (For वाचा ); व्यवसिनं; न चैव वाचावसितं; ननु नाम महत्कर्म; आवयोर्यद्व्यवसितं; (२) भीमं; विज्ञाय (प्य) तां (For विज्ञायते ); मतं; सभा (भसां; सभां); सताम् ययोर्वाचा व्यवहितं ); (३) एतच् (For इतश् ); (४) रोष्टारो; दृष्ट्वा नो (For द्रष्टारो); यच्छविष्यति;.

(०३) भीम ( भीमसेन) उ; (२) विशां पते; महात्मनः (For दुरात्मनः);.

अर्जुनः

असूनृतानां वक्तारं संहृष्टानां दुरात्मनाम् ।
भीमसेन नियोगात्ते हन्ताहं कर्णमाहवे ।। ३३ ।।(०१)

लक्षालङ्कारः-असूनृतानां वक्तारम् इत्यत्र 'अश्लीलं सूनृतं प्रिये' इत्यभिधानात् असूनृतानां न विद्यते सूनृतं येषां ते तथोक्ताः । संहृष्टानां दुरात्मनां वक्तारं कुमार्गवक्तारम्।

अर्जुनः प्रतिजानीते भीमस्य प्रियकाम्यया।
कर्णं कर्णानुगांश्चैव रणे हन्तास्मि पत्रिभिः ।। ३४ ।।(०२)

ये चान्ये प्रतियोत्स्यन्ति बुद्धिमोहेन मां नृपाः।
तांश्च सर्वानहं बाणैर्नेतास्मि यमसादनम् ।। ३५ ।।(०३)

चलेद्धि हिमवान्स्थानान्निष्प्रभः स्याद्दिवाकरः।
शैत्यं सोमात्प्रणश्येत मत्सत्यं विचलेद्यदि ।। ३६ ।।(०४)

**न प्रदास्यति चेद्राज्यमितो वर्षे चतुर्दशे।**
दुर्योधनोऽभिसत्कृत्य सत्यमेतद्भविष्यति ।। ३७ ।।(०५)

---

(०१)अर्जुन उ; (१) असूयतारं; असूनृतानां ( रं); द्रष्टारं ( यन्तारं वक्तारं); द्वेष्टारं; वीराणां; शत्रुणां; वक्तारं (२) प्रसृष्टानां; प्रवक्तारं; प्रसृष्टारं; प्रशास्तारं प्रस्रष्टा० प्रसुष्टारं; प्रहृष्टारं ( नां); संहृष्टानां; प्रस्नष्टारं ( कर्तारं ); दुरात्मवान्; विकत्थनं; दुरात्मकं; त्मनाम् (४) हन्तास्मि (For हन्ताहं );.

(०२) (१)प्राह धर्मज्ञो (For प्रतिजानीते ); (२) प्रियमाहवे;प्री (प्र) ति काम्यया (For प्रियं ); भीमसेनस्य काम्यया; (३)कर्ण-; अहं (For कर्णं ); (४) हर्तास्मि (For हन्तास्मि ); सानुगान्; वज्रिभिः; मन्त्रिभिः (For पत्रिभिः).

(०३) (१)प्रतियुध्यन्ति (For योत्स्यन्ति) (२) मोहिताः; तान्नृपाः; नृपाः; मा नृपाः; मानवाः(For मां नृपाः ); बुद्धिमोहतमा नृपाः; मोहे महानृपाः; (३) तां स्वसर्वाम् असितैर्; सितैर् अहं स्थितैर्; शिवैर्; जितैर् (For शितैर्) तान्तर्वान्निशितैबाणैर् (४) नेष्यामि (For नेतास्मि ).

(०४) (१)बलाद् (For चलेद् ); (२) न तीव्रं; निःप्रभः निप्रभः (For निष्प्रभः ); (३) सौम्यं सोमात्; ओष्ण्यमग्नेः; (४) मन्दरो; तत्सत्यं (For मत्सत्यं ); च चलेद्यदि; त्वबलं त्विति; विचलेन्न हि; अचलं भवेत्-द्रष्टारो भूमिपालाः स्युरितो वर्षे चतुर्दशे ।.

(०५) (१) न चेत्प्रदास्यते राज्यम् (२) अतो (For इतो) वर्ष; वर्ष-(For बर्षे) त्रयोदशे (For चतुर्दशे );

वैशम्पायनः

इत्युक्तवति पार्थे तु श्रीमान्माद्रवतीसुतः।
प्रग्गृह्य विपुलं बाहुं सहदेवः प्रतापवान् ।। ३८ ।।(०१)

सौबलस्य वधं प्रेप्सुरिदं वचनमब्रवीत्।
क्रोधसंरक्तनयनो निःश्वसन्निव पन्नगः ।। ३९ ।।(०२)

सहदेवः

अक्षाणि मूढ दुर्बुद्धे गान्धाराणां यशोहर ।**
न प्रयुक्ता मया बाणास्त्वयैते समरे वृताः ।। ४० ।।(०३)

लक्षालङ्कारः-अक्षाणि मूढ इत्यत्र ते तव एतान्यक्षाणि अक्षाणि न । किन्तु समरे त्वया वृताः एते मया प्रयुक्ता बाणा एव अक्षाणीति योजना ।

यथा चैवोक्तवान्भीमस्त्वामुद्दिश्य सबान्धवम्।
कर्ताहं कर्मणस्तस्य कुरु कार्याणि सर्वशः ।। ४१ ।।(०४)

हन्तास्मि तरसा युद्धे त्वामेवेह सबान्धवम्।

---

राज्ञो धर्मसुतस्य वै (३) निः; नि; ()भि; ()यं; ()पि; ()ति (For हि) (४) कृत्यम्(For सत्यम्).

(०१) (१) च (For तु) (२) श्रीमन् (For मान्) माद्रीसुतस्तदा; मादतरीसुतोवदत् (For मादतरवतीसुतः).

(०२) (१)वध; वधे (For वधं) (४) निश्व (For निःश्व);.

(०३) सहदेव उ (सहदेवः) (१) त्वं (For यान्) अक्षात्मा पश्यसे मूढ; अक्षान्क्षिपसि दुर्बुद्धे; अक्षाणि मूढ(यानि)दुर्बुद्दे अक्षज्ञ (अक्षज्ञन्;अक्षा हि) मूढ दुर्बुद्धे;

(२) यशोहरः; (३) न ते(For नैते ); ( ऽ )क्षा निसितान् (ऽ) क्षा निसिता; (ऽ) क्षाणि शिता (For क्षा निशिता );शस्त्रास् (For बाणास् ); नैतेक्षान्निशितान्बाणान् -

(४) त्वयि नः; त्वयि ते(For त्वयैते ); धृताः; स्मृताः; वृथा; कृताः; वृताः.

(०४) (१)तथा (For यथा) (ए) व च; (ए) वेह (For चैव ); यथैबोवाच भीमस्त्वाम्; यथैवैभोक्तवान्भीमः

(२) त्वम्; सम्; ताम् (For त्वाम्) उद्दिश्य सहबान्धवं बान्धवं (स); सवान्धवः;

(३) कर्तास्मि; आर्तोहं (For कर्ताहं); कर्मणा (For णस् );

(४) गुर्वादिशस्य; काम्यकार्याणि; क्रूरकार्याणि; कुरु कार्याणि सर्वतः; नित्यशः.

यदि स्थास्यसि सङ्ग्रामे क्षत्रधर्मेण सौबल ॥ ४२ ॥(०१)

सहदेववचः श्रुत्वा नकुलोऽपि विशाम्पते।
दर्शनीयतमो नणामिदं वचनमब्रवीत् ॥ ४३ ॥(०२)

नकुलः

सुतेयं यज्ञसेनस्य द्यूतेऽस्मिन्धृतराष्ट्रजैः।
यैर्वाचः श्राविता रूक्षाः स्थितैर्दुर्योधनप्रिये ॥ ४४ ॥(०३)

तान्धार्तराष्ट्रान्दुर्वृत्तान्मुमूर्षून्कालचो(नो)दितान्।
गमयिष्यामि भूयिष्ठानहं वैवस्वतक्षयम् ॥ ४५ ॥(०४)

उलूकं च दुरात्मानं सौबलस्य सुतं प्रियम्।
क्रूरं हन्तास्मि समरे ह्यग्रजानामनुज्ञया ॥ ४६ ॥

**क्ररं हन्तास्मि समरे तं वै क्ररं नराधमम्।**(०५)

निदेशाद्धर्मराजस्य द्रौपद्याः पदवीं चरन्।
निर्धार्तराष्ट्रां पृथिवीं कर्तास्मि नचिरादिव ॥ ४७ ॥(०६)

**लक्षालङ्कारः-द्रौपद्याः पदवीं चरन् इत्यत्र द्रौपद्याः पदवीं केशाभिमर्शकरस्पर्श-कर्षणादिपदवीं**

---

(०१) (१)समरे (For तरसा); हन्तास्मि युद्धे विक्रम्य; (२) त्वं विक्रष्य; त्वामुद्दिश्य; त्वामेवेह; त्वां विनम्य (For त्वां विक्रम्य); त्वां विक्रम्य सहबाधवं (ह ); शकुनिं सहबां; (३) स्थास्यति (For ०सि ); (४) क्षात्रधर्मेण; योद्धं धर्मेण; मेग्रतः; सौबलं, क्षत्र- (क्षात्रं; क्षात्र) धर्ममनुस्मरन्,.

(०२)(२)वैशं० उ; वैशं, पतिः(For पते ); (३) नृणां; लोके (For मृणां ); (४) नकुलोपि विशां पते.

(०३) नकुल उवाच ( नकुलः ); (१) सहते (For सुतेयं ); याज्ञसेनस्य; (२) द्यूतेन; द्यूते यैर्; दूतेस्मिन् द्यूते जित्वा नराधमैः; (३) वाचं; वचः; वाचा (For वाचः) श्रविता रूक्षं; रौद्राः; क्रूराः (For रुक्षाः); (४) स्थितै; स्थिते (For स्थितैर् );प्रियेः; ०प्रियैः (For ०प्रिये );.

(०४) (१)धार्तराष्ट्रान्सु( न्स) दुर्वृत्तान् (२) मुमूर्षान्; मुमुक्षून् कालनोदितान्; देशितान् कृत्वा कोपं महाहवे; गम; प्रेष; दंश (For दर्श ); भूयिष्ठान् (४) वैवस्वतः क्षयं; अहं चैव स्वयं ( तं) क्षयं;.

(०५) ( हितं (For सुतं ); शूरं (For क्रूरं ); नराधिपं (For धमम् ); ह्यग्रजानामनुशया.

(०६) (१)निर्देशाद्; नियोगाद्; निवेशाद् (For निदेशाद् ); (२) प्रियकाम्यया; पदवीचरान्; पदवीं गतां; पृथिवीं चरन्; पदवीं चरान् (For पदवीं चरन्); (३) पदवीं (For पृथिवीं );.

चरन् उलूकेऽप्याचरन् ॥

वैशम्पायनः

एवं ते पुरुषव्याघ्राः सर्वे व्यायतबाहवः।
प्रतिज्ञा बहुलाः कृत्वा धृतराष्ट्रमुपागमन् ॥ ४८ ॥(०१)

युधिष्ठिरः

आमन्त्रयामि भरतांस्तथा वृद्धं पितामहम्।
राजानं सोमदत्तं च महाराजं च बाह्लिकम् ॥ ४९ ॥(०२)

द्रोणं कृपं नृपांश्चान्यानश्वत्थामानमेव च ।
विदुरं धृतराष्ट्रं च धार्तराष्ट्रांश्च सर्वशः ॥ ५० ॥(०३)

सौमदत्तिं महावीर्यं विकर्णं च महामतिम् ।
युयुत्सुं सञ्चयं चैव तथैवान्यान् मभासदः ॥ ५१ ॥

युयुत्सुं सञ्जयं चैव तथैवान्यान्सभासदः।
सर्वानामन्त्र्य गच्छामि द्रष्टास्मि पुनरेत्य वः ॥ ५२ ॥(०४)

---

(०१) वैशं उ (१) व्याघ्र (For व्याघ्राः); (२) प्रोच्य व्यायतबाहवः; सव धूतवा; व्याघ्रा इव बलोत्कटाः; परिघायत- बाहवः, (३) बहलाः; बहुशः (For बहुलाः); श्रुत्वा (For कृत्वा); प्रतिज्ञां बहुलां ( बहुधा; लीं; विपुलां) कृत्वा; कृत्वा प्रतिज्ञा बहुलाः (४) गताः; गमत् (For गमन् ); अनुध्यूत ( समाप्त); द्यूत; पुनर्धूत; वनप्रवेश; पाण्डवप्रतिज्ञा ( ज्ञानं); वधप्रतिज्ञा ( वध); दुर्योधनादिवध- प्रतिज्ञा;.

(०२) (१)आमन्त्रयित्वा; भरताः; भवतः (For भरतान्); (२) यथा (For तथा ); वृद्ध (द्धान्) पितामहान् (४) सह (For महा ); बह्लिकं;.

(०३) (१)नृपाश्चैव; धान्यानि नृपाश्चान्यान् (३) धार्तराष्ट्रांस्च (For धृतराष्ट्रं च ); (४) राष्ट्राश्च (For राष्ट्रांश्च ); तथैव च (For च सर्वशः); समग्रांश्चैव सर्वशः;.

(०४) (२) तथान्यांश्च; तथैवान्ये सहामात्यान्; सभामन्यान् (For तथैवान्यान् ); च(For(ए) व ); च कौरवान्(For सभासदः ); तथान्यांश्चैव कौरवा- ६९३४ गान्धारीं च महाभागां मातरं च पृथां तथा ।( तथा पृथा;)(३)एतान् (For सर्वान् ); गच्छाम; (४) दृष्ट्वास्मि; द्रुक्ष्यामि (For द्रष्टास्मि ); एव च; आगतः; एव वः; एत्य सः ( ह; वै); एत्य च (For एत्य वः );.

वैशम्पायनः

न च किञ्चिदथोचुस्तं ह्रिया सन्ना युधिष्ठिरम्।
मनोभिरेव कल्याणं दध्युस्ते तस्य धीमतः ।। ५३ ।।(०१)

विदुरः

आर्या पृथा राजपुत्री नारण्यं गन्तुमर्हति।
सुकुमारी च वृद्धा च नित्यं चैव सुखोचिता ।। ५४ ।।(०२)

इह वत्स्यति कल्याणी सत्कृता मम वेश्मनि।
इति पार्था विजानीध्वमगदं वोऽस्तु सर्वशः ।। ५५ ।।(०३)

*५९४ (अधिकपाठः - कपाठे) (०४)
तथेत्युक्त्वाब्रुवन्सर्वे यथा नो वदसेऽनघ।
त्वं पितृव्यः पितृसमो वयं च त्वत्परायणाः।
यथाऽऽज्ञापयसे विद्वंस्त्वं हि नः परमो गुरुः।
यच्चान्यदपि कर्तव्यं तद्विधत्स्व महामते।
पाण्डवा ऊचुः ।*
तथेत्युक्त्वामुवन्सर्वे यथा नो वदसेऽनघ ।*
त्वं पितृव्यः पितृसमो वयं च त्वत्परायणाः ।*

---

(०१) (१)ते; तं; तु; (ए) व (For च); अथ; इव; तथा (For तदा ); तदावोचन्; ततोच्यन्ते (For तदोचुस्ते); तं (For ते) (२) हिया युक्ता; ह्रिमन्तश्च; ह्रिया सन्ना; ह्रिया सतं; त्रपावन्तो; क्रियासन्ना; ह्रियावन्तो; ह्रियो सन्ना; ह्रिया सर्वे; ह्रिया सन्ते; यियासुं तं (For ह्रिया सन्तो); (४) ददुस्ते (For दध्युस्ते); पाण्डव; कर्मणः (For धीमतः),.
(०२) (१)वृद्धा (For पृथा) (२) नारण्ये; वस्तुम् (For गन्तुम्); अर्हसि;(३)व (For च); वृद्धा सुखोचिता चैव; (४) चापि (For चैव); सुखोषिता; सुखेधिता; सुखेषिता; सुखेरता (For सुखोचिता); नित्यं धर्मपरायणा; नित्यं दुःखसुदुःखिता;.
(०३) (१)वत्स्यति च; वत्सतु; कल्याणि; (२) पूजिता; सर्वथा (For सत्कृता); (३) इदं (For इति); (४) मलदं; मङ्गलं; मागदं गमनं; अगदं सर्वत; (For शः) सर्व चैतदशेषतः; मातृभक्त्या वचो मम;.
(०४) पाण्डवाः.

**यथाज्ञापयसे बिद्वंसवं हि नः परमो गुरुः ।**
**यच्चान्यदपि कर्तव्यं तद्विधत्स महामते ।**(०१)

युधिष्ठिर विजानीहि ममेदं भरतर्षभ।
नाधर्मेण जितः कश्चिद्व्यथते वै पराजये ॥ ५६ ॥(०२)

त्वं वै धर्मं विजानीषे युद्धे जेता धनञ्जयः।
हन्तारीणां भीमसेनो नकुलस्त्वर्थसङ्ग्रही ॥ ५७॥(०३)

**सहदेवो नृणां देवो नित्यं पृष्ठानुगः सह ।**
**सर्वोपद्रवनाशाय भविष्यति रणोत्कटः ।**

संयन्ता सहदेवस्तु धौम्यो ब्रह्मविदुत्तमः।
धर्मार्थकुशला चैव द्रौपदी धर्मचारिणी ॥ ५८ ॥(०४)

अन्योन्यं सम्प्रियाः सर्वे तथैव प्रियदर्शनाः।
परैरभेद्याः सन्तुष्टाः को वा न स्पृहयेदिह ॥ ५९ ॥(०५)

**लक्षालङ्कारः-सन्तुष्टाः सम्भवत वर्तध्वम् । इह भवत्सु को वा अन्योन्यं, न स्पृहयेत्**

---

(०१) (वैशं उ एव (For उत्त्या); पितृव्य पितृभ्यः; वयं चात्म( चात्व; च प्व)पराल्पाः यथा (For यच्च); विधस्व (For विधत्स्व)).

(०२) (१) विदुर उ ( विदुरः ); युधिष्ठिरेदं विद्धि त्वं० ( विदितं); (२) तवापि; मम त्वं; यथेदं (For ममेदं ); तथा भरतसत्तम; (३) नाधर्मविजि( दि) तः ( तात्); नाधर्मो भवतां; नाधर्मेणाजितः; न धर्मोपचितः (नाधर्मोपचितं ); नाधर्मभरतः (For नाधर्मेण जितः ); (४) य(द्) द्यूते; व्याप्यते; वृथते (For व्यथते ); पराजितः जये; भवात् (For जवात्);.

(०३) (१)त्वं हि; तं वै; यदि (For त्वं वै ); धर्म (For धर्मान् ); विजानिहि (For नीषे ); (२) युद्दं; युद्धे; प युधि; युध; युद्धान् (For युधां ); नेता; जेता; चेत्ता (For वेत्ता ); (३) रिपून्(For (अ)रीणां); रणे भीमो (For भीमसनो) (४) त्वर्थसङ्ग्रहे (हः); सर्वतो वशी; त्वनुसङ्ग्रही; त्वथ सङ्ग्रही (हे); स्वार्थसङ्ग्रहः.

(०४) (१)संयत्ता; संयतः (For संयन्त); च (For तु); सश्चितात्मा नियतात्मा; सहदेवस्तु संयन्ता (२) वेदविदुत्तमः; धर्मवि; ब्राह्मणसत्तमः (क्षेमं करिष्यति; ब्राह्मणपुङ्गवः ); (३) कुशला चैषा; कुशलोच्चैव; (४) धारिणी (For चारिणी).

(०५) (१)अन्योन्यं वै; न्यं सं- (For न्यस्य ); चैव (For सर्वे); (२) ब्रह्मवादिनः; प्रियदर्शनाः (र्शिनः); (अ) प्रियवादिनः; प्रियः((अ) प्रिय) कारिणः; प्रियवादिनी; (३) अलग्घ्याः (For अभेद्याः); कृतविद्याः

**स्पृहामिच्छां न कुर्यात् । सर्वेऽप्यन्योन्यमनोनुकूला इति भावः । इह भवत्सु न स्पृहयेत् इच्छां न कुर्यादिदिति सम्बन्धः ।**

**एष वै सर्वकल्याणः समाधिस्तव भारत।**
**नैनं शत्रुर्विषहते शक्रेणापि समोऽप्युत ।। ६० ।।**(०१)

**हिमवत्यनुशिष्टोऽसि मेरुसावर्णिना पुरा।**
**द्वैपायनेन कृष्णेन नगरे वारणावते ।। ६१ ।।**(०२)

**लक्षालङ्कारः-हिमवति इत्यत्र हिमवति शतशृङ्गे । पुरा बाल्ये । मेरुसावर्णिना मेरुसावर्ण्याख्यमनुना ।**

**भृगुतुङ्गे च रामेण दृषद्वत्यां च शम्भुना ।**
**अश्रौषीरसितस्यापि महर्षेः अञ्जनं प्रति ।। ६२ ।।**(०३)

**लक्षालङ्कारः-असितस्य असिताख्यमहर्षेः सकाशादपि ।**

**कल्माषीतीरसंस्थस्य गतस्त्वं शिष्यतां भृगोः।**

**द्रष्टा सदा नारदस्ते धौम्यस्तेऽयं पुरोहितः ।**

---

सुसन्तुष्टाः; (४) वात्र; नैव; वा न; वै न ( वो न ); इव; इति; इह.

(०१) (१)धर्म (For सर्व) कल्याण;वै सर्वल्याणी
(३) नैवं; नैव; नैत; न वः (For नैनं); शत्रूत् (For शत्रुर्); विसहते; विहन्तासीत् (For विषहते),
(४) समोच्युतः ( तं); प्युत; प्युताः; च्युताः; समो युधि (For समोऽच्युत).

(०२) (१) (ऽ) स्मि (For ऽसि); हिमवत्य( त्सा)नुशास्तासि; (२) मेरुः सा;मैरुसा;
(३) द्वीपायनेन कृष्णेन; कृष्णद्वैपायनेनापि; (४) नागसाह्वये; धारणावते (For वारणा );.

(०३) (१) भृगुगुङ्गे च; तुङ्गेण; तुन्दे ( तुम्बे) च ( तु); भृगुनन्दनेन (For भृगुतुङ्गे च);
(२) बृहद्वत्यां (For दृष० ); तु (For च); विष्णुना (For शम्भुना);
(३) आश्रोषीद्; अश्रोषम् (For अश्रौषीर); अपि तस्यापि; अथ तस्यापि; अहितस्यापि;
(४) अर्जुनं प्रति; जनसंसदि; जल्पतः पुरा; अर्हणं प्रति; हरणं प्रति;
अथ ( अपि) धीमतः (For अञ्जनं प्रति );.

महर्षिः साम्पराये त्वं बुद्धि तामृषिपूजिताम् ।।(०१)
पुरूरवसमैलं त्वं बुद्ध्या जयसि पाण्डव ।। ६३ ।।(०२)

**लक्षालङ्कारः-महर्षिः साम्पराय इत्यत्र 'साम्परायस्तु सङ्ग्राम आपदागामिकालयोः' इत्यभिधानात् साम्पराये आपदि धौम्यः ते बुद्धिं वक्ष्यतीति योग्यक्रियया सम्बन्धः ।**

शक्त्या जयसि राज्ञोऽन्यानृषीन्धर्मोपसेवया।(०३)
ऐन्द्रे जये धृतमना याम्ये कोपविधारणे ।। ६४ ।।(०४)

तथा विसर्गे कौबेरे वारुणे चैव संयमे।(०५)
आत्मप्रदाने सौम्य त्वमद्भ्यश्चैवात्मजीवने ।। ६५ ।।(०६)

**लक्षालङ्कारः-आत्मप्रदान इत्यत्र सौम्ये सोमसम्बन्धिनि, आत्मप्रदाने स्वकलादानवत्**

---

(०१) (१)दृष्ट्वा; दृष्टा (For द्रष्टा); नारदस्ते नारदस्तु (For नारदस्य) दृष्टासि नारदं चापि;

(२) सौम्यम् (For धौम्यस्) चापि; चायं; चैव; तव (For तेऽयं); नाहार्षीः; मा ह्यासीः; महार्षीः; मा ह्यासीः; महर्षिः मा हासीः (महासीः; महत्यासीः); महर्षिः (For मा हार्षीः);

सां (सं)परायत्वं (For ०ये त्वं ); महत्यासी त्सापराये; महर्षिः सन्दिशेद्यसवा; (महर्षिः) महीं कृत्स्नां पराजे( ये) स्त्वं (परंयेस्वां); स महर्षिः साम्परायेस्त्वं महर्षिः सा पराजित्वां; भविष्यति च सर्वत्र साम्पराये बुद्धिताम्; बुद्दिस्ते (For बुद्दि ताम्); बुद्दि(द्द) स्ते ऋषिपूजिता ( तः ); बुद्धिमानृषिपूजितः; बुद्धिसवमृषिपूजिता; बुद्धि तां तात पूजितां; महीं कृत्स्नां पराजैषीस्त्वं बुद्धि तात पूजितां;.

(०२) (१)एव; ऐळं (For ऐलं ); एलान्त्यं (For ऐलं त्वं); च (For त्वं ); (२) पाण्डवं (For पाण्डव);.

(०३) (१) शक्या; शक्तो (For शक्त्या); राजन्यान् (For तज्ञोऽन्यान्); (२) नृपं (For ऋषीन्); धर्माय सेवया; धर्मोपि से०; पादोपसें.

(०४) (१) न्द्रं विजय शौर्याच्च न्द्रं विजयसे शौर्याद् (एन्द्रे); इन्द्रो ( ऐन्द्रे; न्द्रं) जये धृतात्मा त्वं ( त्यं); ऐन्द्रे जयद्रथमनाः; ऐन्द्रे

(२) यमं; यमः; यम-(For याम्ये); कोपविदारणे; विधारणं; (णात्; कोपेवधारणं; कोप- निवारणे; कोपितधा( या)रणे; कोपि विधारणे;विधारणे.

(०५) (१) विसङ्गे; विसर्गे धनदो (For कौबेरे); त्यागेन धनदं देवं; तथा विसर्गे कौबेरे; संसर्गे चैव (णेव; णैव) धनदो विश्राणने च धनदो; विसर्गे

(२) व (वा) रुणश् (णाश्); वरुणं (For वारुणे); सम्पदः; सङ्गमे; संयमे वरुणं संयमेन च; वारुणे त्वथ सश्चये; संयमे चैव वारुणे.

(०६) (१)अध्म- (For आत्म- ); अत्मिप्रसादे; प्रदाने; सौम्ये त्वं; सोमस्त्वं; सौम्यस्त्वं (For सौम्यत्वं);

स्वस्यैव दाने । आत्मजीवने प्राणिनां जीवने ।

भूमेः क्षमा च तेजश्च सामग्रं सूर्यमण्डलात्।(०१)
वायोर्बलं प्राप्नुहि त्वं भूतेभ्यश्चात्मसम्पदम् ।। ६६ ।। (०२)

लक्षालङ्कारः-सामग्रं, समग्रस्य पूर्णस्य भावः सामग्रं, सदा एकप्रकारेण स्थितिः । भूतेभ्यः पृथिव्यादिपञ्चमहाभूतेभ्यः ।

अगदं वोऽस्तु भद्रं वो द्रष्टासि पुनरागतान्।(०३)
आपद्धर्मार्थकृच्छ्रेषु सर्वकार्येषु वा पुनः ।। ६७ ।।(०४)

लक्षालङ्कारः-अगदं आरोग्यम् ।

यथावत्प्रतिपद्येथाः काले काले युधिष्ठिर ।(०५)
आपृष्टोऽसीह कौन्तेय स्वस्ति प्राप्नुहि भारत ।। ६८ ।।(०६)

लक्षालङ्कारः-आपृष्टः आ समन्तात् पृष्टं प्रश्नो यस्य स तथोक्तः ।।

---

सौम्ये; आत्मप्रधानं संयत्यं; आत्मवदानं सोमाच्च; सोमादाह्लादकत्वं त्वम्; आत्मप्रसादने सौम्यं; सौम्यं (सोमभावः );

(२) त्वद्ध्यः; सभ्यः; पद्मः (For अभ्यः ); अद्ध्यश्चैवात्म( नु) जीवनं ( विनः); मेध्यश्चै ( ध्ये चै ; मध्येश्चै) वात्मपूजने; मे,(म)ध्यं चैवात्मपूजनं ( जीवनं); जलं चैवात्मशोधने; उपजीवनं; आत्मजीवने;.

(०१) (१) भूमौ (For भूमेः ); क्षमा त्वं; क्षमां च; क्षमं च; क्षमायां (For क्षमा च); भूमिक्षमा यमोग्राच्च; (२) सामग्र्यं (ग्रं); समयं; सामर्थ्यं; तथात्वं (For समग्रं ); रविमण्डलात्; सूर्यमण्डले (For लात् );.

(०२) (१)विद्धि सत्यं; विद्धि सर्वं; प्राप्नुहि त्वं (For विद्धि स त्वं ); तेभ्यो बलं विधिं सर्वं; वायोश्चैव ( वायौ चैव) बलं विद्धि ( बले तुल्यो; प्राप्नुहि त्वं );

(२) सम्पदं; सम्पदः; संसदः; सम्भवः (For सम्भवम् ); पञ्चभूतैः समो व्यये; भूतेभ्यः .

(०३) (१) अगाधं; अङ्गदं; अगदो; आगमं; अगदे; भद्रं ते; सर्वान्वो; सर्वान्नो; सर्वाश्च; सर्वान्यो; सर्वान्वै (For भद्रं वो ); द्रष्टास्मि; द्रक्ष्यामः (म) (For द्रक्ष्यामि);.

(०४) (१)आप- द्धर्मार्थकृच्छ्रे च; द्धर्मस्य कृच्छ्रेषु; आपत्सु चार्थकृच्छ्रे ( कार्ये)षु; (२) सर्वधर्मेषु; कामेषु; धर्मकार्येषु (For सर्वकार्येषु);.

(०५) (१) कार्यः (र्ये) काले (For काले काले); युधिष्ठिरः; ष्ठिरं; ष्ठिरे (For ष्ठिर).

(०६) (१)आपृष्टो स्मीति; ;सीति; आप्रोष्टोसीह; ष्टास्म च; आपृच्छामीह; मयापृष्टोसि; आपृष्टाः स्मेह;

कृतार्थं स्वस्तिमन्तं त्वां द्रक्ष्यामः पुनरागतम् ।। ६९ ।।(०१)

***५९७ (अधिकपाठः - कपाठे)**

**न हि वो वृजिनं किञ्चिद्वेद कश्चित्पुरा कृतम् ।(०२)**

वैशम्पायनः

एवमुक्तस्तथेत्युक्त्वा पाण्डवः सत्यविक्रमः।
भीष्मद्रोणौ नमस्कृत्य प्रातिष्ठत युधिष्ठिरः ।। ७० ।।(०३)

**अस्मिन् पर्वणि ६९अध्याये ७०श्लोकाः सन्ति**

अनुद्यूतपर्वणि (४) चतुर्थोऽध्यायः

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि अनुद्यूतपर्वणि युधिष्ठिरवन प्रस्थानेऽष्टसप्ततितमोऽध्यायः।। ६९।।

# ७०. सप्ततितमोऽध्यायः

## 02- 07- 60

**कृष्णायाः कुन्तीं प्रत्यनुज्ञाप्रार्थना । कुन्त्या विलापः । नगरनिवासिनरनारीणां शोक-वैक्लव्यं च**

वैशम्पायनः-

**ततः सम्प्रस्थिते तत्र धर्मराजे तदा नृपे।**
जनाः समस्तास्तं द्रष्टुं समारुरुहुरातुराः ।। १ ।।(०४)

---

आ(अ) पृष्टस्त्वि (स्ते)ह; स पृष्टस्त्वं हि(For आपृष्टोऽसीह); सर्वत्र (For कौन्तेय); (२) चा (वा) मुहि (For प्राप्नुहि); गम्यतां (भारत );.

(०१) (१) सिद्धि (For स्वस्ति ); त्वा; च; त्वं (For त्वां ); (२) द्रक्ष्यामि ( मः ); पुनरागतान्;.

(०२) ( वो हि ; हि नो; पुरातनं ( पुरा कृतम्)).

(०३) (१) उक्त्वा (For उक्तस् ) उक्तः (For उक्त्वा ); (३) पुरस्कृत्य; नमस्कृत्वा;.

(०४)(४) क- रत्वराः ।.

**ततः प्रासादवर्याणि विमानशिखराणि च ।**
गोपुराणि च सर्वाणि वृक्षानन्यांश्च सर्वशः।
अथाधिरुह्य सस्त्रीका उदासीना व्यलोकयन् ।। २ ।।

लक्षालङ्कारः-सस्त्रीकाः स्त्रीभिः सहिताः बाला वृद्धाश्च । उदासीना व्यलोकयन् इत्यत्र उदासीनाः उच्चस्थानेष्वासीनाः ।

न हि रथ्यास्ततः शक्या गन्तुं बहुजनाकुलाः ।। ३ ।।

लक्षालङ्कारः-न हि रथ्यास्ततः शक्या इत्यत्र यतः ताः रथ्याः रथवीथ्यः स्वजनैर्बन्धुजनैः आकुलाः, ततः स्त्रीबालवृद्धानां गन्तुं शक्या न ।

आरुह्य तेन  तेन्यत्र दीनाः पश्यन्ति पाण्डवान् ।
पदातिं वर्जितच्छत्रं चेलभूषणवर्जितम् ।। ४ ।।

लक्षालङ्कारः-तेन कारणेन ते सर्वे आरुह्य पाण्डवान् पश्यन्ति । अन्यत्र न ।

वल्कलाजिनसंवीतं पार्थं दृष्ट्वा जनास्तदा।
ऊचुर्बहुविधा वाचो भृशोपहतचेतसः ।। ५ ।।

जनाः

यं यान्तमनुयाति स्म चतुरङ्गबलं महत् ।
तमेवं कृष्णया सार्धमनुयान्ति स्म पाण्डवाः ।
चत्वारो भ्रातरश्चैव पुरोधाश्च विशाम्पते ।। ६ ।।(०१)

भीमार्जुनौ वारयित्वा निकृत्या बद्धकार्मुकौ ।
**धर्म एवास्थितो येन त्यक्त्वा राज्यं महात्मना ।। ७ ।।**

लक्षालङ्कारः-निकृत्या नितरां कृतिः कार्यं तया उपरि बहुकार्यमस्तीत्युक्त्वा, बद्धकार्मुकौ

(०१)(३) घ-नं । ख-ग-ङ-वं ।.

भीमार्जुनौ वारयिता इदानीं किमपि न कार्यमिति वारयिता पुरोधाश्चेति सम्बन्धः ।

या न शक्या पुरा द्रष्टुं भूतैराकाशगैरपि ।
तामद्य कृष्णां पश्यन्ति राजमार्गगता जनाः ॥ ८ ॥

अङ्गरागोचितां कृष्णां रक्तचन्दनसेविनीम्।*
वर्षमुष्णं च शीतं च नेष्यत्याशु विवर्णताम् ॥ ९ ॥

अद्य नूनं पृथा देवी सत्त्वमाविश्य भाषते।
पुत्रान्स्नुषां च देवी तु द्रष्टुमद्याथ नार्हति ॥ १० ॥

निर्गुणस्यापि पुत्रस्य कथं स्याद्दुःखदर्शनम्।
किं पुनर्यस्य लोकोऽयं जितो वृत्तेन केवलम् ॥ ११॥

आनृशंस्यमनुक्रोशो धृतिः शीलं दमः शमः।
पाण्डवं शोभयन्त्येते षड्गुणाः पुरुषोत्तमम् ॥ १२ ॥

तस्मात्तस्योपघातेन प्रजाः परमपीडिताः।*
औदकानीव सत्त्वानि ग्रीष्मे सलिलसङ्क्षयात् ॥ १३ ॥

पीडया पीडितं सर्वं जगत्तस्य जगत्पतेः।
मूलस्यैवोपघातेन वृक्षः पुष्पफलोपगः ॥ १४ ॥

मूलं ह्येष मनुष्याणां धर्मराजो महाद्युतिः।
पुष्पं फलं च पत्रं च शाखास्तस्येतरे जनाः ॥ १५ ॥[०१]

ते भ्रातर इव क्षिप्रं सपुत्राः सहबान्धवाः।
गच्छन्तमनुगच्छामो येन गच्छति पाण्डवः ॥ १६ ॥

उद्यानानि परित्यज्य क्षेत्राणि च गृहाणि च ।
एकदुःखसुखाः पार्थमनुयाम सुधार्मिकम् ॥ १७ ॥

---

(०१) (२) अ-राजो ।.

समुद्धृतनिधानानि परिध्वस्ताजिराणि च ।
उपात्तधनधान्यानि हृतसाराणि सर्वशः ।। १८ ।।[०१]

रजसाप्यवकीर्णानि परित्यक्तानि दैवतैः।
मूषकैः परिधावद्भिरुद्बिलैरावृतानि च ।। १९ ।।[०२]

सर्वतोदकधूमानि हीनसम्मार्जनानि च ।
प्रणष्टबलिकर्मेज्यामन्त्रहोमजपानि च ।। २० ।।

लक्षालङ्कारः-सर्वतोदकधूमानि इत्यत्र 'तुद व्यथने' इति धातोः सर्वान् तुदतीति सर्वतोदको धूमो येषां तानि ।

दुष्कालेनेव भग्नानि भिन्नभाजनवन्ति च ।
अस्मत्त्यक्तानि वेश्मानि सौबलः प्रतिपद्यताम् ।। २१ ।।

वनं नगरमद्यास्तु यत्र गच्छन्ति पाण्डवाः।
अस्माभिश्च परित्यक्तं पुरं सम्पद्यतां वनम् ।। २२ ।।

बिलानि दंष्ट्रिणः सर्वे वनानि मृगपक्षिणः।
त्यजन्त्वस्मद्भयाद्भीता गजाः सिंहा वनान्यपि ।। २३।।

अनाक्रान्तं प्रपद्यन्तु सेव्यमानं त्यजन्तु च ।
तृणमाषफलादानां देशांस्त्यक्त्वा मृगद्विजाः ।।२४ ।।

लक्षालङ्कारः-अनाक्रान्तम् अस्माभिरनाक्रान्तम् ।

वयं पार्थैर्वने सम्यक्सह वत्स्याम निर्वृताः ।। २५ ।।

(१) क- (अधिकः पाठः अन्वयरहितश्च)
सौबलः प्रतिपकद्येतसदुर्योधनबान्धवः।

(०१) (१) क- समुद्धृतानि धानानि ।.
(०२) (४) क- उद्बिलै ।.

वैशम्पायनः

इत्येवं विविधा वाचो नानाजनसमीरिताः।

शुश्राव पार्थः श्रुत्वा च न विचक्रेऽस्य मानसम् ।। २६ ।।

ततः प्रासादसंस्थास्तु समन्ताद्वै गृहे गृहे।

ब्राह्मणक्षत्रियविशां शूद्राणां चैव योषितः ।। २७ ।।

ततः प्रासादजालानामुत्पाट्यावरणानि च ।

ददृशुः पाण्डवान्दीनान्रौरवाजिनवाससः ।। २८ ।।(०१)

लक्षालङ्कारः-प्रासादजालानि प्रासादगवाक्षान् ।

कृष्णां त्वदृष्टपूर्वां तां व्रजन्तीं पद्भिरेव च ।

एकवस्त्रां रुदन्तीं तां मुक्तकेशीं रजस्वलाम् ।। २९ ।।

दृष्ट्वा तदा स्त्रियः सर्वा विवर्णवदना भृशम्।

विलप्य बहुधा मोहाद्दुःखशोकेन पीडिताः।
हा हा धिग्धिग्धिगित्युक्त्वा नेत्रैरश्रूण्यवर्तयन् ।। ३० ।।

जनस्याथ वजश्श्रुत्वा स राजा क्ष्नतृभिस्सह ।

उद्दिश्य वनवासाय प्रतस्थे कृतनिश्चयः ।। ३१ ।।

तस्मिन्सम्प्रस्थिते कृष्णा पृथां प्राप्य यशस्विनीम्।

अपृच्छद्भृशदुःखार्ता याश्चान्यास्तत्र योषितः ।। ३२ ।।(०२)

यथार्हं वन्दनाश्लेषान्कृत्वा गन्तुमियेष सा।

---

(०१)(४) क- दान्तान् वल्कला । ग- दीनान्वल्कला । ङ-दीप्तान् ।.

(०२) (१) ततः (For तस्मिन्) प्रतस्थिते; सम्प्रस्थिता; ततः सम्प्रस्थिता कृष्णा (२) यशस्विनी (३) अपृच्छद्; शोकार्ता; (४) पाश्चाल्याश्चापि यो;.

ततो निनादः सुमहान्पाण्डवान्तःपुरेऽभवत् ।। ३३ ।।(०१)

कुन्ती च भृशसन्तप्ता द्रौपदीं प्रेक्ष्य गच्छतीम्।
शोकविह्वलया वाचा कृच्छ्राद्वचनमब्रवीत् ।। ३४ ।।(०२)

कुन्ती-

वत्से शोको न ते कार्यः प्राप्येदं व्यसनं महत्।
स्त्रीधर्माणामभिज्ञासि शीलाचारवती तथा ।। ३५ ।।(०३)

न त्वां सन्देष्टुमर्हामि भर्तन्प्रति शुचिस्मिते।
साध्वीगुणसमापन्ना भूषितं ते कुलद्वयम् ।। ३६ ।।(०४)

सभाग्याः कुरवश्चेमे ये न दग्धास्त्वयानघे।
अरिष्टं व्रज पन्थानं मदनुध्यानबृंहिता ।। ३७ ।।(०५)

भाविन्यर्थे हि सत्स्त्रीणां वैकृतं नोपजायते।

---

(०१) (१)यथार्हा श्लेषौ; श्लेषं यथार्हा वन्दनास्तासां; यथार्हवदनास्तेषान् (२) च; ह (For सा); (४) क- पाण्डवाना विवासनात् । पाण्डवानां पुरेऽभवत् । पाण्डवानां पुरो.

(०२) (१)त्व-; तु (For च ); भृशं च; चातीव (For च भृश-); भृश तां तप्ता भृशसंविग्ना; सुभृशं तप्त्वा;
(२) वीक्ष्य (For प्रेक्ष्य ); द्रौपदी प्रेक्ष्य गछते; कृष्णां यान्तीं समीक्ष्य ह; दीं प्रत्यगच्छती;
(३) शोचिह्लछलवा ; शोकगद्गडया; विक्लवया; (४) इदं; कृष्णां; कुन्ती (For कृच्छ्राद्).

(०३) कुन्त्युवाच, कुन्ती; (१) शोके (For शोको ); कर्तव्यः; ते कार्यं;
(३) अभिज्ञाय; अविज्ञासि; (४) शुभा; यथा (For तथा );.

(०४) (१) त्वं; त्वा (For त्वां) सन्दष्टुम्; इच्छामि; अर्हासि; अर्हाहं(For अर्हामि);
(२) भ्रातृन् (For भर्तृन्); शुचिव्रते; स्मिता; सुमध्यमे;
(३) साध्वीगुणैः;सर्वैर्गुण (णैः); समापन्ना; चारैर्; समृद्दाभिर् (For समाधानैर्)
(४) कुलं च नः (For कुलद्रूयम्);.

(०५) सभाषा; सभार्थाः(Forसभाग्याः);चैते (For चेमे) सभायां कुरवः सर्व; (२) यया(For ये न); साघास्; गुप्तास् (For दग्धास्); (३) अतिष्ठं (For अरिष्टं ); गच्छ (For व्रज); (४) उदर; अननु- (For मदनु- ); संहिता (For बृंहिता) पादचारणबृंहितम्; मन्दबुध्या न बृंहिता; ध्यानमास्थिता; अनुज्ञाता न बृहिता;.

गुरुधर्माभिगुप्ता च श्रेयः क्षिप्रमवाप्स्यसि ।। ३८ ।।(०१)

लक्षालङ्कारः-गुरुधर्माभिगुप्ता गुरुः श्रेष्ठः धर्मः तेन अभिगुप्ता ।

सहदेवश्च मे पुत्रः सदावेक्ष्यो वने वसन्।
यथेदं व्यसनं प्राप्य नायं सीदेन्महामतिः ।। ३९ ।।(०२)

वैशम्पायनः-

तथेत्युक्त्वा तु सा देवी स्रवन्नेत्रजलाविला।
शोणिताक्तैकवसना मुक्तकेशी विनिर्ययौ ।। ४० ।।(०३)

तां क्रोशन्तीं पृथा दुःखादनुवव्राज गच्छतीम्।
अथापश्यत्सुतान्सर्वान्हृताभरणवाससः ।। ४१ ।।(०४)

रुरुचर्मावृततनून्ह्रिया किञ्चिदवाङ्मुखान्।

---

(०१) (१)तु (For हि ); सस्त्रीणां; स्त्रीणां; सुस्त्रीणां; भावितात्वे सतीस्त्रीणां; (२) वैकृतं (For वैक्लव्यं) मों (For नो ); (३) कुरु-; गुण- (Forगुरु-) कर्मा (For ०धर्मा० ); गोप्ता; युक्ता (For गुप्ता ); वै; हि; (अ) थ (For च); गुरुधर्मासि गुप्तासि; श्रु (श्रि )तधर्मा च शुद्धा च; गुतणधर्म्याभिगु०; गुणधर्माभिगुश्या च; (४) परम् (For क्षिप्रम्); अवाप्स्यति; इहान्त्यहि; इहाप्स्यसि;.

(०२) (१)तु (For च ); ते ( मे) पुत्रि (For मे पुत्रः ); सद् (For सदा); वीक्ष्यो; रक्ष्यो; (अ)वेक्षो (For (अ)वेक्ष्यो); (३) इदं तु; यदेतद्; यदेवं; (४) नाव; ना (न) यं; नापि (For नास्य ); यथा मनः; महात्मनः ( नाः); महामनाः; महामतिः ( ति); मनो महत् मनः क्वचित् (For महन्मनः,); नास्यसादात्मनः क्वचित्; न विषीदेन्महात्मना;.

(०३) (१)यथा (For तथा ); (इ) त्युक्ता; च (For तु ); पाञ्चाली (For सा देवी; (२) श्रवन्नेत्र-; स्ववन्नैत्र-; प्रस्रवेत्रन् सृज ( व) न्नेत्र-; विलं; (३) तातैक (For तास्कैक); (४) न्यस्त (For मुक्त) मुक्तकेशा;विनिर्ययौ; रजस्वला (For अभिनि० );.

(०४) (१)क्रोश (ष)र्ती; न्ती; ती; पृथां दृष्ट्वा (For दुःखाद्) तथा दुःखं; सदुःखां तां (For पृथा दुःखाद्), (२)गच्छं ( क्रोशं )तीमन्वगच्छत पृण्थषं तु स्त्रिसतयः।। दूतं द्विर्भूद्वहेर् (३)यथा; तथा (For अथा०) पश्यन्; पार्थान् (For सर्वान् ); (४) त्यक्ता०; हता; गता (For हृता०) वाससान्,.

परैः परीतान्संहृष्टैः सुहृद्भिश्चानुशोचितान् ।। ४२ ।।(०१)

लक्षालङ्कारः-सुहृद्भिः सह अनुशोचतः ।।

तदवस्थान्सुतान्सर्वानुपसृत्यातिवत्सला।
स्वजमानावदच्छोकात्तत्तद्विलपती बहु ।। ४३ ।।(०२)

कुन्ती

कथं सद्धर्मचारित्रान्वृत्तस्थितिविभूषितान्।
अक्षुद्रान्दृढभक्तांश्च दैवतेज्यापरान्सदा ।। ४४ ।।(०३)

व्यसनं वः समभ्यागात्कोऽयं विधिविपर्ययः ।। ४५ ।।(०४)

कस्यापध्यानजं चेदं मागः(धिया) पश्यामि वो धिया(नैव तत्)।(०५)

---

(०१) (१) वृततनू; वृतान्तान्तु (२) पृथा किञ्चिदवाङ्मुखी; (३) पदैः (For परैः) परेतान्; परैतान् संसृष्टैः; शोभितान्; शोच्यतः; शोचतः (For शोचितान् );.

(०२) (१)तथावस्थांश् तु तान्; च तान् (For सुतान्) (२) (अ)तिवत्सलान्; (अ) भिवत्सला; (अ) भिविक्लवान्; (अ) तिविह्वला ( लाः ); पश्य तत्पुत्रवत्सला; पश्यन्ती वत्सला शुभा ( भानू) ( उपसृत्यानुवत्सला );(३) क- सा स्वजां नृपतीन् ङ-सा स्वजाना पत (ग) सस्वजे नापतच्छो । स्वजमाना; स्वस्ववाचा स्मयमाना; स्वजनेना (For सस्वजाना) पत (For वद ); स्वजमाना (सस्वजावा)रुदच्छोकात्; रुदती चैव शोकेन; सस्वजे सा वृहच्छोकात्; स्वजमाना ( स्वज; स्वजा ); नापतच्छो; सासुतानृपतीन् शोकात् ततो (For तत्तद् ); मुहुः (For बहु ); विलपन्ती महासुतान्; विलपन्ती मुहुस्तदा ( हुः शुचा);.

(०३) (१)कुन्त्युवाच; पृथा; सधर्मचारित्रान् ( त्र्यान्; त्रा); तु धर्मचारित्र्य; स्वद्दर्मचारित्रान्-( त्र्यान्; त्र्य; त्रा); सुधर्मचारित्रान् स्वधर्मचारित्र (त्रान्) (For सद्धर्मचारित्र- ); (२)वृत्तिस्थितिविभू; कृतस्थितिविभूं; प्रवृत्ति- स्थितिभू; वृत्तस्थितविभू; नृत्तस्थितिविभूं; (३) क- अश्रुद्रान् गुरुभक्तांश्च । ग- अक्षुद्रानुरुभक्तांश्च ।अक्रुद्धान् (For अक्षुद्रान् ); दृढभक्तींश्च; गुरुभक्तांश्च; चैव भ (भु ) क्तांश्च; चैव शूरांश्च; (४) देवतेज्या; दैवेतेज्या०; दैवत्येज्यां; सुतः; सतः; तथा (For सदा ); दैवतेश्वपराजितान्.

(०४) चः; च (For वः); समाभ्यायात्; समाभ्यागात्त्; सदा (इदं) व्यसनमभ्यागाद् (गाः); (२) काल-(For विधि- ); विधेः कोयं; विधेर्योयं; विधेः कोप- (For कोऽयं विधि- );.

(०५) (१)क- तस्यापनयनं चेदं नाहं पश्यामि वो धिया । क- कस्यामप्यापति त्वेवं क- कस्यापनयजं । (१) क्रोधनजं; (अ) पनयजं; (अ) प्यनयनं (जं) (For (अ) पध्यानजं );( क्रोधजं ); अपध्यानं ( क्रोधः) खेदम्; वेदम् (For चेदम् ); कस्यामप्याप-(प) दि त्वेवन् ( म्); कस्यामप्यात्मजं चेदम्; (२) मार्गः (For आगः); नो; वै (For वो ); (ऽ) धिपाः; (ऽ) पि या; (ऽ) धिप (For धिया ); धिया पश्यामि नैव तत्.

स्यात्तु मद्भाग्यदोषोऽयं याहं युष्मानजीजनम् ।। ४६ ।।
दुःखायासभुजोऽत्यर्थं युक्तानप्युत्तमैर्गुणैः।।(०१)
कथं वत्स्यथ दुर्गेषु वने ऋद्धिविनाकृताः।
वीर्यसत्त्वबलोत्साहतेजोभिरकृशाः कृशाः ।। ४७ ।।(०२)
यद्येतदेवमज्ञास्यं वने वासो हि वो ध्रुवम् ।
शतशृङ्गान्मृते पाण्डौ नागमिष्यं गजाह्वयम् ।। ४८ ।।(०३)

**लक्षालङ्कारः-शतशृङ्गात् गजाह्वयं नागमिष्यम् ।।**

धन्यं वः पितरं मन्ये तपोमेधान्वितं तथा ।
यमपुत्राधिमम्प्राप्य स्वर्गेच्छामकरोत्प्रियाम् ।। ४९ ।।(०४)

**लक्षालङ्कारः-यमपुत्राधिमप्राप्य इत्यत्र यमौ यमलौ नकुलसहदेवौ पुत्रौ यस्याः सा माद्री ।**

धन्यां चातीन्द्रियज्ञानामिमां प्राप्तां परां गतिम्।

---

(०१) (१)तत्स्यान् (For स्यात्तु ); ममाभाग्य- (For तु मद्भाग्य-) स्यान्मदभाग्यदोषाय; (२) योयं; स्वाहं (For याहं ); यां ह्यायुष्मानजीजनत् (३) दृष्ढायास-; दुःखायाप्य-; दुःखायासु-; भुजात्यर्थं; भुजो नित्यं दुःखायासं भुजेन्वर्थं; (४) संयुक्ताप्यु०; युक्ता अप्यु०; युक्तौ नत्यू; युक्तो अप्यु० (For युक्तानप्यु );.
(०२) (१)वस (त्स)थ (For वत्स्यथ); (२) वनेष्वृद्धिं; वने वृद्दि; वनेष्वर्थ; वनेष्विह; वने ऋद्दि; वनेष्वस्मद्; वने वृद्दि; वनेष्वृद्दि; वनेष्वधि ऋद्धि वृद्धि; निरा० (For -विना ); वीर्ये सर्व; वीर्यं सत्त्व-; वीर्यसत्य-(For वीर्यसत्त्व- ); बलोत्साहा- ( हासू) (Forवबलोत्साह-);अकृशा (For शाः ); सदा; कृताः (For कृशाः); बलोत्सेकभाजोद्दिरकृशाः कृशाः;.
(०३) (१)यद्येवम्; यद्येतम्; यज्ञे तद् (For यद्येतद् ); एवम्; एव (For अहम् ); आज्ञास्ये; अज्ञाय्यं; आज्ञास्यं; अज्ञास्यां (For अज्ञास्यं ); यद्येवमिव यच्चास्य (२) वनवासं; वने वासो ( सं ); मे; नो; यद् (For वो ); धृतं (For ध्रुवं ); (३) शतशृङ्गे; शतं शृङ्गान्; ऋते (For मृते ); शतग्र्ग्य्हामृतापाण्डौ (४) नागमिष्य; ततस्त्वहम्; गजाह्वयम्.
(०४) (१)तं हि; धन्यो (For धन्यं ); वा (For वः ); मन्येस् (For मन्ये ); (२) यतः; तदा (For तथा ); तपो मे तादृशं कुतः०( तथा); तप (त्प )स्तस्वा मृतं तदा; तपो वै प्रशतं तदा; तपो नै०( तमेवै) तादृशं तथा; तपस्तस्य तु तादृशं; तपो वै तादृशं तदा; (३)या (For यः ); यः पुत्राभि( धि) गमं ( मः) प्राप्य; यः पुत्रानधिसं; पुत्रव्यसनम- प्राप्य; यः पुत्रापिमृतं प्राप्य; आधिं; पुत्राधिं; यमपुत्राधिमप्राप्य (४) स्वर्गस्थाम् (स्वर्ग) ;स्वर्गप्साम्; प्रियं; प्रियः (For प्रियाम्).

मन्ये तु माद्रीं धर्मज्ञां कल्याणीं सर्वथैव तु ।। ५०।।(०१)

रत्या मत्या च गत्या च ययाहमभिसन्धिता।
जीवितप्रियतां मे तां धिङ्मां च क्लेशभागिनीम् ।। ५१ ।।(०२)

लक्षालङ्कारः- मे जीवितमेव प्रियं यस्याः सा जीवितप्रिया तस्याः भावः जीवितप्रियता तां धिक् । क्लेशभागिनीं मां च धिक् ।

पुत्रका न विहास्ये वः कृच्छ्रलब्धान्प्रियान्सतः।
साहं यास्यामि हि वनं हा कृष्णे किं जहासि माम् ।। ५२ ।।
अन्तवत्यसुधर्मेऽस्मिन्धात्रा किं नु प्रमादतः।
ममान्तो नैव विहितस्तेनायुर्न जहाति माम् ।। ५३ ।।
हा कृष्ण द्वारकावासिन्क्वासि सङ्कर्षणानुज ।
कस्मान्न त्रायसे दुःखान्मां चेमांश्च नरोत्तमान्।
अनादिनिधनं ये त्वामनुध्यायन्ति वै नराः।

---

(०१) (१)ज्ञानां (For ज्ञानाम्); धन्यश्चातीन्द्रिय ज्ञाने ( ग्रामो);धर्मा ह्य (र्माच्च) तीन्द्रियज्ञानात्;धन्या चा ज्ञाना (२) दिवः; दिवं; इतः (For इमां); प्राप्तः ( प्राप्ता) (For प्राप्तां) प्रियां (For परां) परां (परा) गतिं; इतः प्राप्ता (प्तां) गतिं परा; इमां प्राप्यां गातिं पुरा; प्राप्तां (प्ता; प्तं; प्तो) वै परमां (मा) गतिं (३) मन्ये तु; नन्यथ; अन्ये तु; मन्ये माद्रीं च (For द्य माद्रीं) कल्याणीं (For धंर्मज्ञां) मत्तोद्य धर्मज्ञा (४) धर्मज्ञां; कल्याणां; कल्याणी सर्वदैव; तथैव; सर्वधैव (For थैव) तु; ह; च (For हि);.

(०२) (१)क- रत्या मत्या च गत्या च माह्याऽहमतिसन्धिता ।

क- न गत्या न च मत्या च । क- अभिवाद्य. मत्या गत्या; रत्या नत्या; मत्या धृत्या; मत्या र (रा) त्या; सत्या धृत्या; गत्या नत्या; न गत्या न; तस्या गत्या (For रत्या मत्या); रत्याय; गत्य्राद्य; पत्या च; मत्या च (For गत्या च)

(धिगस्तु जीवितं मह्यं केवलं क्लेशभाजनम् -पां)

(२) मां च; यथा (For यया); अतिसन्धिता; अतिशब्दिता; अतिसंहिता; अभिसंहिता; इति सन्धिता; इति संहिता; इति वञ्चिता, यथाहिमभिमां विना ; यथा च मन्तिसन्धिता जिता, (आवृता);

(३)-प्रियता (For तां ); मेतां, एतां (For मह्यं ); जीविताश्च प्रियतमां;

(४) धिन्द्रियं; धिङ् मां वै; धिङ् मां सं ; धिङ् मां धिक्; धिक् ( इमां); धग्धिङ् मां (For धिगिमां ); धिक्, मां क्लेशभा; क्लेशाभागितां; क्लेशभागिनी;.

तांस्त्वं पासीत्ययं वादः स गतो व्यर्थतां कथम्।
इमे सद्धर्ममाहात्म्ययशोवीर्यानुवर्तिनः।
नार्हन्ति व्यसनं भोक्तुं नन्वेषां क्रियतां दया।
सेयं नीत्यर्थविज्ञेषु भीष्मद्रोणकृपादिषु।
स्थितेषु कुलनाथेषु कथमापदुपागता।

हा पाण्डो हा महाराज क्वासि किं समुपेक्षसे।
पुत्रान्विवास्यतः साधूनरिभिर्द्यूतनिर्जितान् ।। ५४ ।।

सहदेव निवर्तस्व ननु त्वमसि मे प्रियः।
शरीरादपि माद्रेय मा मा त्याक्षीः कुपुत्रवत् ।। ५५ ।।

व्रजन्तु भ्रातरस्तेऽमी यदि सत्याभिसन्धिनः।
मत्परित्राणजं धर्ममिहैव त्वमवाप्नुहि ।। ५६ ।।

वैशम्पायनः

एवं विलपतीं कुन्तीमभिसान्त्व्य च ।
पाण्डवा विगतानन्दा वनायैव प्रवव्रजुः ।। ५७ ।।(०१)

लक्षालङ्कारः-अभिसान्त्व्य अन्तर्णीतो णिच्, अभिसान्त्वय्य ।

विदुरादयश्च तामार्तां कुन्तीमाश्वास्य हेतुभिः।
प्रावेशयद् गृहं क्षत्ता स्वयमार्तातुरा शनैः ।। ५८ ।।(०२)

लक्षालङ्कारः-आर्तातुराः शनैः इत्यत्र 'आतुरो भ्रमितो भ्रान्तः' इत्यभिधानात् आर्ताश्च ते आतुरा

---

(०१) (१)वैश्यं- उ (वैशं ); तथा (For एषं); विलपं(प) तीमिति पृथाम्; एवं विलपंर्ती कौन्तीम्; (२) अभिवाद्य;साङ्क्ष्य; अभीषान्त्य; अभिशान्त्य; अतिसान्त्व्य; इति सान्त्वं; (३) पाण्डवा सुमहातेजाः (४) निरुत्साहाः (For नायैव) प्रदुद्रुवुः; प्रचक्रमुः (For प्रवव्रजु).

(०२) (१)विदुराद्याश्च; रादयः (च); रोपि च; रश्चैव; रश्चापि; रो यश्च; आशु; कुन्तीम् (For आर्ता) विदुरस्तु ततामार्त (२) आर्ताम् (For कुन्तीम्) (३) प्रा (प्र) वेशयद्; प्रादेशयद् गृहान्; गृहे; (For गृहं) क्षत्तर्;

भ्रान्ताश्च आर्तातुराः ।

धार्तराष्ट्रस्त्रियस्ताश्च निखिलेनोपलभ्य तत् ।*
गमनं परिकर्षं च कृष्णाया द्यूतमण्डले ।*
रुरुदुः सुस्वरं सर्वा विनिन्दन्त्यः कुलकम् ।
दध्युश्च सुचिरं कालं करासक्तमुखाश्वजाः ।(०१)

राजा तु धृतराष्ट्रस्स शोकोपहतचेतनः।
क्षत्तुस्सम्प्रेषयामास शीघ्रमागम्यतामिति ॥ ५९ ॥(०२)
ध्यायमुरुद्विग्नहृऽदयः शान्तिं न स्माध्यगच्छत ।(०३)

रुरुदुः सुस्वनं सर्वा विनिन्दन्त्यः कुरून्भृशम्।
दध्युश्च सुचिरं कालं करासक्तमुखाम्बुजाः।

अ-कोशे-नात्राध्यायसमाप्तिर्दृश्यते
१. अ- कोशेषु अधिकफ पाठः
ततश्शब्दो महानासीत् सर्वेषामेव भारत।

---

क्षत्तः (For क्षत्तुः) प्रावेशयं भृशं क्रान्तां (४) भृशम् (For स्वयम्); आर्ततरां; तरः; आर्तातराः; आर्ततरैः; आर्तिकराः; आर्तातुराः स्वरैः (For शनैः ) तरस्वनैः०.

(०१) ( चापि (For ताश्च ); स्वजनाद्; स्वाज्जनाद् (For निखिलेन); च; वै (For तत्) सुस्वनं; सस्वनं; ससृतं; सस्वरं; विनिर्गत्य (For विनिन्दन्त्यः;)).

(०२) राजा च धृतराष्ट्रस्तु पुत्राणामनयं तदा।
ध्यायन्नुद्विग्नहृदयो न शान्तिमधिजग्मिवान्।
स चिन्तयन्ननेकाग्रः शोकव्याकुलचेतनः।

(१) स; (अ )पि; ; तु (For च ); च; तु, च; सम् (For स ); .

(०३) (अनयात् ; अनयास् (For ०यं) तथा (For तदा) कुरूणामनयात्तदा; शान्तिं नाध्यगच्छत; शातिमधिगच्छति; शान्तिमुपगच्छति; शतिमधिजग्मिवान्; शान्तिं नैवा (न सो-;वै ना); ध्यगच्छत; सश्चित एकाग्रश्चिन्तयामास; ) (२); मानसः (For चेतनः); शोकव्याकुलचेतनः (सः); शोकसन्तसमानसः;, शोकोपहतचेतनः; (३) सम्प्रेक्षयामास;.

अन्तःपुराणां रुदतां दृष्ट्वा कुन्तीं तथागताम् ॥ १ ॥
तस्यास्स्नेहं तु पुत्रेषु कृपणान् पाण्डवांश्च वै ।
दृष्ट्वा कुरूस्त्रियस्सर्वा रुरुदुश्शोकविह्वलाः ॥ २ ॥
ततः कुन्तीं समुत्सृज्य तदा राजा युधिष्ठिरः।
वने वस्तुं मतिं कृत्वा प्रतस्थे भ्रातृभिस्सह ॥ ३ ॥
ततस्सम्प्रस्थिते पार्थे निष्परिच्छदभूषणे ।
भृशं दुःखं बभूवाथ पुरे सर्वजनस्य वै ॥ ४ ॥
ततो हलहलाशब्दो जज्ञे पार्थस्य पृष्ठतः ।
नराणां प्रेक्षतां यान्तं पाण्डवं भृशदुःखितम् ॥ ५ ॥
ततस्स्त्रियः कोरववंशभृत्या
याश्चाप्यन्या हस्तिनसाह्वये..पि ।
तासां नादः प्रादुरभूत तदानीं
वनं प्रयाते धर्मराजे महात्मनि ॥ ६ ॥
तथा नादो रुदतीनां तदा....सीद्
राजन् दुःखात् कुररीणामिवोच्चैः ।
ततो निपेतुर्ब्रा ह्मणक्षत्रियाणां
विट्छूद्राणां चैव भार्यास्समन्तात् ॥ ७ ॥
यथा पुरा गच्छति राघवे वनं
शोको..योध्यायां हीनराज्ये बभूव ।
तथा शोको हस्तिनसाह्वये..भूत्
पार्थे वनं गच्छति हीनराज्ये ॥ ८ ॥
ततश्च सर्वे च जनास्समन्तात्
स्त्रियश्च वृद्धाश्च कुमारगाश्च ।
तथा वनं गच्छति धर्मराजे
शोकेनातां राजमार्गं प्रपेदुः ॥ ९ ॥

ततः प्रासादहर्म्येषु वसुधायां च भूमिषु ।
स्त्रीणां च पुरषाणां च सुमहान् निस्स्वनो..भवत् ।। १० ।।
ततश्शोकसमाविष्ट पाण्डवस्सपुरोहितः ।
स राजा राजमार्गेण न-नारीसङ्कुलेन च ।। ११ ।।
कथञ्चिन्निर्ययौ धीमान् कृष्णया च सहानुजैः ।। १२ ।।
स वर्धमानद्वारेण निस्सृत्य गजसाह्वयात् ।
निवर्तयामास च तं जनौघं दुःखितं बहु ।। १३ ।।
विसृज्यमानः पार्थेन जनौघश्शोकसङ्कुनः ।
पुरस्य न विवर्तेत पार्थस्नेहात् तथा नृपा ।। १४ ।।
ततो..ब्रवीद्धर्मराजो जनौघं स्नेहसंयुतम् ।
जनस्य हि कृतस्नेहो बाष्पगद्गदया गिरा ।। १५ ।।
युधिष्ठिरः-
यूयं हि सुहृदो..स्माकम् अस्मान् कृत्वा प्रदक्षिणम् ।
वृद्धैर्बालैस्सह स्भीभिर् निवर्तध्वं गृहान् प्रति ।। १६ ।।
विसृच्य खेदं देशं च भातृभिस्सह कृष्णया ।
वने द्वादश वर्षाणि वस्याम्येकं च वै तथा ।
द्रष्टा वः पुनरेत्यास्मि सर्वे सभ्मन्तुमर्हथ ।। १७ ।।

वैशम्पायनः-
श्रुत्वा च धर्मराजस्य वाक्यानि करुणानि च ।
रुरुदुस्सर्वतो राजन् सर्वे पौरास्स्भियश्च वै ।। १८ ।।
उत्तरीयैः करैश्चैव सञ्छाद्य वदनानि च ।
तज्जनाश्शोकसन्तप्ता मुहूर्तं पितुमातृवत् ।। १९ ।।
हृदयैश्शून्यभूतैस्ते धर्मपुत्रप्रवासनम् ।
दुःखं सन्धारयन्ति स्म नष्टसंज्ञा इवाभवत् ।। २० ।।

ते विनीय तमायासं धर्मराजवियोगजम् ।
शनैर्ब्रुवंस्तदा..न्योन्यं विनष्टास्स्म वयं त्विति ।। २१ ।।
ततो विसृज्य तान् राजान् प्रयाताः पाण्डवास्तदा ।। २२ ।।
ततस्सर्वे द्विजा राजन् पौराश्च स्त्रीगणैस्सह ।
विक्रुश्य विलपित्वा च स्नेहात् पार्थं ययुः पुनः ।
प्राक्रोशन् बहुधा तत्र विनपन्तः पुनः पुनः ।। २३ ।।
पापं प्रजानां धर्माद्धि दृश्यते बलवत्तरम् ।
श्रीया हीना बभूवुर्यत् पार्थाश्चपि सुधार्मिकाः ।। २४ ।।
एवमत्यर्थकारुण्यं वच आसीज्जनस्य हि ।। २५ ।।
ततः केचिन्महात्मानं विलपन्ति युधिष्ठिरम् ।
अपरे भीमसेनं तु विलपन्ति पुनः पुनः ।। २६ ।।
केचिद्वै विलपन्ति स्म पार्थं शस्त्रभृतां वरम् ।
कारुण्यान्नकुलं केचित् सहदेवं तथा..परे ।। २७ ।।
कृष्णां च राजपुर्भीं तां सततं सुखसंयुताम् ।
अनर्हां वननासस्य विलपन्त्यथ चापरे ।। २८ ।।
तेषां गुणांस्तथोद्दिश्य विलप्याथ पुनः पुनः ।
एवभूचुर्महाराजं पुनर्जानपदास्तथा ।। २९ ।।
तेषां विलपितं श्रुत्वा कुरवस्ससपहृद्रणाः ।
स्त्रीणां च पुरुषाणां च दुःखिताः प्रययुर्हिया ।। ३० ।।
ततः पार्थान् समालोक्य राजन् यातान् वने प्रति ।
भीष्मद्रोणकृपाश्चैव द्रौणिश्चैव तु सश्चयत्र्क ।। ३१ ।।
विदुरश्च विकर्णश्च तथा..न्ये कुरुपुङ्गवाः।
विप्राः पोराश्च राजेन्द्र तान् ययुश्शोककर्शिताः ।
न कश्चिदब्रवीत् तत्र धार्तराष्ट्रभयात् तदा ।। ३२ ।।
ततः केचिद् ब्रुवन्ति स्म ब्राह्मणा निर्भयास्तदा ।

शोजमानान् पाण्डुसुतान् अवेक्ष्य भरतर्षभ ।। ३३ ।।
ब्राह्मणाः-
विषमं पश्यते राजा सर्वथा तमसा वृतः ।
धृतराष्ट्रस्सुदुर्बुद्धिर् न च धर्मं प्रपश्यति ।। ३४ ।।
न हि पापमपापात्मा रोचयिष्यति पाण्चवः ।
भीमो वा बलिनां श्रेष्ठो जिष्णुर्वा सथिनां वरः ।। ३५ ।।
कुत एव महाप्राज्ञौ भाद्रीपुत्रां स्मरिष्यतक्ष ।
तद्राज्यं पितृतः प्राप्तं धृतराष्टो न मृष्यते ।। ३६ ।।
भीष्मद्रोणकृपादीनां अधर्ममखिलं भवेत् ।
ये तु वारयितुं शक्ता न शेकुस्तत्र ते तदा ।। ३७ ।।
विवास्यमानानारण्ये छलद्दूतेन पाण्डवान् ।। ३८ ।।
पितेव हि नृपो..स्माकम् अभूच्छान्तनवः पुरा ।
विचित्रवीर्यो राजर्षिः पाण्डुश्चैव सुधार्मिकः ।। ३९ ।।
अस्मिन् वै पुरुषव्याघ्रे विप्रवासं गते सति ।
धर्मशीलानिमान् प्राज्ञान् सहितान् पश्य पाण्डवान्।
धृताराष्ट्रस्सपुत्रो वै नित्यं दुष्टो न मृष्यते ।। ४०।।
वयमेतदमृष्यन्तस् सर्व एव पुरोत्तमात् ।
कुरून् विहाय गच्छामोयत्र याति युधिष्ठिरः ।। ४१ ।।
वैशम्पायनः-
तांस्तथा वदतो विप्रान् दुःखितान् दुःखकर्शितः ।
उवाच परमप्रीतो धर्मराजो युधिष्ठिरः ।। ४२ ।।
युधिष्ठिरः-
परो वृद्धो गुरुश्रेष्ठो धृतराष्ट्रः पिता मम ।
अवश्यकार्या तत्प्रीतिर् अस्माभिरिति नो व्रतम् ।। ४३ ।।
भवन्तस्सुहृदो..स्माकम् अस्मान् कृत्वा प्रदक्षिणम् ।

पुत्रैर्दारैश्च दासैश्च निवर्तध्वं गृहान् प्रति ।। ४४ ।।
द्रष्टा वः पुनरेवास्मि त्रयोदशसमागमे ।। ४५ ।।
वैशम्पायनः-
इत्युकत्वा धर्मराजोऽथ तूष्णीभ्भूत्वा जगाम ह ।। ४५ ।।
जनमेजयः-
कथं प्रयाताः पार्थास्ते पुरादारण्यकं प्रति ।
निकृथ्या धार्तराष्ट्रैश्च तन्मे ब्रूहि द्विजोत्तम ।। ४६।।
वैशम्पायनः-
तथा वृत्तं महाराज पार्थानां गमनं श्रुणु ।। ४७ ।।
यथा रामः पुरं त्यक्त्वा पुरा..योध्यां वनं ययौ ।
लक्ष्मणेन सह भ्रात्रा सीतया चैव भार्यया ।। ४८ ।।
कैकेय्या कुब्जया चैव राज्ञा दशरथेन च ।
राज्यद्विभ्रंशितस्तैस्तु श्रियं त्यकत्वा वनं ययौ ।। ४९ ।।
तथैव पाण्डुपुत्रो..थ धर्मराजो नृपोत्तमः ।
दुर्योधनेन नीचेन बलिना सौबलेन च ।। ५० ।।
राज्ञा च धृतराष्ट्रेण छतद्यूते त्रिभिस्स्थितैः ।
राज्याद्विभ्रंशितो राजा सतां धर्ममनुस्मरम् ।। ५१ ।।
पुरं नागाह्वयं त्यकत्वा श्रियं चैव सुदुर्लभाम् ।
भ्रातृभिस्सह राजेन्द्र कृष्णया सह भार्यया ।। ५२ ।।
(एतावत्पर्यन्तं अधिक पाठः )

ततो जगाम विदुरो धृतराष्ट्रनिवेशनम्।
तं पर्यपृच्छत्संविग्नो धृतराष्ट्रो नराधिपः ।। ६० ।।(०१)

(०१) (२)धृतराष्ट्रस्य शासनात् (३) संविज्ञो; घ्नो तमपृच्छत्सुसंविग्नो; (४) जनाधिपः ( प); जनेश्वरः ( र); नराधिप (For पः) अनुद्यूत; द्यूत ; वनप्रवेश (प्रस्थान), जनप्रलापः;.

**अस्मिन्  पर्वाणि ७०अध्याये ६०३लोकाः सन्ति**

अनुद्यूतपर्वणि(५) **पञ्चमोऽध्यायः ।**

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां सभापर्वणि अनुद्यूतपर्वणि द्रौपदीकुन्तीसवादे  सप्ततितमोऽध्यायः।। ७०।।**

# ७१.एकसप्ततितमोऽध्यायः

## 02- 07-71

धृतराष्ट्रेण विदुरं प्रति पाण्डवानां वनप्रस्थानसमये चेष्टाविशेषप्रश्ने विदुरेण.तत्तच्चेष्टा-विशेषकथनपूर्वकं तत्तदभिप्रयाविष्करणम् ।। १ ।। नारदेनधृदराष्ट्रसभायां चतुर्दशै वत्सरे कौरवाणां विनाशकथनम् ।। २ ।। दुर्योधनादीनां द्रोणशरणागतिः ।। ३ ।। द्रोणेन दुर्योधनाय हितोपदेशः ।। ४ ।।

धृतराष्ट्रः

कथं गच्छति कौन्तेयो धर्मपुत्रो युधिष्ठिरः।

भीमसेनः सव्यसाची माद्रीपुत्रौ च पाण्डवौ ।

**तमागतमथो राजा विदुरं दर्विदूलर्शिनम्।**

**साशङ्क इव पप्रच्छ धृतराष्ट्रोम्बिकासुतः**(०१)

धौम्यश्चैव कथं क्षत्तर्द्रौपदी च यशस्विनी ।। १ ।।(०२)

श्रोतुमिच्छाम्यहं सर्वं तेषां शंस विचेष्टितम् ।। २ ।।(०३)

---

(०१) सशङ्क एव (For इव )  (१)गच्छन्ति; (२)पुत्रो (Forराजो ); (३) वायुपुत्रः सष्यसाची (४) पाण्डवै (Forतावुभै).

(०२) (१)ऽपि हि चापि (For चैव );तु तच्छुत्वा; कथं क्षन्त; क्षयं क्षत्तर; कथं क्षत्त (त्ता) धौम्यः पुरोहितश्चैव; (२); च; सा (Forवा ); यशस्विनी (स्विनां); तपस्विनीं;.

(०३) (१)ज्ञातुम् (Forश्रोतुम् ) तं; तत् (For अ हं ); सर्वान्; त्वत्तः (For सर्वं ); (२)शंस; वहु; त्वज्र

विदुरः

वस्त्रेण संवृत्य मुखं कुन्तीपुत्रो युधिष्ठिरः।
बाहू विशालौ सम्पश्यन्भीमो गच्छति पाण्डवः ।। ३ ।।(०१)

सिकता वपन्सव्यसाची राजानमनुगच्छति।
माद्रीपुत्रः सहदेवो मुखमालिप्य गच्छति ।। ४ ।।(०२)

पांसूपलिप्तसर्वाङ्गो नकुलश्चित्तविह्वलः।
दर्शनीयतमो लोके राजानमनुगच्छति ।। ५ ।।(०३)

कृष्णा तु केशैः प्रच्छाद्य मुखमायतलोचना।
दर्शनीया प्ररुदती राजानमनुगच्छति ।। ६।।(०४)

धौम्यो रौद्राणि सामानि याम्यानि च विशाम्पते।
गायन्गच्छति मार्गेषु कुशानादाय पाणिना ।। ७ ।।(०५)

धृतराष्ट्रः

विविधानीह रूपाणि कृत्वा गच्छन्ति पाण्डवाः।

---

गति (Forअङ्ग ); तेषामिगितचेष्टितं;.

(०१) (१)संवृतमुखः खं सवृता मुख्यं; संहत्य मुखं; (२)अगच्छद्धर्म राडसौ; (३)कृत्वा च; सम्पश्यन् (४) बान्धवः (Forपाण्डवः );.

(०२) (१)सिकतां; सिक्ता; सिकतान् सिकताष्किरन् वसन्; किरन् (Forवपन् ); सिक्ताश्चैवा ( सिकतां च ) वपन्पार्थो सि (शि) कतास्तु तांस्तु; ता वि-) किरन् जिष्णुः सिकतोपलान्त्यव्यसाचीः सकलापं सव्यं; (२)उप (Forअनु-) (३)सुतः पुत्र (For पुत्रः ); सहदेवोपि धीरस्तु;.

(०३) पांसूपचितसर्वाङ्गो; (१) पांसूपचितसर्वागो पांशू (For पांसू ) (२)चात्र (Forचित्त ); नकुलश्चिन्तयान्वितः; (३)वीरो (Forलोके ); (४)अधिगच्छति;.

(०४) (१)केशैश्च विच्छाद्य; केशप्रवि; च केशैः प्र केशैः समा; तु केशैः प्र (Forकेशैः प्रतिच्छाद्य ); (३)च रुदती; प्ररुदति;.

(०५) सौम्यो (Forधौम्यो ); याम्यानि धौम्यः याम्यानि रौद्राणि; सौम्यानि; मन्त्राणि (Forसामानि ); तु (For च ); रौद्रोक्तानि च विक्रमे (३)विगायन् (For गायन् ); मार्गेण; मार्गस्य; मार्गो वै (For मार्गेषु );.

तन्ममाचक्ष्व विदुर एवं कस्माद् व्रजन्ति ते ।। ८ ।।(०१)

लक्षालङ्कारः-एवं कस्मात् इत्यत्र अहं ते ब्रवीमि । तन्निमित्तं ममाचक्ष्वेति योजना

विदुरः

निकृतस्यापि ते पुत्रैर्हृते राज्ये धनेषु च ।
न धर्माच्चलते बुद्धिर्धर्मराजस्य धीमतः ।। ९ ।।(०२)

लक्षालङ्कारः-निकृतस्यापि इत्यत्र निकृतविषयतया कृतः निकृतः तस्यापि ।

योऽसौ राजा घृणी नित्यं धार्तराष्ट्रेषु भारत।
निकृत्या भ्रंशितः क्रोधान्नोन्मीलयति लोचने ।। १० ।।(०३)

नाहं जनं निर्दहेयं दृष्ट्वा घोरेण चक्षुषा।
स पिधाय मुखं राजा तस्माद्गच्छति पाण्डवः।(०४)
यथा च भीमो व्रजति तन्मे निगदतः शृणु ।। ११ ।।(०५)

---

(०१) ह च वि (For(इ)ह) ईदृग्विधानि चिह्नानि कृत्वा पार्थो महामते (३) तत्समा; (Forतन्ममा ); सर्वाणि (Forविदुर); (४) कृच्छ्राद् (Forकस्माद् );.

(०२) (१)क-निकृतैराहृते पुत्रैस् तव राज्ये धनेऽपि च। क- विकृतस्यापि । गृ निकृतस्यापि ।
निकृतैः स्वानि; निकृत्यापि च; निष्कृतस्यापि; निकृतैस्यापि पुत्रो; पुत्रैस्ते (स्तु) निकृतैराहृते पुत्रैस् (२) हृत तव भृत्यै (Forहृते) राज्य (Forराज्ये) धनेपि (Forधनेषु) वा (Forच) धर्मराजस्य धमितः हृतराज्यधनस्य च (३) धर्मान्न च्यवते (Forचलते) स नो न धर्माच्चमते (४) भारत (For धीमतः) हृतराज्यधनस्य च.

(०३) (१)धर्मराजो; योसौ राजन्; यो हि राजा; (२) धार्तराष्ट्रेण; धृतराष्ट्रेषु; (३) निकृतो (For त्या ); वञ्चितः क्रोधात्; भ्रंशि (भ्रमि) तः क्रोधात्; क्रोधसन्तप्ते; क्रोधसंरक्तो; क्रोधसन्दीप्तो (Forक्रोधसन्तप्तो ); तेन्तेन्मीलितलोचनः.

(०४) (१)नेमं (Forनाहं ); जनान्; मत्या; जानन् (For जनं ); (२) नाहं घोरेण; क्रोधदीप्तेन; (३)सुविधाय; अपिधाय; पिधाय तु; विधायाति (Forस पिधाय ); तस्मात् (Forराजा ); (४) तद्वद्; राजा; तत्र; स हि (For तस्माद्); तस्माद्गच्छन्ति पाण्डवाः;.

(०५) (१)द्रवति व्रजते; यथा भीमोपि गच्छति यथा भीमो व्रजति स; यथा व्रजनै् व्रजद्; व्रजेद् भीमसेनः (२) बै; ते (For मे) निगदितः; तितं, दितं (For दतः );.

बाह्वोर्बले नास्ति समो ममेति भरतर्षभ।[०१]
बाहू विशालौ कृत्वासौ तेन भीमोऽपि गच्छति ।। १२ ।।

बाहू विदर्शयन्राजन्बाहुद्रविणदर्पितः।
चिकीर्षन्कर्म शत्रुभ्यो बाहुद्रव्यानुरूपतः ।। १३ ।।[०२]

प्रदिशञ्छरसम्पातान्कुन्तीपुत्रोऽर्जुनस्तदा ।
सिकता वपन्सव्यसाची राजानमनुगच्छति ।। १४ ।।[०३]

असक्ताः सिकतास्तस्य यथा सम्प्रति भारत।
असक्ताः शरवर्षाणि तथा मोक्ष्यति शत्रुषु ।। १५ ।।[०४]

लक्षालङ्कारः-असक्ताः, शरवर्षाणि इत्यत्र स्वमुक्तशराः असक्ताः अन्योन्यमसक्ताः यथा स्युस्तथा । इदं चोपलक्षणम् । असङ्ख्याताश्चेत्यपि द्रष्टव्यम् ।

न मे कश्चिद्विजानीयान्मुखमद्येति भारत।
मुखमालिप्य तेनासौ सहदेवोऽपि गच्छति ।। १६ ।।[०५]

---

(०१) (१)बाहोर् (Forबाह्वोर् ); (२) मयेतिः मेनेति मामेति (Forममेति ); पुरुषर्षभ;.
(०२) (१)दृष्ट्वा (For कृत्वा ) ( अ )सौ च; ( अ )थ (For तु) तु; (२) ततो ( तेन ); भीमोप भीमस्तु भीमोऽपि); भीमसेनोनु नः स्म नश्च नोधि गच्छति (३)मानोपि; मानस्य (Forमानो हि) बाहू विदर्शयत्राजन् (Forदर्पितः); चिकीर्षुः (Forर्षन्) दुष्करं कर्म कर्म शत्रूणां कर्म शत्रुघ्नो चिकीर्षतं स्वबाहुभ्यां बाहुद्रव्यानुरूपितं; द्रव्यानि रूपतः बाहुभ्यां वै वृकोदरः; बाहुवीर्यानुरूपतः; द्रव्यानुसारतः द्रविणरूपतः.
(०३) (१)प्रादिशत्; प्रादिशन्; प्रविशन्; प्रदर्शन्; अनिशं (Forप्रदिशन्) शरपातांश्च; शः (सु ) रसङ्घातान् (वादान्) (२)कुन्ति (ऽ) र्जुनस्तथा; (ऽ)र्जुनः सदा; धनञ्जयः (३) सिकता; सिकतान् सिक्ता (Forसिकता) वसन् सिकतास्तु वर्षन्पार्थोपि सिकतावत्सव्यसाची;.
(०४) (१)अशक्ताः; असङ्ख्या (? ख्या); असक्ताः यद्वत् (Forतस्य ) (२)तस्य (Forयथा) (३)असक्त अशक्तं; अस्यन्तं; असङ्ख्य (Forअसक्त ); असक्ताचरवर्षाणि; (४) मोक्ष्यामि; मोक्षति (For मोक्ष्यति); फल्गुणः (नः) (Forशत्रुषु).
(०५) (१)न तेषां तद् (Forन मे कश्चिद्) प्रपश्येत; प्रगृह्येत; विजानीय्य (Forविजानीयान् ); (२)दुःखम् (Forमुखम्); मुखमभ्येति; मभ्येत्य; मध्येति; मात्रेति; मात्रेति (Forमद्येति) गच्छति (Forभारत ); (३) आलोप्य आलिप्स्य (Forआलिप्य ); ( अ )पि (For(अ) सौ ); (४)देवापु देवोनु देवेति (Forदेवोऽपि ); भारत (Forगच्छति );.

नाहं मनांस्याददेयं मार्गे स्त्रीणामिति प्रभो।
पांसूपलिप्तसर्वाङ्गो नकुलस्तेन गच्छति ।। १७ ।।(०१)

एकवस्त्रा प्ररुदती मुक्तकेशी रजस्वला।
शोणितेनाक्तवसना द्रौपदी वाक्यमब्रवीत् ।। १८ ।।(०२)

यत्कृतेऽहमिदं प्राप्ता तेषां वर्षे चतुर्दशे।
हतपत्यो हतसुता हतबन्धुजनप्रिया: ।। १९ ।।(०३)

**लक्षालङ्कारः- हता पत्या इत्यत्र पत्या जात्येकवचनम् । स्वस्वपतिभिः वैधव्यं प्रापयित्वा मृतप्रायाः कृताः ।**

बन्धुशोणितदिग्धाङ्ग्यो मुक्तकेश्यो रजस्वलाः।
एवं कृतोदका भार्याः प्रवेक्ष्यन्ति गजाह्वयम् ।। २० ।।(०४)

**लक्षालङ्कारः-रजस्वलाः रणभूमौ स्वस्वपतिशवालिङ्गनेन धूलीधूसरिताङ्ग्यः ।**

कृत्वा तु नैरृतान्दर्भान्धीरो धौम्यः पुरोहितः।
सामानि गायन्याम्यानि पुरतो याति भारत ।। २१ ।।(०५)

---

(०१) (१) नासां (Forनाहं) आददीयं (यां) आददीयान् आवदीयां (Forआददेयं) (२) मार्गं (Forमार्गे) प्रभुः (Forप्रभो ); (३)अ-घ-पांस्पचित । पांसूपलिप्त; जित; चित्र (Forचित) पांशू (४) ख-घ-ङ-स्तेनु । चित्तविह्वलः; तेनुगच्छती (Forतेन ग).

(०२) (१) प्र उ (For तु) रुदन्ती तु (Forतु रुदती) (२) मुक्तकेशा; (३)क- तार्द्राक्त । शोणिताक्तै (द्रैं) कवसना; शोणितेनाक्त; शोणितादृक्त तार्द्राक्त० (४)याति भारत; चेदमब्रवीत्; वानुगच्छति (Forवाक्यमब्र).

(०३) (१)इति; इमं इदं (Forइमां ); यैः कृतेयं ममावस्था; यैरेवं प्रापिता याहं; (२)त्रयोदशे; चतुर्दश (३) हतापत्याः हता ता नाथा; हतपत्या (हतभर्तृकाः); हतपल्योः हतवत्यो; हतपत्या इत्यत्र । पत्या जात्येकवचनम् । स्वस्वपतिभिः वैधव्यं प्रापयित्वा मृतप्रायाः कृताः (४) हतवन्धुर्हतप्रियाः; हतबन्धुजनाः स्त्रियः प्रियाः हतबन्धुहतप्रियाः; हतभ्रातृसुतप्रियाः;.

(०४) (१)मांस-; बहु बन्ध नार्यः पांसु (Forबन्धु) दिग्धाङ्गा; दिग्धाग्र्यं (Forदिग्धाङ्ग्यो ); भार्याः (Forनार्यः); (४)प्रवेक्ष्य (क्ष) ति प्रवेक्ष्य गजसाह्वयं.

(०५) विदुरः (१)नैर्हतान्; नैकृतान्; वै स तान्; नैर्ऋतान् दभर्यान् कृत्वा नैनृतिकान्धर्मान् (२) वीरो; श्रीमान् (Forधारा ); धौम्यः, धौम (Forम्यः); पुनः पुनः (Forपुसे); (३)समानि; सामानि गायतम्यानि;

हतेषु भरतेष्वाजौ कुरूणां कुरवस्तदा ।
एवं सामानि गास्यन्तीत्युक्त्वा धौम्योऽपि गच्छति ।। २२ ।।(०१)

लक्षालङ्कारः-कुरूणां कुरव इत्यत्र कुरवः प्रेतकर्मकरणशीलाः पुरोहिताः।

प्रस्थाप्य पाण्डवश्रेष्ठान्निःशेषस्ते भविष्यति ।*
इति धौम्यो व्यवसितो रौद्रसामानि गायति ।। २३ ।। (०२)

लक्षालङ्कारः-निश्शेषस्ते भविष्यति इत्यत्र ते वंशः । रौद्रान् याम्यानि गायति इत्यत्र रौद्रान् भयङ्करमन्त्रान्, याम्यानि सूक्तानि ।

धृतराष्ट्रः
किमधुवन्नागरिकाः किं वै जानपदा जनाः ।*
सर्वं तत्त्वेन चाचक्ष्व क्षत्तः सर्वमशेषतः ।*
विदुरः
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा येऽन्ये वदन्त्यथ ।
तच्छणुष्व महाराज त्वत्कृते च मया तव ।(०३)
हा हा गच्छन्ति नो नाथाः समवेक्षध्वमीदृशम्।
इति पौराः सुदुःखार्ताः क्रोशन्ति स्म पुनः पुनः।(०४)

---

न्यामानि; न्वाम्यानि; न्याम्नानि; न्यार्तानि; गायन्त्यन्यनि; याम्यानि (४) रौद्रान्प्रति ययौ तदा;.

(०१) (१)निहते; भरते (For हतेषु); भरल्गेवाजौ; पाण्डवैः (Forकुरूणां); कौरवा (कुरवः) स्त्रियः (Forगुरवस्तदा); कुरवसू (Forगुरवसू); कुरवः प्रेतकर्मकरणशीलाः पुरोहिताः तथा (Forतदा ); (३)क- गायन्ती, समानि; भा (ना) मानि, गायन्ति (तु); जल्पन्ति; गायेयुर (Forगास्यन्ति); (४)कृत्वा; त्यक्त्वा; इति (For(इ)त्युक्तवा (ऽ)प तु (Forऽपि);.

(०२) (१) क- श्रेष्टान् । वान् श्रेष्ठान्; वान् शेषं, वानंशो; वान् श्रेष्ठो; वान्पुत्रान् (Forवश्रेष्ठान्); (२)निःशेषं ते भविष्यति; ते भविष्यन्ति संवृताः याम्यानि (Forसामानि); नागरिकाः जानपदाः;.

(०३) (१) वा (For वै) किं ब्रवंस्ते महाभागा किं वा नागरिका जनाः;(२)क- श्रेष्ठान् । मह्यं तथ्यं च; सर्व तथ्येन; (३)मह्यं तथ्येन सर्व तथ्यं ममाचक्ष्व ये न; चान्ये (For येन्ये); (४) अ- सौद्रयाभ्यानि । वक्ष्यते (Forत्वत्कृते); यथाभवत् (Forमया तव).

(०४) प्रकृतयः; (१)गच्छति भो; ये (Forनो); नाथ; नाथः (२)समवेवक्षन्त समवैक्षध्वम् वेक्ष्यध्वम् सामवे ईहृशाः (Forईदृशम्); विपिनं कथमीदृशाः.

अहो धिक्कुरुवृद्धानां बालानामिव चेष्टितम्
राष्ट्रेभ्यः पाण्डुदायादाँल्लोभान्निर्वासयन्ति ये।
अनाथाः स्म वयं सर्वे वियुक्ताः पाण्डुनन्दनैः।
दुर्विनीतेषु लुब्धेषु का प्रीतिः कौरवेषु नः।
अहो धिक्कुरुवृद्धानां बालानामिव चेष्टितम् ।
राष्ट्रेभ्यः पाण्डुदायादाघँलोभान्निर्वासयन्ति ये ।
अनाथाः स्म वयं सर्वे वियुक्ताः पाण्डुनन्दनैः ।
दुर्विनीतेषु लुब्धेषु का प्रीतिः कौरवेषु नः ।[०१]

एवमाकारलिङ्गैस्ते व्यवसायं मनोगतम्।
कथयन्तश्च कौन्तेया वनं जग्मुर्मनस्विनः ।। २४ ।।[०२]

एवं तेषु नराग्र्येषु निर्यत्सु गजसाह्वयात्।
अनभ्रे विद्युतश्चासन्भूमिश्च समकम्पत ।। २५ ।।[०३]

राहुरग्रसदादित्यमपर्वणि विशाम्पते।
उल्का चाप्यपसव्येन पुरं कृत्वा व्यशीर्यत ।। २६।।[०४]

प्रत्याहरन्तः क्रव्यादा गृध्रगोमायुवायसाः।

---

(०१) (४)क्रोशन्ति च; शोचन्ति स्म शोचयन्ति; पुनः पुनः (Forसमन्ततः );.

(०२) (१)तैर्; च (For ते) एवमाकारलिङ्गास्ते; माकारलिप्ताङ्गैस्ते मादिभिलिङ्गैस्ते; माकुलिताङ्गैस्ते; माकुललिङ्गैस्ते; (२)व्यवसाय; यं (३)कथयति; प्रथयन्तः; दर्शयन्तः;
कथयन्तं; च (Forस्म ); कौतेय (४) जनं (वनं); यशस्विनः; मनीषिणः (Forमनस्विनः );.

(०३) (१)नराग्रेषु (२)निर्यात्य; गच्छत्सु (Forनिर्यत्सु ); निर्गच्छत्सु (निर्गतेषु; निर्यायत्सु) गजाह्वयात् निर्यत्सु (३)अमेघाः अनभ्र अनभो (Forअनभ्रे ); ( अ )हं ( आ ) सीद् (Forआ सन् ); (४)समकम्पत मेदिनी;.

(०४) (१)आग्रसद्; राहुग्रञ्ग्रहादित्यम्; राहुग्रस्ते सदादित्यम् (२) सपर्वाणि विशां पति (३)उल्का वा; उल्काश्च शुकाश्च (Forउल्काच) असद्यं तान् अतसव्यं तान् अथ (अप) सष्यं तत् अपसव्येन अपसव्यं हि सव्यं उ (अ) पसर्पते (Forअपसव्यं तु) उल्काप्रदक्षिणं तत्र उल्का चास्य च सव्येन उलूकां व्यपसव्यं ते (४) पुरा दूरं (Forपुरं) पुरस्कृत्वा पुरः कृत्वा (For पुरं कृत्वा) विशीर्य ते विदीर्यत व्यकीर्यते.

देवायतनचैत्येषु प्राकाराट्टालकेषु च ।। २७ ।।[०१]

लक्षालङ्कारः-प्रव्याहरन्त इत्यत्र प्रकर्षेण व्याहरन्तः स्वस्वध्वनिं कुर्वन्तः। 'व्याहारोदीरणकथनादयश्च तद्भेदाः' इति हलः ।

एवमेते महोत्पाताः प्रादुरासन्दुरासदाः।
भरतानामभावाय राजन्दुर्मन्त्रिते तव ।। २८ ।।[०२]

वैशम्पायनः

**एवं प्रवदतोरेव तयोस्तत्र विशाम्पते।**
**धृतराष्ट्रस्य राज्ञश्च विदुरस्य च धीमतः।**

वैशम्पायनः-

एवमुक्त्वा तु विदुरस्तूष्णीमासीद्विशां पते ।। २९ ।।

नारदश्च सभामध्ये कुरूणामग्रतः स्थितः।
महर्षिभिः परिवृतो रौद्रं वाक्यमुवाच ह ।। ३० ।।[०३]

नारदः

इतश्चतुर्दशे वर्षे विनक्ष्यन्तीह कौरवाः।
दुर्योधनापराधेन भीमार्जुनबलेन च ।। ३१ ।।[०४]

---

(०१) (१) प्रत्याहरन्तः (त) प्रव्याहरन्त प्रत्याहरन्ति प्रव्याहरन्तः कौरव्या (For कव्यादा) (२)गृध्रौ वळा व्याघ्र (Forगृध्र) (३) देवता येन चैत्येषु दैवायतन देवतायतने चैत्ये (४) प्रासा (ना) दा (Forप्राकाश).

(०२) (१)एतन् आसीन् एव; जाता (Forएते ); महाराज (Forमहोत्पाता);

(२)वनं गच्छा च्छ ति पाण्डवाः (वे) प्रादुरासन्दुरासदाः (दः) दारुणा भयसंशिनः; समुद् (सप्र समं; समद्) भूता भयावहाः (महाभयाः); वनं गच्छत्सु पाण्डुषु;

(३)भरतानाम् विनाशाय (Forअभावाय ); (४) राजा (For राजन् ) .

(०३) वैशं उं (१) तु (Forच ); (२) ततः (Forस्थितः); (४) जगाद (Forउवाच );.

(०४)नारदः (२) विनंस्यन्ति विनक्षन्ति विनक्ष्यन्ति विनश्यन्ति विनङ्क्षन्ति इ ति हि (Forइ ह) विनशिष्यन्ति कौरवाः

(३) दुर्योधनापराद्देन (४) भीमसेनबलेन च .

वैशम्पायनः-

इत्युक्त्वा दिवमाक्रम्य क्षिप्रमन्तरधीयत।
ब्राह्मीं श्रियं सुविपुलां बिभ्रद्देवर्षिसत्तमः ।। ३२ ।।(०१)

धृतराष्ट्रः

किमब्रुवन्नागरिकाः किं वै जानपदा जनाः।
मह्यं तत्त्वेन चाचक्ष्व क्षत्तः सर्वमशेषतः ।। ३३ ।।

विदुरः

ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा येऽन्ये वदन्त्यथ ।
तच्छृणुष्व महाराज वक्ष्यते च मया तव ।। ३४ ।।

हा हा गच्छन्ति नो नाथाः समवेक्षध्वमीदृशम्।
इति पौराः सुदुःखार्ताः शोचन्ति स्म समन्ततः ।। ३५ ।।

ततः पौराश्च दीनास्ते गते पार्थे वनं तथा ।
गावो हीना यथा वत्सैः पुरं प्रिविशुः पुनः ।। ३६ ।।

तदहृष्टमिवाकूजं गतोत्सवमिवाभवत्।
नगरं हास्तिनपुरं सस्त्रीवृद्धकुमारकम्।
सर्वे चासन्निरुत्साहा व्याधिना बाधिता यथा ।। ३७ ।।

पार्थान्प्रति नरा नित्यं चिन्ताशोकपरायणाः।
तत्र तत्र कथां चक्रुः समासाद्य परस्परम् ।। ३८ ।।

कुन्ती च भृशदुःखार्ता पुत्रैस्सर्वैर्विवर्जिता ।
हीनवत्सा यथा धेनुर् विललाप सुदुःखिता ।। ३९ ।।

---

(०१) (१) गृहम् (Forदिवम्) (३) ब्राहयां स्त्रियं (Forब्राही श्रीयं) स विपुलां च वपुषा दीप्यमानां; सुचिर्विर्धा (४) बिभ्रन्, तां तां; विप्रो (For बिभ्रद् ); देवार्षिसत्तम.

वनं गते धर्मराजे दुःखशोकपरायणाः।

बभूवुः कौरवा वृद्धा भृशं शोकेन पीडिताः ॥ ४० ॥

ततः पौरजनः सर्वः शोचन्नास्ते जनाधिपम्।

कुर्वाणाश्च कथास्तत्र ब्राह्मणाः पार्थिवं प्रति ॥ ४१ ॥

ब्राह्मणाः

कथं नु राजा धर्मात्मा वने वसति निर्जने।

तस्यानुजाश्च ते नित्यं कृष्णा च द्रुपदात्मजा ॥ ४२ ॥

सुखार्हापि च दुःखार्ता कथं वसति सा वने ॥ ४३ ॥

विदुरः

एवं पौराश्च विप्राश्च सदाराः सहपुत्रकाः।

स्मरन्तः पाण्डवान्सर्वे बभूवुर्भृशदुःखिताः ॥ ४४ ॥

आविद्धा इव शस्त्रेण नाभ्यनन्दन्कथञ्चन।

सम्भाष्यमाणा अपि ते न कञ्चित्प्रत्यपूजयन् ॥ ४५ ॥

न भुक्त्वा न शयित्वा ते दिवा वा यदि वा निशि।

शोकोपहतविज्ञाना नष्टसञ्ज्ञा इवाभवन् ॥ ४६ ॥

यदवस्था बभूवार्ता ह्ययोध्या नगरी पुरा।

रामे वनं गते दुःखाद्धृतराज्ये सलक्ष्मणे ॥ ४७ ॥

तदवस्थं बभूवार्तमद्येदं गजसाह्वयम्।

गते पार्थे वनं दुःखाद्धृतराज्ये सहानुजैः ॥ ४८ ॥

वैशम्पायनः

विदुरस्य वचः श्रुत्वा नागरस्य गिरं च वै।
भूयो मुमोह शोकाच्च धृतराष्ट्रः सबान्धवः ।। ४९ ।।

ततो दुर्योधनः कर्णः शकुनिश्चापि सौबलः।
द्रोणं दीपममन्यन्त राज्यं चास्मै न्यवेदयन् ।। ५० ।।(०१)

लक्षालङ्कारः-द्रोणं दीपम् इत्यत्र भयान्धकारपरिहाराय दीपस्थानीयं दीपं द्रोणम् ।

अथाब्रवीत्ततो द्रोणो दुर्योधनममर्षणम्।
दुःशासनं च कर्णं च सर्वानेव च भारतान्।(०२)

द्रोणः-

अवध्यान्पाण्डवान्प्राहुर्देवपुत्रान्द्विजातयः ।। ५१ ।।

अहं वै शरणं प्राप्तान्वर्तमानो यथाबलम्।(०३)
गन्ता सर्वात्मना भक्त्या धार्त्तराष्ट्रान्सराजकान् ।। ५२ ।।(०४)

नोत्सहेयं परित्यक्तुं दैवं हि बलवत्तरम् ।। ५३ ।।(०५)

धर्मतः पाण्डुपुत्रा वै वनं गच्छन्ति निर्जिताः।

---

(०१) (१)वैशं उं (वैशं ); दुःशासनः (For दुर्योधनः ); (२) चैव (Forचापि) (३)भीष्मम्; स्वीयम्; दीपम्; द्वीपम् द्रोणं च समपद्यन्त; द्रोणं सम्प्रणिपत्याथ (४) शज्ञश् (Forराज्यं) चास्मिन् तस्मै (Forचास्मै) न्यवेदयत्.

(०२) (१) कृपो तदा; तथा (Forततो ); (२)अकर्षणं; अमर्षणः; अमर्षिणं; (४)भारत (Forतान्); तान्सर्वानेव भारतान्.

(०३) (१)प्राहुर् (Forअहुर्) (२)विजानत (Forद्विजातयः); उवाच;
(३) वै (Forतु ); कारणान् चरणं (Forशरणं); तेषां (Forप्राप्तान्) अहं शरीरसम्प्राप्तो
(४) वर्तमानान् माना धार्तराष्ट्रान् (Forवर्तमानो) क्रमं (Forबलम्).

(०४) (१)गता गन्ता (Forगातान्) सराजकान् (Forसर्वात्मना) भक्षयिष्ये च आगतान्नात्मना भक्तया.

(०५) (१) समाकुलान् सबालकान् (For सराजकान्) (२) नोत्सहेयमभि हमभि यं परि त्यक्तुं (४) दैवं देव (Forदैव) परः दैवं हि बलवत्तरं.

ते च द्वादश वर्षाणि वने वत्स्यन्ति पाण्डवाः ।। ५४ ।।(०१)

चरितब्रह्मचर्याश्च क्रोधामर्षवशानुगाः।

वैरं निर्यातयिष्यन्ति महद्दुःखाय पाण्डवाः ।। ५५ ।।(०२)

मया च भ्रंशितो राजन्द्रुपदः सखिविग्रहे।

पुत्रार्थमयजद्राजा वधाय मम भारत ।। ५६ ।।(०३)

याजोपयाजतपसा पुत्रं लेभे स पावकात्।

धृष्टद्युम्नं द्रौपदीं च वेदीमध्यादनिन्दिताम्(त्सुमध्यमाम्) ।। ५७ ।।(०४)

**धृष्टद्युम्नस्तु पार्थानां श्यालः सम्बन्धिनां(न्धतो) मतः।**
**पाण्डवानां प्रियरतस्तस्मान्मां भयमाविशत्।**
**धृष्टद्युम्नस्तु पार्थानां श्यालः सम्बन्धितां गातः**
**पाण्डवानां प्रियरतस्तस्मान्मां भयमाविशत्**(०५)

ज्वालावर्णो देवदत्तो धनुष्मान्कवची शरी।

---

(०१) (१)द्यूतेन (For धर्मतः ); पाण्डुपुत्रो; ते ये (For वै ) अधर्मतः पाण्डुपुत्रान् (२) वने (Forवनं ); गच्छति; पाण्डवाः; कौरवाः (Forनिर्जिताः )

(३) तु (Forच ); (२) वने (Forवनं) गच्छति पाण्डवाः; कौरवाः (Forनिर्जिताः)

(४) तु (Forच) (४) पाण्डवाः कौरवान् (Forकौरवाः).

(०२) (१)चरन्तो ब्रह्मचर्य च; (२)क्रोधावर्ष (Forमर्ष- ); समन्विताः (Forवशानुगाः ); (३) प्रयोजयिष्यन्तिः निर्यातं (Forप्रत्यान); (४) ख-घ-धर्मयुक्ताश्च । महद्दः(Forमम दु० ); भारत; पाण्डव (Forपाण्डवाः).

(०३) (१)यथा (Forमया );( अ )पि। च; वि नु- हि; अ व (Forतु) राजा; याज्ये; राष्ट्राद् (For राज्याद् ); (२) अ- द्रुपदः सपरिग्रहः । क- द्रुपकदः पार्षतः पुरा । सह (स हि) विग्रहे; पार्षदः पुरा; सस्विविग्रहैः; सखिव१ (य) द्रणे; सपुत्रम् (Forपुत्रार्थम्) अजयत् अयजतत् अयतत् (Forअयजत्) कोपाद् राजा (Forक्रोधाद्) स यज्ञमकरोत्क्रोधा द् (४) वधार्थ (For बधाय); भरतर्षभ; मम भारताः मद्वधाय च भारत;.

(०४) (१)याज्यो (For याजो ); याजोपयाजयोः सत्रे याज्ञसेनोपि मक्रोधात् (२) पुतै (त्रौ) (Forपुत्रं) तु (Forस) भारताः (Forपावकात्) जनयामाप्त पावकात् (४) वेदिमध्यात् अनिन्दितां समुद्दितां समुत्थितः ता (Forसुमध्य).

(०५)सम्बन्धिनो मतः (For सं ग) प्रितरतसू.

मर्त्यधर्मतया तस्मादद्य मे साध्वसो महान् ।। ५८ ।।[०१]

लक्षालङ्कारः-मर्त्यधर्मतया इत्यत्र अस्माकं मृत्युभूतादिति योग्यपदाध्याहारः ।

गतो हि पक्षतां तेषां पार्षतः परवीरहा ।

मद्वधाय श्रिते धीमान् लोके चाप्यतिविश्रुतः ।

सृष्टप्राणो भृशतरं तेन चेत्सङ्गमो मम ।। ५९ ।।[०२]

लक्षालङ्कारः-सृष्टप्राण इत्यत्र भृशतरं सम्यक् यस्मात् सृष्टप्राणः त्वत्तः धनदानेन सृष्टः प्राणः प्राणनं जीवनं यस्य ।

रथातिरथसङ्ख्यायां योऽग्रणीरर्जुनो युवा ।
किमन्यद्दुःखमधिकं परमं भुवि कौरवाः।
धृष्टद्युम्नो द्रोणमृत्युरिति विप्रथितं वचः।
कमन्यतुःस्वमधिकं परमं भुवि कौरवाः ।
मद्वधाय श्रुतोऽप्येष लोके चाप्यति विश्रुतः।
सोऽयं नूनमनुप्राप्तस्त्वत्कृते काल उत्तमः।[०३]

---

(०१) (१)धृष्टद्युम्नो (Forज्वालावर्णो ); लोहिताक्षो; देवदत्तो जातो द्रोणवधार्थाय; (२) धनुषी (Forष्मान् ); वशी; सरीः रथी (Forशरी; (३) भयात्; रताद् (Forतया ); यस्माद्; अस्माद्; ( अ )स्माकं (Forतस्माद् ); मर्त्यधर्मेण संयुक्तं; (४) अपि मां; अत्र मां ।।; अद्य मां; अथ मां मे मामद्य; अस्माकं; तस्मान्मा (For इति मां ); अस्ति (अद्य) मे साध्वसो महान् (सं महत् ); साध्वसो;.

(०२) (१)ततो (For गतो ); () पि (For हि ); पक्ष्यतां; यक्षती; पक्षतसू (For पक्षतां ); गतो विपक्षेस्तेष्वासः; (२) पार्षदः; प्रार्थितः; पार्षतं; परवीरहा; पुरुषर्षभ ; (३)इष्टः प्राणप्रियतरः; अप्राणोहं भृशतरं; इष्टः प्राणैः प्रियतरः; इष्टः ( इष्टं; इष्ट ;द्रष्टः;) प्राणैर्भृशतरं; सृष्टप्राणो धृतशरः (भृशं तेन; भृशतरः); सृष्टः प्राणो भृशतरं; सृष्टा (ष्टः) प्राणो भृशं तात; सृष्टः प्राणैः प्रियतरः; सृष्टः प्रणाशोतितरां; सृष्टप्राणः (४) तस्मै; तेन (For तस्माद् ); तद्योत्स्येहं तवारिणा; स मां योत्स्यत्य वारितः; तेन चेत्सङ्गमो मम ( समं ); सं गमो -अ- सृष्टः प्राणैभ-शतरं । ग- हृष्टप्राणो भृशतरं ।.

(०३) (१)मद्वधार्थ (For धाय ); (आ) शिो; शिो; कृते (For श्रुतो ); समुत्पन्नो (For श्रुतो येष ); मे स; मेध्यः; (ऽ) प्येष; (ऽ) यं वै; चैव; चैष; धीमारन् (मेसौ) (For ह्येष ); (४) वा(For च ); (अ) भि- (For (अ) ति- ); विश्रुते; विश्रुतं (For -विश्रुतः ); लोके चाप्यति( चापि वि )क्षुतः; .

सोऽयं नूनमनुप्राप्तस्त्वत्कृते कालपर्ययः ।
त्वरितं कुरुत श्रेयो नैतदेतावता कृतम् ।। ६०।। (०१)

लक्षालङ्कारः-पर्ययो विपर्ययः ।।

मुहूर्तं सुखमेवैतत्तालच्छायेव हैमनी।(०२)
यजध्वं च महायज्ञैर्भोगानश्नीत दत्त च ।। ६१ ।।(०३)

इतश्चतुर्दशे वर्षे महत्प्राप्यस्यथ वैशसम् ।। ६२ ।।(०४)

दुर्योधन निशम्यैतत्प्रतिपद्य यथेच्छसि ।

साम वा पाण्डवेयेषु प्रयुङ्क्ष्व यति मन्यसे(०५)

वैशम्पायनः-

द्रोणस्य वचनं श्रुत्वा धृतराष्ट्रोऽब्रवीदिदम् ।। ६३ ।।

धृतराष्ट्रः-

---

(०१) (१) सोयं नूनम् ; नूनं योजननु-; नृशंसोयमनु-; नूनं सेमामनु; अनुप्राप्य; सोयं तं ( नः) समयं ( नु-) प्राप्तः; (२) अकृते (For त्वत्कृते ); काल उत्तमः ( मुत्तमं); कालपर्ययं ( याः; यात्);.

(०२) (१)त्वरितं; त्वरितः; कुरवः; कुरुतः; कुरु; वः; कुरुते; कुरु तत् (For कुरुत) कुरु निश्रेयो (For कुरुत श्रेयो ); श्रेयः (२) (अ)द्भुतं (For कृतम्); नैतदेवाभृतं भवेत् -; (३) मुहूर्त- (For र्तं ); दुःखम् (For सुखम् ); मुहूर्तसुखदे चैव; (४) तालच्छायैव; तालवायेव; कूलच्छायेव; मेघ;हेमनी; हैमही भैमिनी; भाति मे; हैमती; हैमनि; राज्ये प्रीतिमावह;.

(०३) (१)जय (For यज ); यजध्वं विविधैर्यज्ञैर् (२) भोगा (For गान्); असति (For अश्नीत) नित्यशः; कामतः; पुष्कलान्; करवाः; भारताः; पार्थिवाः ( वैः); चार्थिवत् (For दत्त च); भोगाननुभवन्ति च; .

(०४) (१) ततश् (For इतश्) वृत्ते भीरुभयङ्करम् । दुर्योधन महाबाहो; (वृत्तं; करे; महावादी (For वाहो); (२) प्राप्य; प्राप्स्यसि (For प्राप्स्यथ ); वै शमं;.

(०५) (१) दुर्योधने; निशाम्यैतत्; निबोधैतत् (For निशम्यैतत् ); (२) प्रतिपत्स्य; प्रतीपद्य; प्रपद्यस्व (For प्रतिपद्य ); यदी (दि) च्छसि, यथेच्छसि तथा कुरु; प्रतिपद्यस्व य ( त )त्क्षमं; प्रपद्यस्व यथेच्छसि, (३) शर्म वा; समयं; शमं वा; समे वा; वैशसं; समया (For साम वा ); पाण्डवीयेषु; पाण्डुपुत्रेषु (For पाण्डवेयेषु ); (४) प्रयुज्य; प्रायुङ्क्ष्व (For प्रयुङ्क्ष्व );.

सम्यगाह गुरुः क्षत्तरुपावर्तय पाण्डवान् ।। ६४ ।।(०१)

लक्षालङ्कारः-गुरुः द्रोणः ।।

यदि ते न निवर्तन्ते सत्कृता यान्तु पाण्डवाः।
सशस्त्ररथपादाता भोगवन्तश्च पुत्रकाः ।। ६५ ।।(०२)

**अस्मिन् पर्वणि ७१अध्याये ६५श्लोकाः सन्ति**

अनुद्यूतपर्वणि(६) **षष्ठोऽध्यायः ।**

**इति श्रीमहाभारते शतसाहस्र्या वैयासिक्यां संहितायां सभापर्वणि अनुद्यूतपर्वणि विदुरधृतराष्ट्रद्रोणवाक्ये एकसप्ततितमोऽध्यायः।। ७१।।**

# ७२.द्विसप्ततितमोऽध्यायः

## 02- 07- 72

**धृतराष्ट्रसञ्जययोः संवादः ।। १ ।। धृतराष्ट्रस्य चिन्ता सञ्जयेन सह तस्य वार्तालापश्च ।। २।।।**

**वैशम्पायनः**

वनं गतेषु पार्थेषु निर्जितेषु दुरोदरे।
धृतराष्ट्रं महाराज तदा चिन्ता समाविशत् ।। १ ।।(०३)

---

(०१) (१)सत्यमाह; सम्यगात्थ; द्विजश्रेष्ठ; रतक्षत्ता; गुरुः ; क्षत्ता; क्षत्त (For क्षत्तर्) (४) ह्यपावर्तय; उपवर्तत;समावर्तय (For उपा० ); सत्यं ते वचनं भवेत्.

(०२) (१)सत्याथेन् (For यदि वा );ते (For वा ); तन् (For न ); निवर्तेरन्; र्तेत; निवत्ते र्तेते (For र्तन्ते) पाण्डवान्; पुत्रकाः (For पाण्डवाः) (३) रथपादात; शरपादाता; रथपादातो; (४) भाग्य (For भोग); भारताः; पार्थिवाः(For पुत्रकाः);.

(०३) (१)एवं (For वनं); यातेषु (Forगतेषु); गतेषु पार्थेषु वनं; (२) दुरोदरान्; दरोदरे (रैः); निमज्जितेषु दुरोदरे धृतराष्ट्रो; महाराजश्; प्राज्ञश्; राजं बाहुं भागं; राजा (Forराज); धृतराद्रमहाराजं; (४) ततश् (Forतदा); चिन्तां तदा चिन्तापरोभवत्.

तं चिन्तयानमासीनं धृतराष्ट्रं जनेश्वरम्।
निःश्वसन्तमनेकाग्रमिति होवाच सञ्जयः ।। २ ।।[०१]

सञ्जयः

अवाप्य वसुसम्पूर्णां वसुधां वसुधाधिप।
प्रव्राज्य पाण्डवान्राज्याद्राजन्किमनुशोचसि ।। ३ ।।[०२]

धृतराष्ट्रः

अशोच्यत्वं कुतस्तेषां येषां वैरं भविष्यति।
पाण्डवैर्युद्धशौण्डैर्हि बलवद्भिर्महारथैः ।। ४ ।।[०३]

सञ्जयः

तवेदं स्वकृतं राजन्महद्वैरमुपस्थितम्।
विनाशो येन लोकस्य सानुबन्धो भविष्यति ।। ५ ।।[०४]

**लक्षालङ्कारः-सानुबन्धः अनु अनन्तरं नाशानन्तरमित्यर्थः बन्धःयाम्यपाशैर्बन्धनादि-निर्बन्धः, तेन सहितः सानुबन्धः**

वार्यमाणो हि भीष्मेण द्रोणेन विदुरेण च ।

---

(०१) (१)सं (२ तं) चिन्तयन्तम् अनिशं; राजेन्द्र (Forआसीनं); ततश्चिन्तनमासीनं; (३) नरेश्व - (३) निस्वसन्तम्; निश्व; निःस्वं निव,.

(०२) (१) वसुसम्पूर्ण वसुधां कृत्स्नां; (२) राज्यं चः सम्पूर्णा (For वसुधां) वसुधाधिपः धिपे धिपं प्रवाज्य; प्रव्राज राज्यान्; राष्ट्राद् राजन् राज्यं; सर्वान् (Forराज्याद् ); (४) राज्यात्; भृशं (For राजन्);.

(०३) (१)अशोच्यता अशोच्यत्वं (स्त्वं) अशोच्यान्नः (Forयं तु ); नः तत्; नु (For तु ); कृतस् कृतं (For कुतस्); अशोच्यं च कुरुष्वेषां न सुखं न कुलं तेषां तत्सुखं न कुलं तेषां; (२) वरं एषां (Forयेषां ); येषां; युद्धं वैरी (३)पुरा (For वैरं); महात्मभिः (For भवि;) (३) तु तैर्; ते (Forहि) पाण्डवैर्युद्धशौडर्हे; पाण्डवेयैर्द्धर्युद्धशौडैर् ,पाण्डवैर्युद्ध- कुशालैर् शौण्डैः; (४) बलवद्भिर् । च सञ्जय (Forमहारथैः );.

(०४) (१) अ-तदैव। घ- तदेवं। ग-तद्वेद। तदेतद्; यत्तेदं त्वयेदं तवैव; तद्वेद; तदेवं तदेवः तत्रेदं (For तवेदं ); दुष्करं स्वकृतं स्वकृते; तु कृतेः सुतं (For सुकृतं ); त्वयैवेदं कृतं राजन् (२) युद्धं (For वैरं ); उपस्थितं (For भविष्यति ); वैरं भवति नान्यथा; येन लोकस्यः सानुवन्धस्य (For सर्वं) ) (४) लोकस्यास्यः सम्प्राप्तोयः सानुबन्धो.

पाण्डवानां प्रियां भार्यां द्रौपदीं धर्मचारिणीम् ।। ६ ।।[०१]

प्राहिणोदानयेहेति पुत्रो दुर्योधनस्तव ।
सूतपुत्रं सुमन्दात्मा निर्लज्जः प्रातिकामिनम् ।। ७ ।।[०२]
प्राहिणोद्द्रौपदीहेतोरानयेति पुनः पुनः ।[०३]

यस्मै देवाः प्रयच्छन्ति पुरुषाय पराभवम्।
बुद्धिं तस्यापकर्षन्ति सोऽपनीतानि पश्यति ।। ८ ।।[०४]

लक्षालङ्कारः-अपनीतानि इत्यत्र अपनीतानि नीतिविरुद्धानि कर्माणि ।

बुद्धौ कलुषभूतायां विनाशे समुपस्थिते।
अनयो नयसङ्काशो हृदयान्नापसर्पति ।। ९ ।।[०५]

अनर्थाश्चार्थरूपेण अर्थाश्चानर्थरूपिणः।
उत्तिष्ठन्ति विनाशाय नूनं तच्चास्य रोचते ।। १० ।।[०६]

---

(०१) (१)निवार्यमाणो (Forवार्यमाणोप ) हि (For ऽपि) प्रियं; भार्या; (४) द्रौपदी;.

(०२) (१) त्येवं (ह) तीह प्राहिणोदानय हेति; प्राहिणोन्मामुपेहीति। प्राहिणोद्दारवश्चेति; वार्यमाणः सुमन्दात्मा; प्राहिणोदानहेयेतिः प्राणयेदानयेहेति; प्राहिणोदानये- तेति (२)प्राह (Forपुत्रो।। ) तदा तथा (For तव) (३)तव पुत्रः तदा सूतं (Forसूतपुत्रं) स मन्दात्मा; च मन्दात्मा प्रसन्नात्मा (Forसुमन्दात्मा) सूतपुत्रम- मन्दात्मा पुत्रश्च मंहात्माः पुत्रेण सहितो पुत्रः स मन्दात्मा, (४) निर्ष्णेजुः निर्लज्जा निकृतिं (Forनिर्लज्जः) प्रतिगामिनं;.

(०३) ( आपयेज्ज; ९। अनायेति (Forआनयेति ).

(०४)सञ्जय युधिष्ठिर (For धृतराष्ट्र ); (१) यस्य येसमै (२)पुरुषस्य (३) प्रकर्षति (अ)प्रकर्षति (४) व्यपरीतानि स प्राचीनानि, स च सम्यङ्ग सोप पा वि नीतानिः, सोवाचीनानिः स विरुद्दानि, विपरीतानि सोपि नीचानि सोवादौना (न) नि (Forसोऽपाचीनानि ); स वेत्त्यात्मनो हितं; २८ सोवावीनानुपश्यति विपरीतानुपश्यति ); अवाचीनानि (विपरीतानि) । अपनीतानि;.

(०५) (१)कलुषभूतानां; (२)पर्युपस्थितो पर्युपस्थिते; समुप; (३) अनयोन् नयसङ्कशो; (४)नावसर्पति नापसर्पत;.

(०६) (१) हि (Forच) (२)तथार्थानर्थं रूपिणा; उत्तिष्ठन्ते आविशन्ति विनाशाय शार्थे उपतिष्ठन्ति नाशाय (शान्ते ); (४) नूनं; गरं (Forनरं ); न च तस्याच्च; वरं तस्य न; न वरं तस्य; तथा तस्य च हितं तस्य न नरं तस्माद्य; नरतेश्चास्य नरस्तत्रापि;.

न कालो दण्डमुद्यम्य शिरः कृन्तति कस्यचित्।
कालस्य बलमेतावद्धिपरीतार्थदर्शनम् ।। ११ ।।(०१)

आसादितमिदं घोरं तुमुलं लोमहर्षणम्।
पाञ्चालीमपकर्षद्भिः सभामध्ये तपस्विनीम् ।। १२ ।।(०२)

अयोनिजां रूपवतीं कुलजां तां विभावरीम् ।
को नु तां सर्वधर्मज्ञां परिहूय यशस्विनीम्।
पर्यानयेत्सभामध्ये विना दुर्द्यूतदेविनः ।। १३ ।।(०३)

लक्षालङ्कारः-कुलजां तां विभावरीम् इत्यत्र विभावरीं, विभावः विरुद्धं भावयन् खलः रीयते नाशं प्राप्नोति यस्याः सकाशात् सा विभावरी । 'भा दीप्तौ' इति धातोः विशेषेण प्रभावती वा, तां परिहूय परितः आह्वानं कृत्वा । दुर्द्यूतदेविनः शकुनेर्द्यूते ।।

स्त्रीधर्मिणी वरारोहा शोणितेन परिप्लुता।(०४)
एकवस्त्राथ पाञ्चाली पाण्डवानभ्यवैक्षत ।। १४ ।।(०५)

---

(०१) काले कुलो शरत्रम् खजम् (Forदण्डम्) आदाय (Forउद्यम्य ) (२) कृन्तते कस्थचिच्छिरः; (३)कालोस्य वशम्; कृत्यम् (Forबलम् ); एवैवदद्, एतद्धि (Forएतावद् ); (४) विपरीतानुदर्शनं तार्थदर्शनात्.

(०२) (१)असादितम् उपस्थितम् इमं (For इदं) (२)तुमलं अतुलं घोरदर्शनं रोमहर्षणं; (३)अद्य कर्षद्भिः परि परिकर्षति; (४) तपस्विनी यशस्विनीं; रस्त्ववक्ध्रनखीं श्यामां पूर्णश्चन्द्रनिमाननाम् । शुचिस्मिता मनलात्मजाम् ।.

(०३) (१)अयोनिजा रूपवती। वन्ती कूपवतीं; (२)जाता;कुलजां तां (For कुले जातां ); विभावतीं (नीं) विभावसोः; मनस्विनी (नी) महासतीः विभाविनीं, सर्वधर्मज्ञ; (४)परीभूय परिभूयेद् परिहूय (Forभूय) तपस्विनीं मनस्विनीं (Forयशं ).

(०४) (१)पर्यनयेत्; पर्यानयेः नयत् सभामध्ये (Forमध्यम् ); (२) द्यूते विना, मृते; मते (Forऋते ); दुर्यूतदेवितं (नीं) दुद्यूतदेविनः तं द्यूतदेवि (व) नं, दुछतदेविनं; दुर्द्यूतवेदिनः तद्यूतदेवनं दुःशासनादपि दुर्यतदेविनः द्यूतं ६१२४ केशग्रहमनुप्रासां क्रोशन्तीं कुररीमिव ।
(केशाग्र ह म्; केशग्राहं; परिप्राप्तां; (३) स्त्रीधर्मिणी सतीं साध्वीं वशरोहा एकवरत्रां रत्रा वराहोभा (Forरोहां ); (४)रजसा च रुधिरेण; रुदती च; रुदन्तीं च (Forशोणितेन ); परिप्लुता तां सुमुक्षतां क्षिता त्क्षीतां वीक्ष (क्ष्य) माणां (णान्) निजान्पतीन्.

(०५) (१)एकवस्त्रा; वस्त्रेण (Forवस्त्रां च ); तु; ( अ )थ (Forच ) पाञ्चाली; (२)अभ्यवी-

हृतस्वान्हृतराज्यांश्च हृतवस्त्रान्हृतश्रियः।(०१)
विहीनान्सर्वकामेभ्यो दासभावमुपागतान् ।। १५ ।।(०२)
धर्मपाशपरिक्षिप्तानशक्तानिव विक्रमे ।। १६ ।।(०३)

क्रुद्धां चानर्हतीं कृष्णां दुःखितां कुरुसंसदि।
दुर्योधनश्च कर्णश्च कटुकान्यभ्यभाषताम् ।। १७ ।।(०४)
**सुखेन स्वप्तुमिच्छेत विषं पीत्वेव मानवः ।**
**इति सर्वमिदं राजन्नाकुलं प्रतिभाति मे।**
**नै इति सर्वमिदं राजन्नाकुलं प्रतिभाति मे ।**

धृतराष्ट्रः

तस्याः कृपणचक्षुर्भ्यां प्रदह्येतापि मेदिनी।

---

क्ष्यतः; अप्युदीक्षितीं; अभ्युदक्षितीं; समवैक्षत; अभिवक्षिति; अभ्यवेक्षती; वैक्षत (तीं); समुदैक्षत; अभ्युदैक्षत; अन्ववेक्ष्यति (Forअभ्यवेक्षतीम्); पाञ्चालानप्यवेक्षतीं;.

(०१) (१)हतस्वान्; हृताश्वान्; हतश्चान्; द्यूतेन (For हृतस्वान् ); भ्रष्टवि (चि )त्तांश्च; राज्यांस्तान्; नष्टचित्तांस्तान् (त्तांश्च); भ्रष्टराज्यांश्च; हृतराज्यांश्च; भ्रष्ट- वस्त्रांश्च; कृ (हृ) तवित्तांश्च; भूष्टचित्तांस्तान्; हृतचि (तवि; ष्टचि ) त्तांस्तान् (Forभ्रष्ट- चित्तांस्तान् (२) हृ (हृ) तवस्त्रान्; राज्यान्; शस्त्रान् जितराज्यान् (Forहृतदारान्); हृतश्रियान्; हृतात्प्रियः; हृतस्त्रियः; स्त्रियः; श्रि (न) यः; प्रियान् (Forश्रियः );.

(०२) (१)व्यपेतान्; विहितान्; विहीना (Forविहीनान् ); आर्थकाम्येभ्यो (Forसर्वं ); (२) दासभावमुपागतान्; भावाद्धशं गतान्; भावं भृशं (भावदशा) गतान्; भावादपागतान्; सभायां प्रशमं गताः.

(०३) (१)धर्मपाशपरिक्षप्तान्; पाशे विनिःक्षिप्तान् (२) अशस्तानिव (Forअशक्तानिव );सक्ता भवति वर्तितुं; अशक्तांश्च पराक्रमे; अशक्ताश्चं सुपराक्रमे; अशक्ता न्युद्धपराक्रमे.

(०४) (१)अनर्हतीं; चामर्षितां; वामर्षितां; चानर्हतीं (तां) अपि च तां (Forअमर्षितां ) (२) रुदतीं च तां; जनसंसदि (Forकुरु ); को नु कर्षति संसदि; (३) दुःशासनश्च (Forदुर्यो ); (४) कटुकान्यथ भाषतां; न्यभ्यभाषत (तः तं); न(ना )भ्यभोषतां; कटुकं तामरो(वो )चतां; कटुकान्प्रत्यभाषतां (त); कानभ्यभारतां; नभ्यभाषतं;.

अविशेषं भवेदद्य पुत्राणां मम सञ्जय ।। १८ ।।(०१)

लक्षालङ्कारः-अविशेषं भवेत् इत्यत्र अविशेषं विशेषेण शेषरहितं कुलम् ।

भरतानां स्त्रियः सर्वा गान्धार्या सह सङ्गताः।
प्राक्रोशन्भैरवं तत्र दृष्ट्वा कृष्णां सभागताम् ।। १९ ।।(०२)

प्राक्रोशति वरं तत्र गोमायुर्भरतर्षभ ।
धर्मिष्ठां धर्मपत्नीं च रूपयौवनशालिनीम्।
प्रजाभिः सह सङ्गम्य ह्यनुशोचन्ति नित्यशः।(०३)
प्राक्रोशद्भैरवं तत्र दृष्ट्वा गोमायुरुत्कटम्।

अग्निहोत्राणि सायाह्ने न चाहूयन्त सर्वशः।

ब्राह्मणाः कुपिताश्चासन्द्रौपद्याः परिकर्षणे।
आसीन्निष्ठातपो घोरो निर्घातश्च महानभूत् ।। २० ।।(०४)

लक्षालङ्कारः-आसीन्निष्ठातप इत्यत्र नितरां स्थितः आ समन्तात् तपः तपनं यस्य स सूर्यस्तथोक्तः ।

दिव उल्काश्चापतन्त राहुश्चार्कमुपाग्रसत्।
अपर्वणि महाघोरं प्रजानां जनयन्भयम् ।। २१ ।।(०५)

---

(०१) धृतराष्ट्र उं; (१)तस्या; कृपणचक्षुभ्यां; (२)प्रदहेतापि; ह्योदपि मेदिनीं मे धृतं; (३)अपि शोष६; अविशेषं (Forअपि शोषं ); एषां (Forअद्य); (४) पुराण।। (Forत्राणां ) अपि (For मम ); संसदि; सञ्जयः;.

(०२) (१)भरतानां; गान्धारी (Forगान्धार्या ); वशमागताः; सह संयुताः (Forसह सङ्गताः); (३)आक्रोशन्; प्राक्रोशद्; भैरवं; भैरवं नादं; वं तैश्च; बाधादान्; भृशवत्तत्र (Forभैरवं तत्र ); श्रुत्वा दृष्ट्वा सभां गतां (गतां सभां); समागतां; तथागतां; गोमायुर्भरतर्षभ;.

(०३) पूजाभिः प्रजाश्च (Forप्रजाभिः);.

(०४) (१)अग्निहोत्राश्च; सायाह्ले; ह्लो (२) च हूयत (For चाहू); न च भूयन्त सर्वतः; (३) ब्राह्मण ण्य ब्राह्मणः; कुपितो; राजन्; चापि; आसन् (Forचासन्); (४)द्रौपद्या; द्य; परिकर्षणात् विप्रकर्षणे; केशं; वस्त्र सम्प्रधर्षणे; परिकर्शने;.

(०५) (१)निष्ठातको; भयानको; सत्वान्तको सर्वान्तको; द्वारे (Forघोरो); आसीनष्ठानघोरोपि आसिन्निष्टनको घोरो; हाहाकारो महान् जज्ञे; आसीदुत्पातक (का) श्चैव आसीच्च (यस्मिंश्च) निष्प्रभो घोरो; आसन्निष्ठानको

तथैव रथशालासु प्रादुरासीद्धुताशनः।
ध्वजाश्चापि व्यशीर्यन्त भरतानामभूतये ।। २२ ।।(०१)

दुर्योधनस्याग्निहोत्रे प्राक्रोशन्भैरवं शिवाः।
तास्तदा प्रत्यभाषन्त रासभाः सर्वतो दिशः ।। २३ ।।(०२)

प्रातिष्ठत ततो भीष्मो द्रोणेन सह सञ्जय।
कृपश्च सोमदत्तश्च बाह्लीकश्च महामनाः ।। २४ ।।(०३)

ततोऽहमब्रुवं तत्र विदुरेण प्रचोदितः।
वरं ददानि कृष्णायै काङ्क्षितं यद्यदिच्छति ।। २५ ।।(०४)

अवृणोत्तत्र पाञ्चाली पाण्डवानामदासताम्।

---

घोरो; निष्ठानकः; निष्टानकः आसीन्निष्ठातपः (२) सु (Forच) निर्घातश्चपतत्क्षितौ (३) दिवश्चोल्का (ल्काः) (For दिवोल्काश्च ); प्रपतन्; चाभवन् (For चापतन्); दिवोल्का चापतद्धोरा; दिव उल्काश्चापतन्त (ति); दिवश्चोल्कापतद्धोरा (रो) दिव उल्का पतन्तश्च; (४) राहूश् (उ)ग्रम् (Forअ र्कम्) उपागमत्; अपाग्रसत्; उपेयिवान्; अथाग्रसत्; उपाद्रवत् (Forग्रसत्), राहुश्चन्द्रार्कमार्दयत् (मर्दयन्) (३) अपर्वणी एतत्सर्व महाघोरः पुत्राणां प्राणिनां (Forप्रजानां) जनयद् च महद् (Forजनयन्) हश्यते ग्रहसङ्कुलं.

(०१) (१)रथशालाश्च; (२)हुताशन; प्रादुरासन्हुताशनाः; प्रादुरास हुताशनः (३) पूजाश्च (For ध्वजाश्च ); ध्वजाश्च विवशीर्यन्त; श्च व्यवशीर्येत; श्चापि व्य (वि) शीर्यत श्चैव व्यशीर्यन्त श्चाप्यवशी (की )र्यन्त; श्चाभ्यवशी (ती र्यन्त; ग्राप्यवशीयन्ते (४)भारतानाम् भरतानां विपत्तये;.

(०२) (१)दुर्योधनश्च (Forनस्य ); (२)प्राक्रोशद्; क्रोशद्; प्राक्रोशं; भैरवाः; शिवा- सृगालोत्यभषद्ध लोत्यभवद्धव लो ह्यरुदद्धृ-; लाश्चाभवन्भृ) शं; (३)तांस्तदा; चा ( वा )तकाः; ततस्तान्; तं तथा (For तास्तदा ); प्रत्यवासन्त; प्रतिवाश्यन्त; प्रत्यवाद्यन्ते; वाश्यन्तु; वाश्यन्त; वाशन्त (Forभाषन्त ); (४)रासभां सर्वतो दिशः.

(०३) (१)प्राक्रोशत; प्रोतिष्ठत (Forप्राति० ); तदा; तथा (For ततो।। ); द्रोणो (For भीष्मो ); प्रतिष्ठान् त्वरीतो भीष्मः (२)भीष्मेण (Forद्रोणेन ); सह; सह; सञ्जयः; भीष्मश्च (ष्मोथ) विदुरस्तथा (४) बाह्लि (०लि) कश्च; महाबलः मनाः (For रथः).

(०४) (१)माम् (Forऽहम् ) अब्रवं; अभवं अब्रुवन् (Forअब्रवं) तथहमाजपतं तत्र (२)प्रनोदितः प्रदेशितः अभि पि चोदितः तं (३) ददामि ददाति कृष्णे ते ते कृष्णे कृष्णा वै (Forकृष्णायै) वरान्ददामि कृष्णायाः (४) वाञ्छितं काङ्क्षितान् इच्छसि;.

सरथान् सधनुष्कांश्चाप्यन्वज्ञासिषमप्यहम् ।। २६ ।।[०१]

लक्षालङ्कारः-अन्वज्ञासिषम् आज्ञामकरवम् ।

अथाब्रवीन्महाप्रज्ञो विदुरः सर्वधर्मवित्।

विदुरः-

एतदन्तास्तु भरता यद्वः कृष्णा सभां गता ।। २७ ।।[०२]

यैषा पाञ्चालराजस्य सुता सा श्रीरनुत्तमा।
पाञ्चाली पाण्डवानेतान्दैवसृष्टोपसर्पति ।। २८ ।।[०३]

तस्याः पार्थाः परिक्लेशं न क्षंस्यन्ते ह्यमर्षणाः।
वृष्णयो वा महेष्वासाः पाञ्चाला वा महारथाः ।। २९ ।।[०४]

तेन सत्याभिसन्धेन वासुदेवेन रक्षिताः।

---

(०१) (१) अन्नवित् सावृणोत् (Forअवृणोत्) तत (Forतत्र) (२) पाण्डवानामदासतां दासभावाद्विमोक्षणं; (३)सरथां; सशरान् (Forसरथान्); सधनुष्मांश्च नुष्कीश्च तान् (Forच ); (४)अनुज्ञाशिष्यम्; अन्वज्ञासिषम्; अनुज्ञां (अन्वज्ञा० ); दासान्सा हसती तदा; ( अ प्यदासान्सा सती तथा ; (दा); तानहं चादिशं तदा; अदासान्त्या सती तदा ( नदी।); तानुज्ञासिषं तथा। तत्वाज्ञासिषम- व्यहं; सापि वव्रे पतिव्रता; तानाज्ञासिषमप्यहं.

(०२) (१)तथा (Forअथ) यथा चाह (Forअथाब्रवीन्) (२)सत्यधर्मवित्; तत्वदर्शनः (३) च स्म; च स्थ (Forस्थ ); एतदन्ताथ;दतः स (Forदन्ताः स्थ ); कुरवो; चरता (For भरता ); (४) शुद्धा; यन्नः; यद्वा; येद्वत् (Forयद्वः); यत्कृष्णेयं (Forयद्वः कृष्णा ); सभा.

(०३) (१)येषां; यैषा; या सा; ये यं; सैषा; एषां; येषा; पञ्चाल; (२)सा सुतेषां; सुतेयं; सुता सा; सुता वै; दुहिता (For सुतैषा ); श्रीरनुत्तमां; द्वारिवापरा; सुता श्रीरिव रुपिणी सुता श्रमित्यनुत्तमा; (३)सहितान् (Forपाण्डवान्) एता राजन् (For एतान्); (४)देवसृष्टोपसर्पति; दैवस्पृष्टाप०; दैवसृष्टोपतिष्ठति (जीवति) दै (दे) वदिष्टोपसर्पति; दैवदृष्ट्योप०; दैवैः सृष्टोपं; दैवसृष्टान् जगत्पतीन्.

(०४) (१)परिक्रोशं; क्लेशा; क्लेशान् (२)क्षमन्ते; क्ष ( क्षा )त्यन्ते; क्षाम्यन्ते; क्षंमन्ति।; क्षंस्यति; क्षांस्यन्ते; ( ऽत्यमर्षिणः; ह्यमर्ष र्षिणः ह्यमर्षणाः; ह्यमर्षिणाः; कदाचन; ह्यत्वर्षिणः (For ऽत्यमर्षणाः ); न क्षपन्त्यग्रचेतसः; न क्षमिष्यं त्यमर्षणाः; न क्षन्तत्वमर्षिणः कृष्णेयो (Forवृष्णः ); महेष्वासा; (४) पञ्चालाः च (For वा ); ( अ )मितौजसः; मिलोजसः महारथाः; महाभुजाः (For महौजसः );.

आगमिष्यति बीभत्सुः पाञ्चालैः परिवारितः ।। ३० ||[०१]

तेषां मध्ये महेष्वासो भीमसेनो महाबलः।
आगमिष्यति धुन्वानो गदां दण्डमिवान्तकः ।। ३१ ||[०२]

ततो गाण्डीवनिर्घोषं श्रुत्वा पार्थस्य धीमतः।
गदावेगं च भीमस्य नालं सोढुं नराधिपाः ।। ३२ ||[०३]

तत्र मे रोचते नित्यं पार्थैः साम न विग्रहः।
कुरुभ्यो हि सदा मन्ये पाण्डवान्बलवत्तरान् ।। ३३ ||[०४]

तथा हि बलवान्राजा जरासन्धो महाद्युतिः।
बाहुप्रहरणेनैव भीमेन निहतो युधि ।। ३४ ||[०५]

तस्य ते शम एवास्तु पाण्डवैर्भरतर्षभ।

---

(०१) (१)पुनः (For तेन ); तेन ते सत्यसन्धेन; तेनैव सत्यसन्धेन धने
(२) पालिताः; रक्षिता; वासवेनाभिरक्षितः आगमिष्यतीतित्संवभत्सुः मागधा कोशला मात्स्या आगमिष्यन्ति नीतिज्ञाः; (४)वलैस्तु; पञ्चालैर् पाञ्चाला पञ्चभिः परिवारितः; अभिसंवृतः चाभिरक्षितः (ताः); अभिवारितः; चापि रक्षितः (Forअभि ); पाञ्चालेनाभिरक्षितः;.

(०२) (१)एषां; स तु (For तेषां ); महा-; तेषां (Forमध्ये ); (२); महाबल; रथा मनाः (Forबलः
(३) धुन्वानो; धुन्वन्वै (४)गदादण्ड (For दण्डम् ); गदां काल इवापरः गदां गृह्यापरो(रां) तकः;.

(०३) (१)तं तु (Forततो) गाञ्जीवनिर्घोष (२) स्फूर्जितमिवाशनेः (३) गदारवं (Forवेगं)
(४) न शक्ष्यन्ति (Forनालं सोढुं) नराधिपा धिपः.

(०४) (१) तेन मे शमो मे शममे तत्र (तत) स्म तत्रामे (Forतत्र मे) रोचिते पार्थैर् (Forनित्यं)
(२) नित्यं (Forपार्थैः) सह साम सन्धिर् तत्र (Forसार्ध) सूमेन (त्र) सामन्न; सामन्त; साकं न (For सार्ध न); पार्थैः सार्थमविग्रहः (३) तु;(ऽ)पि (For हि ); पश्य (For मन्ये )
(४) शिखिसत्तमान्; शक्तिमतरान् बलवत्तरान् वुद्दिम (Forशक्तिम).

(०५) (१)अथ (Forतथा ); वै; अ ति (Forहि) राजञ् (For राजा ); या हि प्रष्टस्यता राजा; तथा चैव बली राजा; (२) सत्यसन्धो (Forजरां ); महादुतिः; बलाः; बलः (Forद्युतिः)
(३) बाहुप्रहारणेनैव; प्रहरणैरेव; प्रहरणे भीमो (४) भीमसेन (For भीमेन ) नियतो; विगतो (Forनिहतो ); यशाः (For युधि) भीमेन युधि (विनि) पातितः; हतो भीमेन संयुगे;.

उभयोः पक्षयोर्युक्तं क्रियतामविशङ्कया ।। ३५ ।।(०१)

एवं कृते महाराज परं श्रेयस्त्वमाप्स्यसि ।(०२)

धृतराष्ट्रः-

एवं गावल्गणे क्षत्ता धर्मार्थसहितं वचः।
उक्तवान्न गृहीतं वै मया पुत्रहितैषिणा ।। ३६ ।।(०३)

एते उपरिनिर्दिष्टाः श्लोकाः लक्षालङ्कारपाठानुरोधेनात्र सङ्ग्राह्या भवन्ति ।

वैशम्पायनः

समाप्ते पर्वणि तदा स्वशक्त्या तर्पयेत् द्विजान् ।
पर्वपर्वणि चावश्यं होमं कुर्यात् प्रयत्नतः ।।
आदौ च वाचके देयं वस्त्रं गन्धसमन्वितम् ।
सभापर्वणि राजेन्द्र हविष्यं भोजयेद् द्विजान् ।।
तर्पयेद् विविधैः कामैर्दानैश्चोच्चावचैस्तथा ।
अतिरात्रस्य यज्ञस्य फलं प्राप्नोति मानवः ।।
प्राप्नुयाच्च क्रतुफलं नरः पुस्तकपूजने ।
अपुत्रः पुत्रमाप्नोति पुत्रवान् लभते धनम् ।।
पुत्रैर्धनैश्च सहितो यशः कीर्तिं च विन्दति ।
श्रुत्वाख्यानमिदं पुण्यं निष्पापो जायते नरः ।।
एतत्सर्वं सभापर्व ह्याख्यातं ते महाविभो ।
ग्रन्थाग्रं सप्तके याते व्याप्तौ चाष्टसमाख्यया ।।

---

(०१) (१)तस्मात् (Forतस्य ); तैः; मे (For ते ); समः शमम् मम (Forशम) एवासु येवास्तु उत्तमैः क्रियतां सन्धिः (२)भरतर्षभैः (३) चोक्तं युक्तो (४) क्रियता (तां) मा विशङ्किथाः क्रियतामरिमर्दन (नः).

(०२)(श्रेयमवा (For श्रेयस्त्वमा).

(०३) (१) महाभारते एतद् (Forएवं) गावल्गने (णेः) गा सञ्जय गावद्गणे गृहीतस्त्वं तश्च तश्चेन (Forतं च) वै (Forच) उक्तवान्गच्छतं तं च पुत्रहितेप्सुना हितैषिणा परी परि प्सया उक्तवान्विदुशे धीमानिति सञ्जयमब्रवीत् अनुस्त;.

श्लोकानां द्वे सहस्रे तु पञ्चश्लोकशतानि च ।

वेदव्यासेन मुनिना पर्वण्यस्मिन् प्रकीर्तिताः ।। ३७ ।।

लक्षालङ्कारः-श्लोकानां द्वे सहस्रे तु पञ्चश्लोकशतानि च इत्यत्र व्याप्तौ श्लोकानां सम्पूर्तौ विचार्यमाणायां सत्यां अष्टसमाख्यया शतानामष्टसमाख्यया सह सप्तके याते सति पञ्चदशात्मकशतश्लोकेषु गतेषु सत्स्वित्यर्थः । उपरि श्लोकानां द्वे सहस्रे द्वे द्वित्वसङ्ख्यायुक्ते यथा भवतः तथा गणितानि पञ्चश्लोकशतानि पञ्चशतद्विकं चेति यावत् । मिलित्वा 'चतुस्सहस्रं श्लोकानां पञ्चश्लोकशतानि च' इति प्रागनुक्रमणिकाध्यायोक्तप्रकारेण पञ्चशतसहिता श्लोकानां चतुस्सहस्री ग्रन्थाग्रं 'अग्रं पुरःशिखामानश्रेष्ठादिषु फलादिषु' इत्यभिधानात् श्लोकप्रमाणं ज्ञात० यमित्यर्थः।

**अस्मिन् पर्वणि ७२अध्याये ३६३लोकाः सन्ति**

अनुद्यूतपर्वणि(७) सप्त**मोऽध्यायः**

**इति श्रीमहाभारते शतसाहस्र्या वैयासिक्यां संहितायां शतसाहस्र्या संहिताया वैयासिक्या सभापर्वणि अनुद्यूतपर्वणि द्विसप्ततितमोऽध्यायः।। ७२।।**